THE NEW SANSKRIT READER

Sanctuaire K.

THE
NEW SANSKRIT READER

FOR

H. S. C. AND ENTRANCE

Containing Explanatory Notes & Literal Translations.

(English & Tamil)

Compiled
BY
K. SUBRAMANIAN
NYAYA SIROMANI

PUBLISHERS:
SRI LANKA BOOK DEPOT,
234 K. K. S. Road,
JAFFNA

Copyright Reserved

1961

First Edition 1961.



The Bhagyodayam Press,
Tiruvalla, Kerala.

Introduction to Rutusamhara

It is well known that the Rutusamhara was written by Kalidasa, one of the nine poets of King Bojan's court, who were known as "The Nine Gems". The whole poem takes the form of an address to his beloved lady by the poet.

It is called Rutusamhara because it is a poem that discribes briefly the various seasons. There are six seasons: Vacanta, Grihsma, Varsa, Sarad, Hemanta and Sisira. The Vasantarutu is Spring ocurring in the months of April and May. Grihsmarutu is summer which occurs in June and July. Varhsarutu is the rainy season of August and September. Sarad or autumn comes in October and November, Hemanta or winter in December and January and the cold season Sisira in February and March.

In this poem the poet delights his readers by his accurate and artistic description of the beauty of the natural changes that take place in humans animals and plants during the various seasons. For example, in one of his descriptions he says that when a small stream of rain water flows along the street with snake-like zigzag movements, the frogs stand still blinking through fright thinking it to be their natural enemy the snake. In an introduction we are unable to point out every detail of this beautiful word picture but it suffices to say that every description is such a word picture that fires the imagination of the reader.

In order to acquaint their students with the beauties of nature teachers take them out on excursions during which they have undergo many difficulties such as bad weather, lack of proper transport and food. But this beautiful poem enables even a poor student to enjoy all the beauties of nature in the comfort of his own home.

முகவுரை

(ஸ்ரீமத் வால்மீகி ராமாயணம்)

இராமாயணம் என்று நாம் கூறும்பொழுதே 'ஸ்ரீமத் வால்மீகிராமாயணம்' என்று எளிதில் எல்லோராலும் அறிந்துகொள்ளப்படுகின்றது. பலராமன், பரசுராமன் முதலான பலர்-'ராம' என்னும் சொல்லுக்குக் கருத்தாக இருந்தாலும், ராமாயணம் என்னும் சொல்லில் உள்ளதான 'ராம' என்னும் சொல், 'ராம' என்னும் தாரகமந்திரத்துக்கு அதிபதியாக விளங்கக்கூடிய திருமாலின் அவதாரமும், துஷ்டநிக்ரஹசிஷ்டபரிபாலனம் செய்து, இன்னும் ராம ராஜ்யம் என்று கூறி நாம் பெருமைப்படும்வண்ணம் அயோத்திமாநகரிலிருந்து உலகாண்டுவந்த தசரத ராமனையே குறிக்கின்றது. இந்த ராமனுடைய சரித்திரமாக விளங்கும் ராமாயணமாவது, 24,000 பாட்டுக்களைக் கொண்டதாகவும், பாலகாண்டம், அயோத்யாகாண்டம், ஆரண்யகாண்டம், கிஷ்கிந்தாகாண்டம், சுந்தரகாண்டம், யுத்தகாண்டம், உத்தரகாண்டம் என ஏழு காண்டங்களைக் கொண்டதாகவும், பகுபாடுசெய்து இயற்றப்பட்டுள்ளது. இலகுவான சம்ஸ்கிருத சொற்களால் படிப்பவருக்கும் கேட்பவருக்கும், இன்பமளிக்கும்படி இயற்றப்பட்டிருப்பது, இதை இயற்றியவரான வால்மீகி முனிவரின் தனிப்பெருஞ்சிறப்பைப் எடுத்துக்காட்டக்கூடியதாக விளங்குகின்றது. இந்த ராமாயணத்தையே ஆதிகாவியம் என்று கூறுகிறார்கள்.

நாரத முனிவரால் 'ராம' என்னும் தாரகமந்திரத்தை உபதேசிக்கப்பட்ட வால்மீகிமுனிவர், அதை ஜெபம்பண்ணிக்கொண்டிருக்கும்பொழுது உடல் முழுவதையும் புற்றுக்கள் மூடி மறைக்கவே, பின்பு அப்புற்றிலிருந்து வெளிவந்தார். ஆகையினாலேயே இவருக்கு 'வால்மீகி' என்று பெயர் வந்தது. 'வல்மீக' என்சொல் புற்று. வால்மீகி என்சொல் புற்றிலிருந்து வெளிவந்தவர் என்பது கருத்து. பின்பு இந்த ராமாயணமானது வால்மீகி முனிவரால் பிரம்மதேவருடைய கட்டளையினால் இயற்றப்பட்டு, லவன் குசன் ஆகிய இரு சிஷ்யர்களுக்கும் படிப்பிக்கப்பட்டு, அயோத்திமாநகரிலே அஸ்வமேதயாக மகாமண்டபத்திலே ராமனுடைய மக்களான லவன், குசன் ஆகிய இவ்விருவர்களாலே ராமனது முன்னிலையிலேயே பாடப்பட்டது. இப்படிப்பட்ட காவியங்களைப் பிள்ளைகள் படிப்பதனால் சிறந்த படிப்பினைகளையும், அக்காலத்தில் உலகமக்களின் வாழ்க்கை நிகழ்ச்சிகளையும், தாய் தந்தையரிடம் அன்பு, சகோதரர்களிடம் ஒற்றுமை, பிறர் நலம் பேணுதல், முதலான பற்பல அரும் பெரும் விஷயங்களையும் கற்றுணர முடியும்.

பொதுவுரை

சுயபாஷைக் கல்வித் திட்டத்தின்கீழ் சம்ஸ்கிருத மொழியைக் கற்பதில் ஒரு புது ஆர்வம் மக்களிடையே தோன்றியுள்ளது. தேச இலக்கியம், இந்திய சரித்திரம் முதலிய துறைகளிற் பரந்த அறிவைப் பெற விரும்புவோருக்கு வடமொழியறிவு மிகவும் வேண்டற்பாலதொன்று. ஏனெனில் பாரதநாட்டின் பழம் பண்பாடுகளை எமக்கு நேர்முகமாக எடுத்துக் காட்டுவதில் அது தனியிடம் பெற்று விளங்குகிறது.

இதையுணர்ந்தே இலங்கை வித்தியாபகுதியினர் பல்கலைக் கழக பிரவேச வகுப்புக்கு இம்மொழியிற் சிறந்த இலக்கியங்களாகத் திகழும் இராமாயணம், ருதுசம்ஹாரம், பஞ்சதந்திரம் ஆகியவற்றை பாட புத்தகங்களாக வைத்துள்ளனர். இது மிகவும் மகிழ்ச்சிக்குரியதே. ஆனால் மாணவர் தமக்கேற்ற பாடப்புத்தகமொன்றில்லாது இதுவரை இடர்ப்பட்டனர். இக்குறையைப் போக்கும் நோக்கத்துடனேயே இந்நூலை வெளியிட முன்வந்தோம். பரீட்சைக்குத் தேவையான பகுதிகளை மட்டும் பிரசுரித்ததோடு அமையாமல் மாணவர் எளிதிற் புரிந்துகொள்ளும் படியாக கடின சந்திகளை பிரித்துக் காட்டி சொற்களின் இலக்கண அமைப்பையும் எடுத்துக் காட்டியுள்ளோம். பொழிப்புரையும் கூடியவரை மூலத்தையொட்டியே எழுதப்பட்டுள்ளது. இந்நூல் சகலருக்கும், (விசேஷமாக பல்கலைக் கழக பிரவேச வகுப்பு மாணவருக்கு) பெரிதும் உதவும் என்பது எமது உறுதியான நம்பிக்கை.

இந்நூலை பதிப்பிக்குமாறு எம்மை ஊக்குவித்த சகலருக்கும், ஆங்கிலத்தில் மொழிபெயர்த்து உதவியோருக்கும், சிறப்பாக புகழ்பெற்ற மெஸ்ஸேர்ஸ் பாக்யோதயம் பிரஸ், திருவல்லா (கேரளா) பதிப்பகத்தாருக்கும் எமது நன்றியை தெரிவித்துக் கொள்ளுகிறோம். இதிலுள்ள குறைபாடுகளை பேரறிவாளர்கள் எடுத்து கூறின் யான் அடுத்த பதிப்பில் அவற்றை இன்னும் திருத்தமாகப்போட உதவியாக இருக்கும்.

இங்ஙனம்,

நியாயசிரோமணி

கை. சுப்பிரமணியம்.

முகவுரை
(பஞ்சதந்திரம்)

பஞ்சதந்திரமானது ராஜகுமாரர்களுக்குப் படிப்பிப்பதற்காக விஷ்ணுசர்மா என்னும் பண்டிதனால், சம்ஸ்கிருத பாஷை மூலம் ராஜநீதிகளை சுலபமான முறையிலும் குறுகிய காலத்திலும் படிப்பிப்பதற்காக இயற்றப்பட்ட ஓர் கிரந்தமாகும். இதில் கூறப்பட்டுள்ள கதைகளெல்லாம், ஒவ்வொரு நீதியை மனதில் புகட்டுவதற்கு மிக உபயோகமுள்ளவைகளாக இருக்கின்றன. மேலாகப் பார்ப்போருக்கு கதைகளைக் கூறுவதுபோல இது தோன்றினாலும், அரசன் முதல் ஆண்டிவரை அன்றுடவாழ்க்கையில் கையாளப்படவேண்டிய பெரிய பெரிய நீதிசாஸ்திரங்களின் உயிர்நாடியாக உள்ள நீதிகளைச் சாராம்சமாக எடுத்து அளிக்கக்கூடிய சிறந்த ஓர் நூலாகும். சிறப்பாக அரசர்களுக்குகந்ததான நீதிகளும், அணிகள் (சேனைகள்) வகுக்கப்படவேண்டியதான விஷயங்களும், கீழ்ப்படியாத மன்னர்களை தன் ஆளுகைக்குட்படுத்தும் முறைகளும் ஆங்காங்கு கூறப்பட்டிருப்பது, இதைப் படித்துணரும் யாவருக்கும் (சிறுவர் முதல் பெரியோர் வரை) புலனாகும். இவ்வளவு சாராம்சமான விஷயத்தை இந்த விஷ்ணுசர்மா என்னும் பண்டிதன், அரசகுமாரர்களுக்குப் போதிக்கவேண்டிய சந்தர்ப்பத்தைக் கொடுத்த ஓர் கதையை நாம் கீழே கூறுவோம்.

மகிளாரோப்யம் என்னும் பட்டணத்திலே அமரசக்தி என்னும் மன்னன், வசித்து வந்தான். கல்வி செல்வம் கொடை எல்லாவற்றிலும் சிறந்து விளங்கக் கூடியவனாக இவன் இருந்தும், மனோவியாதி பிடித்தவனாக இருந்தான். இதற்குக் காரணம் இவனுடைய பிள்ளைகளான, பகுசக்தி, உக்கிரசக்தி, அனந்தசக்தி என்னும் மூவரும், படிப்பறிவற்ற மானிடப் பதர்களாக இருந்ததேயாம்.

ஒரு சமயம் மன்னன் இதைப்பற்றிச் சுமதி என்னும் மந்திரியிடம் கூறவே, அம்மந்திரியானவர் நல்லதோர் நாளில் அந்த அரசனது ஆஸ்தான சபையில் இருக்கின்ற ஐம்பதுக்கும் மேற்பட்ட பண்டிதர்களைச் சபை கூடச்செய்து, ''குறுகிய காலத்திலே இந்த அரசகுமாரர்களைக் கல்விமான்களாக ஆக்கவேண்டும். அதைச் செய்ய வல்லமையுள்ள பண்டிதர் முன்வாலாம்'' என்று கூறவே, விஷ்ணுசர்மா என்னும் பண்டிதர் எழுந்து ''இந்த அரசகுமாரர்களை ஆறுமாதத்திற்கிடையில், நீதிசாஸ்திரங்களைக் கற்றுணர்ந்தவர்களாக ஆக்கமுடியும்'' என்று கூறி அதற்காக இப்பஞ்சதந்திரத்தை இயற்றி அரசகுமாரர்களுக்குப் படிப்பித்து, அதில் வெற்றி கண்டான் என்று தெரிய வருகின்றது.

Introduction to Panchatantra

The Panchatantra is a work composed in sanskrit by a scholar named Vishnusarma in order to teach princes within a short space of time, the art of governing. Each story expounds some particular moral. Though to the superficial reader it seems to be a collection of stories, it is nevertheless an excellent ethical work giving briefly all the precepts necessary in the daily life of a king or pauper. But the precepts contained in it were mainly meant for prince since it speaks of the methods of forming an army and subduing rebellious kings. There is an interesting account which tells us how Vishnusarma came to expound these maxims to the princes.

There lived a king called Amarasakti in the city of Mahilaropyam. Though he lacked nothing in the way or education or wealth he was troubled by anxiety. The reason for this was that his three sons, Bahusakti, Ukrasakti and Anantasakti were uneducated louts.

Once when the king complained of this to his minister Sumati, he summoned all the learned men of the king's court, more than fifty in number, and asked whether any of them was willing to educate the princes within a short time. Then Vishnusarma came forward saying that he could educate the princes in the ethics of political science within six months. For this reason he composed and taught the princes the Panchatantra and was successful in educating them.

முகவுரை

(ருதுசம்ஹாரம்)

போஜ ராஜனுடைய ஆஸ்தான வித்வான்களுள் நவரத்தினங்கள் என்று கூறப்படும் ஒன்பது சிறந்த புலவர்களுள்ளே மிகச்சிறந்த காளிதாசன் என்னும் புலவன்தான் இந்த ருதுசம்ஹாரம் என்னும் காப்பியத்தை இயற்றியவனென்று அறியப்படுகிறது. இந்தப் புலவனவன் தனது நாயகியை நோக்கிக் கூறுவதாகவே இக்காவியம் புலப்படுகின்றது.

ருதுக்களைப் பற்றிக் கூறுகின்றபடியால் இதற்கு 'ருதுசம்ஹார' ''ருதுக்களைப் பற்றிச் சுருக்கமாகக் கூறும் காவியம்'' என்பெயர் வந்தது. வசந்தருது, கிரீஷ்மருது, வர்ஷருது, சரத்ருது, ஹேமந்தருது, சிசிரருது என ஆறு ருதுக்களாம். அவை வசந்தருது சித்திரை வைகாசி, இளவேனிற்காலம் - கிரீஷ்மருது ஆனி ஆடி, முதுவேனிற்காலம் - வர்ஷருது ஆவணி புரட்டாசி, கார்காலம் அல்லது மாரிகாலம் சரத்ருது ஐப்பசி கார்த்திகை, கூதிர் காலம் - ஹேமந்தருது மார்கழி தை, முன்பனிக்காலம் - சிசிரருது மாசி பங்குனி, பின் பனிக்காலம் எனப் பிரிக்கப்பட்டிருக்கின்றன: மேலே குறிப்பிடப்பட்டிருக்கின்ற இக்காலங்களில் மனிதர் முதல் பிராணிகளையிடையிட்டுப் புல் பூண்டுவரை நடைபெறுகின்ற இயற்கையெழிலை இன்புற நுண்ணிய ஆராய்ச்சியுடன் புலவன் எடுத்து கூறும் முறை ரசிகர்களின் உள்ளத்தைத் தொடுகின்றது. உதாரணமாக வருஷருது வர்ணனையில் மழைநீர் தெருவீதிகளில் சிறிய ஓர் நீரோடையாக வளைந்து வளைந்து ஓடுவதைக்கண்டு தவளைகளெல்லாம் தங்களது இயற்கை விரோதியான பாம்போ என்று பயந்து ஆடாது அசையாது பிரமித்து விழித்துக் கொண்டு நிற்கின்றன என்று வர்ணித்திருக்கின்றார். இதுபோன்ற நுண்ணிய கருத்துக்களை எடுத்து விபரிக்க ஆரம்பித்தால் முகவுரை விரிவுரையாக மாறிவிடும். இக்காலத்துப் பிள்ளைகளை வெய்யில் பனி முதலியவற்றில் துன்பப்படுத்தி, ரயிலிலும் காரிலும் ஏற்றி இறக்கி, நடையிலும் கடையிலும் சாப்பிடச் செய்துகொண்டு எந்த இயற்கையழகுகளைக் காண்பிப்பதற்காக ஆசிரியர்கள் தங்கள் சுயநலங்களையும் கருதாது பாடுபடுகின்றார்களோ, அவ்விஷயங்களையெல்லாம் ஏழ்மையான மாணவர்களுங்கூட தங்கள் தங்கள் வீடுகளில் இருந்தபடியே கண்டு களிக்கத் தகுந்தபடி, எழில் பொங்கக்கூறும் இக்கவியின் திறமையைச் சொல்ல ஏம்மால் ஆகுமா!

Introduction to Ramayana

When we say Ramayana everyone easily realises that it is Valmiki's Ramayana. Though the name Rama could stand for several men such as Balarama and Parasurama, in the Ramayana it denotes Rama, the son of Dasaratha, the lord of the Taraka mantra, the incarnation of Vishnu who ruled in Ayodya protecting the good and punishing the wicked, that we still speak of an ideal government as Ramarajya. This story of Rama consists of 24,000 verses and is divided into 7 sections called Balakanda, Ayodyakanda, Aranyakanda, Kiskintakanda, Sundarakanda, Yudhakanda and Uttarakanda. It is written in simple sanskrit, pleasant to both the reader and the hearer. This shows the unique skill of the poet. The Ramayana is called Adikavya as it was the first epic to be written.

The Sage Valmiki was taught the taraka mantra, the name of "Rama" by Narada. While he was repeating it in prayer he was covered by an anthill. When he came out of it he was called Valmiki. "Valmika" is an anthill. Valmiki means "he who came from an anthill". The Ramayana was composed by Valmiki at the command of Brahma and taught to his disciples Lava and Kusa. Later it was sung by Rama's sons Lava and Kusa in Rama's presence, in the hall of the horse sacrifice at Ayodya.

By studying this epic children would be able to learn the excellent morals contained in it and also of the social conditions of the people of ancient India., besides filial and brotherly love, consideration for others and many other virtues.

Short Forms

ENGLISH	SHORT FORM	TAMIL
1. Present Tense	Pre.	நிகழ்காலம்
2. Imperfect Tense	Im. t.	அநத்ய தன பூதகாலம்
3. Imperative	Imp–ve	ஏவல்
4. Potential	Pot.	வியங்கோள்
Perfect	Perft.	பரோக்ஷ பூதகாலம்
5. Re–duplicated perfect	Red–perft.	வினையடி இரட்டித்துவ ரும் பரோக்ஷபூதம்
6. Samprasarana perfect	Sam–perft.	சம்பிரசாரண பரோக்ஷ பூதம்
7. Yatva Abyasalopa perfect	Yet–perft.	யத்வ அப்யாச லோப பரோக்ஷபூதம்
8. Periphrastic perfect	Per–perft.	
9. First future or periphrastic future	1st F.	முதலாம் வருங்காலம்
10. Second future or simple future	2nd F.	இரண்டாம் வருங்காலம்
11. Third future or conditional	3rd F.	மூன்றும் வருங்காலம்
12. Benedictive or precative	Ben–ve	ஆசீர்வாத வியங்கோள்
13. Aiorist	Aio–t	மூன்றும் இறந்தகாலம்
14. Present participle	Pr–P.	நிகழ்காலப் பெயரெச்சம்
15. Past active participle	P. A. P.	இறந்தகாலப் பெயரெச்சம்
16. Future participle	F. P,	வருங்காலப் பெயரெச்சம்
17. Potential–participle	Pot. P.	செயப்பாட்டு வருங்கால பெயரெச்சம்

ENGLISH	SHORT FORM	TAMIL
18. Past passive participle	P. P. P.	இறந்தகாலச் செயப்பாட்டு பெயரெச்சம்
19. Indeclinable past participle	I. P. P.	இறந்தகால வினையெச்சம்
20. Infinitive	Infi.	வினையெச்சம்
21. Causative	Cau-ve	பிறவினை
22. Desiradative	De-ve	இச்சைப்பொருள் தாது-க்கள்
23. Locative absolute	Ly-ab.	சதி சப்தமி
24. Passive	Pas.	செயப்பாட்டுவினை
25. Tatpurusha-compound	T. C.	வேற்றுமைத் தொகை
26. Karmadharaya-compound	K. C.	பண்புத் தொகை
27. Bahuvrihi-compound	B. C.	அன்மொழித் தொகை
28. Dvandva-compound	D. C.	உம்மைத் தொகை

CONTENTS

I. Panchatantra (Mitra Bheda)

1. Splitting of sandhis
2. Splitting of compounds
3. Parsing
4. Tamil meaning for the hard words

II. Rtusamhara

(Description of the summer—28 verses
Description of the rainy season—28 verses)

1. Translation of all the verses in English and Tamil.
2. Splitting of sandhis
3. Tamil meaning in the prose order
4. Splitting of compounds
5. Parsing

III. Ramayana (Balakanda)

(3 Chapters 88+43+39=170 verses)

1. Translation of all the verses in English and Tamil
2. Splitting of sandhis
3. Splitting of compounds
4. Parsing
5. Tamil meaning of the hard words

पञ्चतन्त्रे

॥ अथ मित्रभेदः ॥

अथातः प्रारभ्यते मित्रभेदो नाम प्रथमं तन्त्रम्. यस्याय मादिमः श्लोकः-

वर्धमानो महान्स्नेहः सिंहगो वृषयोर्वने !
पिशुनेनातिलुब्धेनजम्बुकेन विनाशितः !! 1

तद्यथा अनुश्रूयते-अस्ति दक्षिणात्येजनपदे महिलारोप्यं नाम नगरम् । तत्र धर्मोपार्जित भूरीविभवो वर्धमानो नाम वणिक्पुत्रो बभूव । तस्य कदाचिद्रात्रौ शय्यारूढस्य चिन्ता समुत्पन्ना -"यत्प्रभूतेऽपि वित्तेऽर्थोपायाश्चिन्तनीयाः कर्तव्याश्चेति ।

यत उक्तञ्च —

नहि तद्विद्यते किञ्चिद्यदर्थेन न सिध्यति !
यत्नेन मतिमांस्तस्मादर्थमेकं प्रसाधयेत् !! 2
यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः !
यस्यार्थास्सपुमांलोके यस्यार्था स्सचपण्डितः !! 3
न सा विद्या न तद्दानं न तच्छिल्पं न सा कला !
न तत्स्थैर्यं हि धनिनां याचकैर्यन्न गीयते !! 4
इह लोके हि धानिनां परोऽपि स्वजनायते !
स्वजनोऽ पि दरिद्राणं सर्वेदा दुर्जनायते !! 5
अर्थेभ्यो पि हि वृद्धेभ्यः संवृत्तेभ्यस्ततस्ततः !
प्रवर्तन्ते क्रियास्सर्वाः पर्वतेभ्य इवापगाः !! 6
पूज्यते यदपूज्योपि यदगम्योपि गम्यते !
वन्द्यते यदवद्योपि स प्रभावो धनस्य च !! 7
अशनादिन्द्रियाणीव स्युः कार्याण्यखिलान्यपि !
एतस्मात्कारणाद्वित्तं सर्वसाधनमुच्यते !! 8
अर्थार्थी जीवलोकोयं श्मशानमपि सेव्यते !
त्यक्त्वा जनमितारं स्वं निःस्वं गच्छति दूरतः !! 9

Spliting of Sandhis.

अथ+अतः, मित्रभेदः+नाम, यस्य+अयम्+आदिमः, सिंहगोवृषयोः+वने, पिशुनेन+अतिलुब्धेन, तद्+यथा, विभवः वर्धमानः नाम, वणिक्पुत्रः+बभूव, प्रभूते+अपि, वित्ते+अर्थोपयाः+चिन्तनीयाः, कर्तव्याः+च+इति, उक्तम्+च किञ्चिद्+यद्+अर्थेन, मतिमान्+तस्मात्+अर्थम्+एकम्, यस्य+अर्थाः+तस्य, यस्य+अर्थाः+सः+पुमान्, सः+च+पण्डितः, तत्+शिल्पम्, याचकैः+यद्+न+गीयते, परः+अपि, स्वजनः+अपि, अर्थभ्यः+अपि, संवृत्तेभ्यः+ततस्ततः, क्रियाः+सर्वाः पर्वतेभ्यः+इव+आपगाः, अशनात्+इन्द्रियाणि+इव, कार्याणि+अखिलान्यपि, जीवलोकः+अयम्, अपूज्यः+अपि, अगम्यः+अपि, यद्+अवन्द्यः+अपि

Parsing

वर्धमान pre-P. वर्ध्. अनुश्रूयते passive present श्रु to hear with अनु. बभूव R. Perfect भू. समुत्पन्ना P.P.P. पद्+सम् उद्. चिन्तनीयाः pot. parti. उक्तम् P. P. P. प्रसाधयेत् pot III S. साध्. गीयते present III S. गा. स्वजनायते Denomi. दुर्जनायते Denomi. स्युः pot.III P. अस् उच्यते passive present. III S. वच्. सेव्यते present passive सेव् त्यक्त्वा I.P.P. त्यज्.

Spliting of Compounds.

सिंहश्च गोवृषश्च-तयोः सिंहगोवृषयोः D. C. धर्मोपार्जिताः भूरिविभवाः येन सः धर्मोपार्जितभूरिविभवः— B. C.

वणिजः पुत्रः वणिक्पुत्रः T.C.

Meaning of the heard Words.

पिशुनेन = கோள்சொல்பவன்.
जनपद = தேசம்.
विभव = செல்வம்.
संवृत्त = வளர்ச்சிபெற்ற.
आपगाः = ஆறுகள்.
अशनात् = சாப்பிடுவதனால்.

गतवयसामपि पुंसां येषामर्था भवन्ति ते तरुणाः ।
अर्थेन तु ये हीना वृद्धास्ते यौवनेऽपि स्युः ॥ 10

सचार्थः पुरुषाणां षड्भिरुपायैर्भवति- भिक्षया, नृपसेवया, कृषिकर्मणा, विद्योपार्जनेन, व्यवहारेण, वणिक्कर्मणा वा । सर्वेषामपि तेषां वाणिज्येनातिरस्कृतोऽर्थलाभः स्यात् ।
उक्तञ्च यतः—

कृताभिक्षानेकै र्वितरति नृपो नोचितमहो
कृषिः क्लिष्टा विद्या गुरुविनय वृत्त्यादिविषमा ।
कुसीदाद्दारिद्र्यं परकरगतग्रन्थिशमना
न मन्ये वाणिज्यत्किमपि परमं वर्तनमिह ॥ 11

उपायानाञ्च सर्वेषामुपायः पण्यसंग्रहः ।
धनार्थं शस्यते ह्येकः तदन्यः संशयात्मकः ॥ 12

तत्र वाणिज्यं सप्तविधमर्थागमाय स्यात्तद्यथा गांधिकव्यवहारे, निक्षेपप्रवेशो, गोष्टिककर्म, परिचितग्राहकागमो, मित्थ्याक्रयकथनं, कूटतुलामानं, देशान्तराद्भाण्डानयनञ्चेति ।
उक्तञ्च.

पण्यानां गन्धिकं पण्यं किमन्यैः काञ्चनादिभिः ।
यत्रैकेन च यत्क्रीतं तच्छतेन प्रदीयते ॥ 13

निक्षेपे पतिते हर्म्ये श्रेष्ठी स्तौति स्वदेवताम् ।
निक्षेपी म्रियते तुभ्यं यदास्याम्युपयाचितम् ॥ 14

गोष्टिक कर्मनियुक्तः श्रेष्ठी चिन्तयति चेतसा हृष्टः ।
वसुधा वसुसंपूर्णा मयाद्य लब्धा किमन्येन ॥ 15

परिचितमागच्छन्तं ग्राहकमुत्कण्ठया विलोक्यासौ ।
हृष्यति तद्धनलुब्धो यद्वत्पुत्रेण जातेन ॥ 16

Spliting of Sandhis.

गतवयसाम्+अपि, अर्थाः+भवन्ति, वृद्धाः+ते, यौवने+अपि, सः+च+अर्थः, षड्भिः+उपायैः+भवति, वाणिज्येन+अतिरस्कृतः+अर्थ, उक्तम्+च, कृता+भिक्षा+अनेकैः+वितरति, न+उचितम्, कुसीदात्+दारिद्र्यम्, शमनात्+न, उपायानाम्+च, हि+एकः, सप्तविधम्+अर्थागमाय, स्यात्+तत् यथा, भाण्डानयनम्+च+इति, यत्र+एकेन, तत्+शतेन, प्रदास्यामि+उपयाचितम्, मया+अद्य, किम्+अन्येन, विलोक्य+असौ, लुब्धः+यद्वत्

Spliting of Compounds

नृपस्य सेवया T.C. विद्यानाम् उपार्जनेन T.C. वणिजः कर्मणा T. C. न तिरस्कृतः T C. परकरगतग्रन्थीनाम् शमनात् T. C. पण्यानाम् संग्रहः T.C. संशयः आत्मा यस्य सः B.C. गान्धिकानां न्यवहारः T.C. मिथ्याक्रयस्य कथनम् T.C. भण्डानाम् आनयनम् T.C. कूटतुलया मानम् T.C. परिचितग्राहकस्य आगमः T. C. वसुना संपूर्णा T.C. तद्धने लुब्धः T.C.

Parsing

शस्यते present III S शंस्. वितरति present III S. तृ+वि. क्रीतम् P.P.P. क्री. प्रदीयते passive prest III S दा to give with प्र. वियुक्तः P. P. P. युज् to join with नि. चिन्तयति present III S चिन्त्. हृष्टः P.P.P. हृष्. लब्धा P.P.P. लभ्. विलोक्य S P.P. लोक्+वि. हृष्यति present III S हृष्.

Meaning of the heard Words

तरुणाः=இளம் வயதுடையோர். व्यवहारेण=வட்டத்தொழில். उचितम्=போதியஅளவு. क्लिष्टा=கஷ்டத்தை அளிப்பது. कुसीदात्=வட்டிவாங்குவதால். ग्रन्थि=முதல்ப்பணம். पण्यसंग्रहः=விற்றபணக்குறிய பொருளை சேகரித்தல். गान्धिकव्यवहार=மணப் பொருள் வியாபாரம் (அத்தர் முதலின) निक्षेप प्रवेश=பொன் முதலியவைகளில் முதலை ஈடுசெய்தல். गोष्ठिककर्म=கூட்டுவியாபாரம். परिचितग्राहकागम्=வாழ்க்கைக்காரர்வைத்துக்கொள்ளல்.

अन्यच्च —

पूर्णापूर्णे माने परिचितजनवञ्चनं तथा नित्यम् ।
मिथ्याक्रयस्य कथनं प्रकृतिरियं स्यात्किरातानाम् ॥ 17

अन्यच्च —

द्विगुणं त्रिगुणं वित्तं भाण्डक्रयविचक्षणाः ।
प्राप्नुवन्त्युद्यमाल्लोका दूरदेशान्तरं गताः ॥ 18

इत्येवं सम्प्रधार्य्य मथुरागामीनि भाण्डानि आदाय शुभायां तिथौ गुरुजनानुज्ञातः सुरथाधिरूढः प्रस्थितः । तस्य च मङ्गल-वृषभौ सञ्जीवकनन्दकनामानौ गृहोत्पन्नौ धूर्वोढारौ स्थितौ । तयोरेकः सञ्जीवकाभिधानो यमुनागच्छप्रवर्तीर्णः सन् पङ्कपूरमासाद्य कलित-चरणो युगभंगं विधाय निषसाद । अथ तं तदवस्थावलोक्य वर्द्धमानः परं विषादमगमत् । तदर्थं च स्नेहाद्रहृदयः क्षिरात्र प्रयाणभङ्गमकरोत् । अथ तं विषण्णमवलोक्य सार्थिकैरभिहितम् "भोः श्रेष्ठिन्! किमेवं वृषभस्य कृते सिंहव्याघ्रसमाकुले बह्वपायेऽस्मिन् वने समस्तसार्थः त्वया संदेहे नियोजितः ।
उक्तञ्च —

न स्वल्पस्य कृते भूरि नाशयेन्मतिमान्नरः ।
एतदेवात्र पाण्डित्यं यत्स्वल्पाद् भूरिरक्षणम् ॥ 19

अथासौ तदवधार्य्य सञ्जीवकस्य रक्षापुरुषान् निरूप्य अशेष-सार्थं नीत्वा प्रस्थितः । अथ रक्षापुरुषा अपि बह्वपायं तद्वनं विदित्वा सञ्जीवकं परित्यज्य पृष्टतो गत्वा अन्येद्युस्तं सार्थवाहं मिथ्या ऽऽहुः- "स्वामिन्! मृतोऽसौ सञ्जीवकोऽस्माभिस्तु सार्थ-वाहस्याभीष्ट इति मत्वा वह्निना संस्कृतः" इति । तच्छ्रुत्वा-सार्थवाहः कृतज्ञतया स्नेहार्द्र हृदयस्तस्य और्ध्वदैहिकक्रिया वृषो-त्सर्गादिकाः सर्वाश्चकार । सञ्जीवकोऽप्यायुः शेषतया यमुना-सलिलमिश्रैः शिशिरतरवातैः आप्यायितशरीरः कथञ्चिदप्युत्थाय यमुनातटमुपपेदे । तत्र मरकतसदृशानि बालतृणाग्राणि भक्षयन् कतिपयैरहोभिर्हरवृषभ इव पीनः ककुद्यान् बलवांश्च संवृत्तः । प्रत्यहं वल्मीकशिखराग्राणि शृंगाभ्यां विदारयन् गर्जमान् आस्ते ।

Spliting of Sandhis.

प्रकृतिः + इयम्, अन्यत्+च, प्राप्नुवन्ति + उद्यमात् + लोकाः, इति+एवम्+तयोः+एक·अभिधानः+युमुना, तदवस्थाम्+अवलोक्य, पङ्कपूरम् + आसाद्य, विषादम् + अगमत्, भङ्गम् + अकरोत् विषण्णाम्+अवलोक्य, सार्थिकैः+अभिहितम्, बहुपाये+अस्मिन् नाशयेत्+मतिमान्, एतद्+एव+अत्र, अथ+असौ, अन्येद्युः+तम् मित्थ्या+आहुः, मृतः+असौ, सञ्जीवकः+अस्माभिः+तु, सार्थवाः हस्य+अभीष्टः, तत्+शुत्वा, हृदयः+तस्य, सञ्जीवकः+अपि+ आयुः शेषतया, कथञ्चिदपि+उत्थाय, कतिपयैः+अहोभिः+हर वृषभः+इव, बलवान्+च

Spliting of Compounds.

परिचितजनानाम् वञ्चनम् T. C. भाण्डक्रये विचक्षणाः T. C. मधुरायाः गामीनि T. C. सञ्जीवक इति नन्दनक इति नाम ययोः तौ B. C. गृहे उत्पन्नौ T.C. धुरम् वोढारौ T. C. सञ्जीवक इति अभिधा यस्य B.C. यमुनायाः गच्छाम् T.C. कलिताः चरणा- यस्य सः B.C. सा अवस्था यस्य तम् B.C. स्नेहार्द्रं हृदयं यस्य B.C. तिसृणां रात्रीणाम् समाहारः D. C. बहवः अपयाः यास्मिन् B.C. भूरेः रक्षणम् T.C. सार्थस्य वाहः तम् T.C. वृषोत्सर्गेः आदिः यासां B.C. यमुनासलिलैः मिश्राः तैः T.C. शिशिरत रश्चासौ वातश्च K.C. आप्यायितम् शरीरम् यस्य B C. मरकतैः सदृशानी T C. बालतृणानाम् अग्राणि T.C. वल्मीक शिरवराणाम् अग्राणि T. C.

Parsing.

स्यात् pot. III S. अस् प्राप्नुवन्ति pre III S. आप् with प्र· संप्रधार्य I.P.P. धृ+सम् and प्र· आदाय I.P.P. निषसाद R.P. III S. सद् with नि· अगमत् Ao.III S. गम् to go. नियोजितः Co. P.P.P. युज् with नि· नाशयेत् pot. III S Co. नश् आहुः present III P. ब्रू to speak. चकार R. P. III S. विधारयन् present participle दार + वि·

Meaning.

भण्डानि=சாமான்கள். धूर्वोढा=பாரம்சுமப்பவை. और्ध्वदेहिकक्रिया= ஈமச்சடங்கு. वच्छ=நதிராமுள்ள ஈரமவ்பிரதேசம். सार्थवाह= வியாபாரி.

साधु चेदमुच्यते—

अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति।
जीवत्यनाथोऽपि वने विसर्जितः कृतप्रयत्नोऽपि गृहे
[विनश्यति ।; 20

अथ कदाचित् पिंगलको नाम सिंहः सर्वमृगपरिवृतः पिपासाकुल उदकपानार्थं यमुनातटमवतीर्णः सञ्जीवकस्य गम्भीरतरारवं दूरादेव अश्रृणोत्। तच्छ्रुत्वा अतीव व्याकुलहृदयः ससाध्वसमाकारं प्रच्छाद्य वटतले चतुर्मण्डलावस्थानेन अवस्थितः। चतुर्मण्डलावस्थानं त्विदम्-सिंहः, सिंहानुयायिनः काकरवाः किंवृत्ता इति। अथ तस्य करटकदमनकनामानौ द्वौ शृगालौ मन्त्रिपुत्रौ भ्रष्टाधिकारौ सदानुयायिनौ आस्ताम्। तौ च परस्परं मन्त्रयतः। तत्र दमनकोऽब्रवीत्- "भद्र करटक! अयं तावदस्मत्स्वामी पिंगलक उदकग्रहणार्थं यमुनाकच्छमवतीर्य्य स्थितः। स किंनिमित्तं पिपासाकुलोऽपि निवृत्य व्यूहरचनां विधाया दौर्मनस्येनाभिभूतोऽत्र वटतले स्थितः। करटक आह- "भद्र! किमावयोरनेन व्यापारेण।

उक्तञ्च यतः—

अव्यापारेषु व्यापारं यो नरः कर्तुमिच्छति!
स एव निधनं याति कीलोत्पाटीव वानरः॥ 21

दमनक आह— "कथमेतत्" सोऽब्रवीत्। —

कथा 1

कस्मिंश्चित् नगराभ्याशे केनापि वणिक्पुत्रेण तरुषण्डमध्ये देवतायतनम् कर्तुमारब्धम्। तत्र च ये कर्मकराः स्थपत्यादयस्ते मध्याह्नवेलायामाहारार्थं नगरमध्ये गच्छन्ति। अथ कदाचित्तत्रानुषङ्गिकं वानरयूथमितश्चेतश्च परिभ्रमन्नागतम्। तत्र एकस्य कस्यचित् शिल्पिनार्धं स्फाटितोऽञ्चन वृक्षदारुमयः स्तम्भः खदिरकीलकेन मध्यनिहितेन तिष्ठति। एतस्मिन्नन्तरे ते वानराः तरुशिखर प्रासादपृङ्गदारुपर्यन्तेषु यथेच्छया क्रीडितुमारब्धाः। एकश्च तेषां प्रत्यासन्नमृत्युः चापल्यात् तस्मिन्नर्धस्फाटितस्तम्भे उपविश्य पाणिभ्यां कीलकं संगृह्य यावदुत्पाटयितुमारेभे तावत् तस्य

च+इदम्+उच्यते , जीवति+अनाथः+अपि , कृतप्रयत्नः+अपि यमुनातटम्+अवतीर्णः दूरात्+एव , तत्+श्रुत्वा , ससाध्वसम्+आकारम् , तु+इदम् , दमनकः+अब्रवीत् , यमुनाकच्छम्+अवतीर्य , पिपासाकुलः+अपि , दौर्मनस्येन+अभिभूतः+अत्र , किम्+आवयोः+अनेन उक्तम्+च , सः+अब्रवीत् , कर्तुम्+आरब्धम् , स्थपत्यादयः+ते , कदाचित्+तत्र+आनुषङ्गिकम् , इतः+च+इतः+च , परिभ्रमन्+आगतम् , शिल्पिना + अर्धस्फाटितः + अ ,एतस्मिन् + अन्तरे एक+च , तस्मिन्+अर्धस्फाटितस्तम्भे , यावत्+उत्पाटयितुम्+आरेभे

Spliting of Compounds.

दैवेन रक्षितम् T.C. न विद्यते नाथः यस्य B C. कृत: प्रयत्नः यस्मै B C. पिपासया आकुलः T.C. सर्वमृगैः परिवृतः T C व्याकुलम् हृदयं यस्य B.C. यमुनायाः तटम् T.C. मन्त्रिणः पुत्रौ T.C. भ्रष्टः अधिकारः याभ्याम् B.C. अस्माकं स्वामी T.C. यमुनायाः कच्छम् T.C. व्यूहस्य रचना or व्यूहरूपेण रचना T C वटस्य तलम् T C. नगरस्य अभ्याशे T.C. तरुषण्यस्य मध्ये T.C अर्धं स्फाटितः T.C. खदिरमयश्च तत् कीलकं K C. मध्ये निहि तेन T. C.

Parsing.

उच्यते passive prese. III S वच् विसर्जितः P. P. P. सृज्+वि Co. अवतीर्णः P.P.P. तृ with अव. प्रच्छाद्य I.P.P. छद् with प्र. अवतीर्य I.P P. तृ with अव. निवृत्य I.P.P. वृत् with नि. निधाया I.P P. धा with नि. याति prese III S. या to go. परिभ्रमन् pr. P. भ्रम् with परि. आरब्धाः P.P. P. रभ् with आ. संगृह्य I.P.P. ग्रह with सम्. उत्पाटयितुम् Infinitive पाद्+उद् आरेभे A. perf. III S. रभ्+आ.

Meaning.

स साध्वसम्=பயத்துடன். काकरवाः=நடுத்தரவேலை ஆட்கள். किंवृत्ता (C G. D.)=இரகசியப்போலீஸ். व्यूह=அணிலகுத்து சேனைகளை அமைத்தல். स्थपति=சிற்பி.

स्तंभमध्यगतपुच्छस्य स्वस्थानात् चलितकीलकेन यद् वृत्तं तत्प्रागेव निवेदितम्। अतोऽहं ब्रवीमि "अव्यापारेषु" इति। दमनक आह तर्किं भवानाहारार्थी केवलमेव? तन्नयुक्तम्। उक्तंच—

सुहृदामुपकारकारणद्विषतामप्यपकारकारणात्।
नृपसंश्रय इष्यते बुधै र्जठरं को न बिभर्ति केवलम्॥ 22

किञ्च—

यस्मिन् जीवति जीवन्ति बहवः सोऽत्र जीवतु।
वयांसि किं न कुर्वन्ति चंच्वा स्वोदरपूरणम्॥ 23

तथा च

यज्जीव्यते क्षणमपि प्रथितं मनुष्यैः
विज्ञानशौर्यविभवार्यगुणैः समेतम्।
तन्नाम जीवितमिह प्रवदन्ति तज्ज्ञाः
काकोपि जीवति चिराय बलिञ्च भुङ्क्ते॥ 24

यो नात्मना न च परेण च बन्धुवर्गे
दीने दयां न कुरुते न च मर्त्यवर्गे।
किं तस्य जीवितफलंहि मनुष्यलोके
काकोऽपि जीवति चिराय बलिञ्च भुंक्ते॥ 25

किञ्च

सुपूरा स्यात्कुनदिका सुपूरो मूषिकाञ्जलिः।
सुसन्तुष्टः का पुरुषः स्वल्पकेनापि तुष्यति॥ 26

किञ्च

किं तेन जातु जातेन मातुर्यौवन हारिणा।
आरोहति न यः स्वस्य वंशस्याग्रे ध्वजो यथा॥ 27
परिवर्तिनि संसारे मृतः को वा न जायते।
जातस्तु गण्यते सोऽत्र यः स्फुरंश्चिश्रियाधिकः॥ 28

किञ्च

जातस्य नदीतीरे तस्यापि तृणस्य जन्म साफल्यम्।
तत्सलिल मज्जनाकुल जनहस्तालम्बनं भवति॥ 29

Spliting of Sandhis.

अतः+अहम् भवान्+आहारार्थी केवलम्+एव तत्+न+युक्तम् सुहृदाम् + उपकारकारणात् द्विषताम् + अपि + अपकारकारण बुधैः+जठरम् सः+अत्र यत्+जीव्यते तत्+नाम जीवितम्+इह काकः+अपि बलिम्+च यः+न+आत्मना किम्+च सुपूरः+मूषकाञ्जलिः स्वल्पकेन+अपि वंशस्य+अग्रे+ध्वजः+यथा कः+वा स्फुरेत्+च+श्रिया तस्य+अपि

Splitting of Compounds.

स्तम्भमध्यगतं पुच्छम् यस्य B.C. चलितच्च तत् कीलकच्च K C आहारस्य अर्थी T.C. उपकार एव कारणात् K.C. स्वस्य+उदरपूरणम् T.C. जीवितस्य+फलम् T C. कुत्सित श्चासौ पुरुषश्च K.C

Parsing.

निवेदितम् P.P.P. विद् with नि आह present III S. ब्रू to speak युक्तम् P.P.P. युज् to join. उक्तम् P.P.P. वच् to speak इष्यते Passive present III S. इच्छ् बिभर्ति present III S. भृ जीवतु Imperative III S. जीव् जीव्यते Passive present III S. जीव् प्रवदन्ति present III P. वद् with प्र भुङ्क्ते present III S. भुज् to eat गण्यते passive III S. गण् स्फुरेत् pot. III S. स्फुर्

Meaning.

पुच्छा=வால் कीलकेन=ஆப்பு (சிறிய மரத்துண்டு) जठरम्=வயிற்றற आर्यगुण=மகான்களிடமுள்ள குணம் बलि=தேவர்களுக்கும் ராணிகளுக்கும் கொடுக்கப்படும் உணவு (ராணிகளே வதம்செய்வதன்று) सुपुरा=நல்லஜலப்பெறுக்குள்ள कुनदिका=கெட்ட ஆறு कापुरुष=மடையன் हारिणा=அழிப்பவனுல் ध्वजः=கொடி हस्तालम्बन=உதவியாளன்

तथा च—

स्तिमितोन्नतसञ्चारा जनसन्तापहारिणः !
जायन्ते विरला लोके जलदा इव सज्जनाः !! 30

निरतिशयं गरिमाणं तेन जनन्याः स्मरंति विद्वांसः !
यत्कमपि वहति गर्भं महतामपि यो गुरुर्भवति !! 31

अप्रकटीकृतशक्तिः शक्रोऽपि जनस्तिरस्क्रियां लभते !
निवसन्नन्तर्दारुणि लंघ्यो वह्निर्न तु ज्वलितः !! 32

आवां तावदप्रधानौ तत्किमावयोरनेन व्यापारेण ।

उक्तञ्च—

अपृष्टोऽत्राप्रधानो यो ब्रूते राज्ञः पुरः कुधीः !
न केवलमसम्मानं लभते च विडम्बनम् !! 33

वचस्तत्र प्रयोक्तव्यं यत्रोक्तं लभते फलम् !
स्थायी भवति चात्यन्तं रागः शुक्लपटे यथा !! 34

दमनक आह— मा मा एवं वद ।
अप्रधानः प्रधान स्यात्सेवते यदि पार्थिवम् !
प्रधानोऽप्यप्रधानः स्याद्यदि सेवाविवर्जितः !! 35

यत उक्तञ्च—

आसन्नमेव नृपतिं भजते मनुष्यं विद्याविहीनमकुलीनमसंस्कृतं वा !
प्रायेण भूमिपतयः प्रमदा लताश्च यत्पार्श्वतो भवति तत्परिवेष्टयन्ति !! 36

तथा च

कोपप्रसादवस्तूनि ये विचिन्वन्ति सेवकाः !
आरोहन्ति शनैः पश्चाद् धुन्वन्तमपि पार्थिवम् !! 37

विद्यावतां महेच्छानां शिल्पविक्रमशालिनाम् !
सेवावृत्तिविदाहश्चैव नाश्रयः पार्थिवं विना !! 38

Spliting of Sandhis.

महताम्+अपि यः+गुरु+भवति शक्तः+अपि जनः+तिरस्क्रियताम् निवसन्+अन्त+दारुणि लंघ्यः+वह्निः+न तावत्+अप्रधानौ तत्+किम्+आवयोः+अनेन अपृष्टः+अत्र+अप्रधानः वचः+तत्र यत्र+उक्तम् स्यात्+सेवते प्रधानः+अपि+अप्रधानः स्यात्+यदि उक्तम्+च आसन्नम्+एव विद्याविहीनम्+अकुलीनम्+असंस्कृतम्+वा लताः+च यत्+पार्श्वतः तत्+परिवेष्टयन्ति धुन्वन्तम्+अपि विदाम्+च+एव न+आश्रयः

Splitting of Compounds

स्तिमितोन्नतः सचारः यैस्ते B.C. जनसंतापस्य हारिणः T.C. सन्तश्च ते जनाश्च K.C अप्रकटीकृता शक्तिः येनः सः B.C. न प्रधानौ अप्रधानौ N.T.C. कुत्सिता धीः यस्य स B.C. सेवया विवर्जिताः T.C. नृणाम् गतिः नृपतिः TC. विद्यया विहीनम् T.C. न कुलीनम् N.T.C न संस्कृतम् N.T.C. भुमेः पतयः T.C शिल्पविक्रमैः शालिनः न T.C सेवावृत्तेः विदाम T.C.

Meaning.

स्तिमितोन्नत=அசையாது நிமிர்ந்து **विरेलाः**=சொற்பமாக, அங்காங்கு **जलदाः**=மேகங்கள் **तिरस्क्रियाम्**=புறக்கணிப்பை **कुधीः**=கெட்டேண்ணமுள்ளவன் **विडम्बनम्**=அவமதிப்பை **स्थायी**=நிலையுள்ளதாக **शुक्लपटे**=வெள்ளைச்சேலையில் **अकुलीनम्**=நற்குலத்தில் பிறந்தவனல்ல (கெட்டகுடும்பத்தில்ப் பிறந்தவன்) **धुन्वन्तम्**=கோபிக்கின்ற

Parsing.

निवसन् pres. P: वस् with नि बूते present III S. ब्रू प्रयोक्तव्यम् pot. P. युज् उक्तम् P.P.P. वच् सेवते present III S. सेव् स्यात् pot III S. अस् विचिन्वन्ति pres III P. चि वि आरोहन्ति pre. III P. रोह आ आसन्नम् P.P.P. सद् with आ विवर्जितः P.P.P. वर्ज् with वि लंघ्यः pot P. लङ्घ्

ये जात्यादिमहोत्साहान्नरेन्द्रान्नोपयान्ति च !
तेषामामरणं भिक्षा प्रायश्चित्तं विनिर्मितम् !! 39
ये च प्राहुर्दुरात्मानो दुराराध्या महीभुजः !
प्रमादालस्यजाड्यानि ख्यापितानि निजानि तैः !! 40
सर्पान् व्याघ्रान् गजान् सिंहान् दृष्टोपायैर्वशीकृतान् !
राजेति कियती मात्रा धीमतामप्रमादिनाम् !! 41
राजानमेव संश्रित्य विद्वान् याति परां गतिम् !
विना मलयमन्यत्र चन्दनं न प्ररोहति !! 42
धवलान्यातपत्राणि वाजिनश्च मनोरमाः !
सदा मत्ताश्च मातङ्गाः प्रसन्ने सति भूपतौ !! 43

करटक आह—

"अथ भवान् किं कर्तुमनाः?" सोऽब्रवीत् "अद्य अस्मत्स्वामी पिङ्गलको भीतो भीतपरिवारश्च वर्तते। तत् एनं गत्वा भयकारणं विज्ञाय सन्धिविग्रहयानासनसंश्रयद्वैधीभावानामेकतमेन संविधास्ये"। करटक आह— "कथं वेत्ति भवान् यद्भयाविष्टोऽयं स्वामी? सोऽब्रवीत्—ज्ञेयं किमत्र।

यतः उक्तञ्च

उदीरितोऽर्थः पशुनापि गृह्यते हयाश्च नागाश्च वहन्ति चोदिताः!
अनुक्तमप्यूहति पण्डितो जनः परेङ्गितज्ञानफला हि बुद्धयः !! 44

तथा च मनुः—

आकारैरिङ्गितैर्गत्या चेष्टया भाषणेन च !
नेत्रवक्त्रविकारैश्च लक्ष्यतेऽन्तर्गतं मनः !! 45

तदहमेनं भयाकुलं प्राप्य स्वबुद्धिप्रभावेण निर्भयं कृत्वा वशीकृत्य च निजां साचिव्यपदवीं समासादयिष्यामि"। करटक आह—"अनभिज्ञो भवान् सेवाधर्मस्य। तत्कथमेनं वशीकरिष्यसि"। सोऽब्रवीत्—"कथमहं सेवाऽनभिज्ञः। मया हि तातोत्सङ्गे क्रीडता अभ्यागतसाधूनां नितिशास्त्रं पठतां यच्छ्रुतं सेवाधर्मस्य सारभूतं हृदि स्थापितम्। श्रूयतां तच्चेदम्—

Splitting of Sandhis.

महोत्साहात्+नरेद्रान् + न+उप तेषाम् + आभरणम् प्राहुः+दुरात्मानः दुष्टोपायैः+वशीकृतान् राजा+इति+राजेति धीमताम्+अप्रमादिनाम् राजानम्+एव मलयम्+अन्यत्र यवलानि+आतपत्राणि वाजिनः+च मत्ताः+च सः+अब्रवीत् पिङ्गलकः+भीतः परिवार+च सन्धि, विग्रह, यान, आसन, संश्रय, द्वैधीभावानाम्+एकत यद् + भयाविष्टः+अयम् सः+अब्रवीत् किम्+अत्र इदीरिताः+अर्थः+ पशुना+अपि हयाः+च, नागाः+च अनुक्तम्+अपि+ऊहति पण्डितः+जनः आकारैः+इङ्गितैः+गत्या विकारैः+च लक्ष्यते+ अन्तर्गतम् तद्+अद्य+एनम् सः+अब्रवीत् कथम्+अहम्+सेवा+ अनभि

Splitting of Compounds.

जात्यादिश्चासौ महोत्साहश्च K. C. नाराणाम् इद्रान् T. C. महाः भुजः महीभुजः T.C. प्रमादश्च आलस्यश्च जाड्यानिच D. C दुष्टाश्च ते उपायाश्च तैः K.C. न प्रमादिनः तेषाम् N. T. C अस्माकम् स्वामी अस्मत्स्वामी T.C. भीतः परिवारः यस्य सः B.C. भयस्य कारणम् T.C. सन्धिश्च विग्रहश्च यानञ्च आसनञ्च संश्रयश्च द्वैधीभावश्च=सन्धिविग्रहयानासनसंश्रय द्वैधीभावाः तेषाम् – सन्धि भावनाम D.C. भयेन आविष्टः भयाविष्टः T.C. परेङ्गितज्ञञ्च फलं येषां ताः B.C. नेत्रवक्त्रयोःविकाराः तैः T.C. स्वस्य बुद्धिः स्वबुद्धिः T.C. स्वबुद्धेः प्रभावः तेन T.C. न अभिज्ञः अनभिज्ञः N.T.C. तातस्य उत्सङ्के T.C. अभ्यागताश्चते साधवश्च K.C.

Parsing

विनिर्मितम् P.P.P. मा with वि and नि प्राहु present III P. from ब्रू to speek + प्र संश्रित्य I.P.P. श्रि+सम् भूपतौ प्रसन्ने L. Ab सं वि धास्ये II and Futer Ist S धा with वि सं वेत्ति present III S. विद् ज्ञेयम् pot. P. ज्ञा ऊहति present III S. ऊह क्रीडता pre. P. क्रीड् व्रज्यापयान्ति pre. III P. व्रज्या.

Meaning

अप्रमादिनाम्=தவறுதல் செய்யாதவன் सन्धि=நட்புக்கொள்ளல் विग्रह=சண்டைசெய்தல் यानम्=போரில் விரோதியைப் பிடிக்கச் செல்லல் आसन=அகழி அமைக்க ஓரிடத்தில் இருத்தல் संश्रयः= தனம்முதலியவற்றைப்பணிதல் द्वैधीभाव=இரண்டாகப்பிரித்திருத்தல் उत्सङ्ग=மடி.

सुवर्णपुष्पितां पृथ्वीं विचिन्वन्ति नरास्त्रयः !
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् !! 46

सा सेवा या प्रभुहिता ग्राह्या वाक्यविशेषतः !
आश्रयत्पर्थिवं विद्वांस्तद्द्वारेणैव नान्यथा !! 47

यो न वेत्ति गुणान् यस्य न तं सेवेत पण्डितः !
न हि तस्मात्फलं किंचित्सुकृष्टादूषरादिव !! 48

द्रव्यप्रकृतिहीनोऽपि सेव्यः सेव्यगुणान्वितः !!
भवत्याजीवनं तस्मात्फलं कालान्तरादपि !! 49

अपि स्थाणुवदासीनः शुष्यपरिगतः क्षुधा !!
नत्वेवानात्मसम्पन्नाद्वृत्तिमीहेत पण्डितः !! 50

सेवकः स्वामिनं द्वेष्टि कृपण परुषाक्षरम् !
आत्मानं किं स न द्वेष्टि सेव्यासेव्यं न वेत्तियः !! 51

यमाश्रित्य न विश्रामं क्षुधार्त्ता यान्ति सेवकाः !
सोऽर्कवन्नृपतिस्त्याज्यः सदा पुष्पफलोऽपि सन् !! 52

राजमातरि देव्यां च कुमारे मुख्यमन्त्रिणि !
पुरोहिते प्रतीहारे सदा वर्तेत राजवत् !! 53

जीवेति प्रब्रुवन् प्रोक्तः कृत्याकृत्यविचक्षणः !
करोति निर्विकल्पं यः सः भवेद्राजवल्लभः !! 54

प्रभुप्रसादजं वित्तं सुपात्रं यो निवेदयेत् !
वस्त्राद्यं च दधात्यङ्गे स भवेद्राजवल्लभः !!! 55

अन्तःपुरचरैः सार्द्धं यो न सन्धं समाचरेत् !
न कलत्रैश्चरेन्द्रस्य स भवेद्राजवल्लभः !! 56

Splitting of Sandhis.

यत्+श्रुतम् तत्+च+इदम् नरा.+नयः शूरः+च कृतविद्या+च यः+च विद्वान्+तद्वारेण+एव न+अन्यथा तस्मात्+फलम् कालान्तरात्+अपि स्थाणुवत्+आसीनः न+तु+एव+अनात्म वृत्तिम्+ईहेत यम्+आश्रित्य सः+अकेवत्+वृतिः पुष्पफलः+ अपि जीव+इति दधाति+अङ्के कलत्रैः नरेन्द्रस्य सुकृष्टात्+ ऊषरात्

Splitting of Compounds.

सेवाएव धर्मः K.C. कृता विद्या येन सः B.C. द्रव्यप्रकृत्या हीनः T.C. सेव्यगुणैः अन्वितः T.C. परुषाणी अक्षराणि यस्य B.C. सेव्यश्च असेव्यश्च तयोः समाहारः सेव्यासेव्यम् D.C. क्षुधा आर्तः T.C. मुख्यश्चासौ मन्त्री च K!C. कृत्याकृत्येषु विचक्षणः T.C. नराणाम् इन्द्रः T.C.

Parsing

पठताम् pre. P. from. पठ् to study श्रुतम् P.P.P. from श्रु to bear. जानाति pre. III S. ज्ञा to Know. ग्राह्याः pot. P. ग्रह to Know. आश्रयेत् pot. III S. श्रि to reach सेवेत pot. III S. सेव् + आ to serve. आसीनः pre. P. आस् to sit. शुश्रूषन् pre. P. शुश्रूष् ईहेत pot, III S. ईह् to desire द्वेष्टि pre. III S. द्विष् आश्रित्य I.P.P. श्री with आ त्याज्यः pot. P. त्यज् सन् pre. P. अस् वर्तेत pot. III S. वर्त् जीव Imperative II S. प्रबुवन् present. P. ब्रू with प्र प्रोक्तः P.P.P. वच् with प्र भवेत् pot. III S. भू निवेदयेत् pot. III S. विद् with नि समाचरेत् pot. III S. चर् + सम् + आ

Meaning.

सुवर्णपुष्पिताम्=தங்கம் சொழிக்கின்ற कृतविद्यः=படித்தவன் ऊषरात्=மலட்டுநிலம் (வினைச்சலுக்குத்தகுதியற்ற) वृत्तिम्=உத்தி யோகத்தை क्षुधा=பசி सेव्यासेव्य=நன்கு சேவைசெய்பவன், சே வைசெய்யாதவன். कृत्याकृत्य=செய்யவேண்டியது செய்யத்தகா தது निर्विकल्पम्=வேற்றுமை இன்றி वित्तम्=பணம் सुप्राप्तम्=நன் கு வெகுமதியாகப்பெறப்பட்ட साधम्=கூட कलत्रैः=மனைவிகளு டன்.

द्यूतं यः यमदूताभं हालां हालाहलोपमाम् !
पश्येदारान्वृथाकारान्स भवेद्राजवल्लभः ॥ 57

युद्धकालेऽग्रती यः स्यात्सदा पृष्टानुगः पुरे !
प्रमोदोद्गीरिश्रितो हर्म्ये स भवेद्राजवल्लभः ॥ 58

संमतोऽहं विभोर्नित्यमिति मध्वा व्यतिक्रमेत् !
कृच्छ्रेष्वपि न मर्यादां स भवेद्राजवल्लभः ॥ 59

द्वेषिद्वेषपरो नित्यमिष्टानामिष्टकर्मकृत् !
यो नरो नरनाथस्य स भवेद्राजवल्लभः ॥ 60

प्रोक्तः प्रत्युत्तरं नाह विरुद्धम् प्रभुणा च यः !
न समीपे हसत्युच्चैः स भवेद्राजवल्लभः ॥ 61

यो रणं शरणं तद्वन्मन्यते भयवर्जितः !
प्रवासं स्वपुरावासं स भवेद्राजवल्लभः ॥ 62

न कुर्य्यान्नरनाथस्य योषिद्भिः सह सङ्गतिम् !
न निन्दां न विवादं च स भवेद्राजवल्लभः ॥ 63

करटक आह— "अथ भवान तत्र गत्वा किं तावत् प्रथमं वक्ष्यति तत् तावदुच्यताम् ?"

दमनक आह—

उत्तरादुत्तरं वाक्यं वदतः सम्प्रजायते !
सुवृष्टिगुणसम्पन्नाद् बिजाद् बीजमिवापरम् ॥ 64

अपायसन्दर्शनजां विरक्तिमुपायसन्दर्शनजां च सिद्धिम् !
मेधाविनो नीतिगुणप्रयुक्तां पुरःस्फुरन्तीमिव वर्णयन्ति ॥ 65

एकेषां वाचि शुकवदन्येषां हृदि मूकवत् !
हृदि वाचि तथाऽन्येषां न सुवर्णगन्ति सूक्तयः ॥ 66

न च अहमप्राप्तकालं वदये । आकर्णितं मया नीतिसारं पितुः

Splitting of Sandhis.

पश्येत्+दारान्+वृथाकारान् भवेत्+राजवल्लभः युद्धकाले+अग्रतः प्रभोः+द्वाराश्रितः संमतः+अहम् विभो+नित्यम्+इति कृच्छ्रेषु+अपि नित्यम्+इष्टानाम्+इष्टकर्म न+आह हसति+उच्चैः कुर्यात्+नरनाथस्य तावत्+उच्यताम् बीजात्+बीजम्+इव+अस्फुरन्तीम् + इव शुकवत् + अन्येषाम् तथा + अन्येषाम् अहम् + अप्राप्तकालम्

Splitting of Compounds.

यमदूतस्य अभेव अभा यस्य B.C. हलाहलेन उपमा यस्याः B.C. राज्ञः वल्लभः T.C. पृष्ठस्य अनुगः T.C. द्वारम् आश्रितः T.C. इष्टकर्मणाम् कृत T.C. नराणाम् नाथः T.B. भयेन वर्जितः T.C. सुवृष्टिगुणैः संयुक्तात् T.C. अपायसंदर्शनात् जाम् T.C. उपाय संदर्शनात् जाम् T.C. न प्राप्तकालम् T.C. नीतीनां सारम् T.C.

Parsing.

पश्येत् pot. III S from दृश् to see. स्यात् pot. III S. from अस् to he. मत्वा I.P.P. fro ı मन् to theise. प्रोक्तः P.P.P. from वच् with प्र हसति present. III S. from हस to smill. मन्यते present. III S. मन् to theise. भवेत् pot III S. from भू to he. कुर्यात् pot III S. from कृ to do. वक्ष्यति II nd Future III S. वच् to speak. उच्यताम् Imperative passive III d. S. वच् to speak. वदताम् pre. P. वद् to speak. स्फुरन्तीम् pre. P. स्फुर् to throule. वक्ष्ये II nd Future. from वच् to speak. आकर्णितम् P.P.P. कर्ण् with आ. व्यतिक्रमेत् pot. III S. क्रम् + वि + अति.

Meaning.

हलाहल=ஆலகாலவிடம் राजवल्लभः=ராஜாவன்பன் पृष्ठानुगः=வால் பிடிப்பவன் कृच्छ्रेषु=கஷ்டகாலத்திலும் கஷ்டமான நிலையிலும் क्षेपिन्=வீசாதி प्रवासम्=வெளிநாட்டில்த் தங்குதல் मेधाविनः=அறிவாளிகள் मूकवत्=ஊமைபோல बलगु=அழகாக वलगन्ति=தோன்றுகின்றன.

पूर्वमुत्सङ्गं हि निषेवता ।

अप्राप्तकालं वचनं बृहस्पतिरपि ब्रुवन् ।
लभते बह्ववज्ञानमपमानं च पुष्कलम् ॥ 67

करटक आह—

"दुराराध्य हि राजानः पर्वता इव सर्वदा ।
व्यालाकीर्णाः सुदुर्गमाः कठिना दुष्टसेविताः ॥ 68

तथा च—

भोगिनः कञ्चुकाविष्टाः कुटिलाः क्रूरचेष्टिताः ।
सुदुष्टा मन्त्रसाध्याश्च राजानः पन्नगा इव ॥ 69

द्विजिह्वाः क्रूरकर्माणोऽनिष्टानिच्छद्रानुसारिणः ।
दूरतोऽपि हि पश्यन्ति राजानो भुजगा इव ॥ 70

स्वल्पमप्यपकुर्वन्ति येऽभिष्टा हि महीपतेः ।
ते वह्निविव दह्यन्ते पतङ्गाः पापचेतसः ॥ 71

दुरारोहं पदं राज्ञां सर्वलोकनमस्कृतम् ।
स्वल्पेनाप्यपकारेण ब्राह्मण्यमिव दुष्यति ॥ 72

दुराराध्याः श्रियो राज्ञां दुरापा दुष्परिग्रहाः ।
तिष्ठन्त्यापि इवाधारे चिरमात्मानि संस्थिताः ॥ 73

दमनक आह. "सत्यमेतत्परं किन्तु—

यस्य यस्य हि यो भावस्तेन तेन समाचरेत् ।
अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत् ॥ 74

भर्तुश्चित्तानुवर्तित्वं सुवृत्तं चानुजीविनाम् ।
राक्षसाश्चापि गृह्यन्ते नित्यं छन्दानुवर्तिभिः ॥ 75

सरुषि नृपे स्तुतिवचनं तदभिमते प्रेम तद्विद्विषि द्वेषः ।
तद्दानस्य च शंसा अमन्त्रतन्त्रं वशीकरणम् ॥ 76

करटक आह—

"यद्येवमभिमतं तर्हि शिवास्ते पन्थानः सन्तु ।

Spliting of Sandhis.

पूर्वम् + उत्सङ्गम् बृहस्पतिः + अपि बहु + अवज्ञानम् + अपमानम् मन्त्रसाध्याः + च पन्नगाः + इव क्रूरकर्मणः + अनिष्टाः दूरतः + अपि राजानः + भुजगाः + इव स्वल्पम् + अपि + अपकुर्वन्ति ये + अभीष्टाः वह्नौ + इव स्वल्पेन + अपि + अपकारेण ब्राह्मणम् + इव श्रियः + राज्ञाम् तिष्ठन्ति + आपः + इव + आधारे भावः + तेन भर्तुः + चित्तानुवर्तित्वम् च + अनुजीविनाम् राक्षसाः + च + अपि यदि + एवम् + अभिमतम् शिवाः + ते

Splitting of Compounds.

अप्राप्तः कालः यस्य तत् = अप्राप्तकालम् = (Ad) B.C. N. B இது உரிச்சொல். இதற்கு முன்பக்கத்திலுள்ளது (Adverb) கவனிக்கவும் —

दुःखेनापि आरधयितुम् अशक्याः-दुराराध्याः व्यलैः आकीर्णाः T.C. दुष्टैः से+विताः T.C. कञ्चुकेषु आविष्टाः T. C. क्रूरमूचेष्टितं येषांते क्रूरचेष्टिताः B. C. मन्त्रैः साध्याः T. C. द्विजिह्व षांते B. C. क्रूराणि कर्माणि येषांते B.C. छिद्रस्य अनुसारिण T. C. पापम् चेत येषां ते B. C. सर्वलोकैः नमस्कृतम् T.C. चित्तस्य अनुवर्तित्वम् T. C. अनु जीवन्तीतितेषाम् छन्दम् अनुवर्तिनः तैः T. C.

Parsing.

ब्रुवन् present. P. ब्रू to speak. अभिष्टाः P P.P. इष् with अभि दह्यन्ते present III P. दह् to burn. संस्थिताः P.P.P स्था with सम् (Active) आह present. III S. ब्रू to speak. समाचरेत् pot. III S चर् with सम्. अनुविश्य I. P. P [illegible] with अनु [illegible] p. III S ब्रू to ea l. गृह्यन्ते es nt III P. ग्रह् to ca ch. सन्तु Imperative III P. अस् to be.

Meaning.

अप्राप्तकालम्=காலத்திற்கு ஒவ்வாத पुष्कलम्=அதிகம் व्याल=துஷ்டமிருகம் भोगिनः=பாம்புகள் कञ्चुक=பாம்புச் சட்டை, சட்டை कुटिलाः=வளைந்தவைகள், கபடமுள்ளவர் द्विजिह्वाः=பாம்புகள் கோள்சொல்பவர் पतङ्गाः=விளக்கு விட்டில்ப் பூச்சி सरुषि=கோபமுள்ள,

यथाभिलषितमनुष्ठीयताम्" । सोऽपि प्रणम्य पिङ्गलकाभिमुखं प्रतस्थे । अथ आगच्छन्तं दमनकमालोक्य पिङ्गलकोऽद्वाःस्थमब्रवीत् । "अपसार्यतां वेत्रलता । अथमस्माकं चिरन्तनो मन्त्रि पुत्रो दमनकोऽभ्याहतप्रवेशः । तत्प्रवेश्यतां द्वितीयमण्डलभागी" इति । स आह- "यथा आवादीत् भवान्" इति । अथोपसृत्य दमनको निर्दिष्टे आसने पिङ्गलकं प्रणम्य प्राप्तानुज्ञ उपविष्टः । स तु तस्य नखकुलिशालंकृतं दक्षिणपाणिमुपरि दत्वा मानपुरःसरमुवाच— "अपि शिवं भवतः ? कस्माच्चिराद् दृष्टोऽसि ? दमनक आह— "न किञ्चिदेवपादानामस्माभिः प्रयोजनम् । परं भवतां प्राप्तकालं वक्तव्यं यत उत्तममध्यमाधमैः सर्वैरपि राज्ञां प्रयोजनम् । उक्तञ्च—

दन्तस्य निष्कोषणकेन नित्यं कर्णस्य कण्डूयनकेन वापि !
तृणेन कार्यं भवतीश्वराणां किमङ्गवाग्धस्तवता नरेण !! 77

तथा वयं देवपादानामन्वयागता भृत्या आपत्स्वपि पृष्ठगामिनो यद्यपि स्वमधिकारं न लभामहे । तथापि देवपादानामेतत् युक्तं न भवति । उक्तञ्च—

स्थानेष्वेव नियोक्तव्या भृत्याश्चाभरणानि च !
नहि चूडामणिः पादे प्रभवामीति बध्यते !! 78

यतः—

अनभिज्ञो गुणानां यो न भृत्यैरनुगम्यते !
धनाढ्योऽपि कुलीनोऽपि कृपणतोऽपि भूपतिः !! 79

उक्तञ्च—

असमैः समीयमानः समैश्च परिहीयमानसत्कारः !
धुरि यो न युज्यमानस्तमिमं त्यजति भृत्यः !! 80

यच्च अविवेकितया राजा भृत्यानुत्तमादयोग्यान् हीनाधमस्थाने नियोजयति न ते तत्रैव तिष्ठन्ति न भुवस्तेषां दोषो न तेषाम् ।

उक्तञ्च—

कनकभूषणसंग्रहणोचितो यदि मणिस्त्रपुणि प्रतिबध्यते !
न स विरौतिनचापि स शोभते भवति योजयितुर्वचनीयता !!

यच्च स्वामि एवं वदति—"चिराद्दृश्यते" तदपि श्रूयताम् ।

Splitting of Sandhis.

अभिलषितम्+अनुष्ठीयताम् सः+अपि दमनकम्+अवलोक्य पिङ्गलकः+द्वाःस्थम्+अब्र अयम्+अस्माकम् दमनकः+अव्याहत-प्रवेशः अथ+उपसृत्य मानपुरःसरम्+उवाच कस्मात्+चिरात् दृष्टः+असि किञ्चित्+देवपादानाम्+अस्मा सर्वैः+अपि भवति+ईश्वरणाम् देवपादानाम्+अन्वयाग आपत्सु+अपि गामिनः+यद्यपि देवपादानाम्+एतत् स्थानेषु+एव भृत्या च+आभरणानि प्रभवामि+इति भृत्यैः+अनुगम्यते धनाद्यः+अपि कुलीनः+अपि आयातः+अपि समैः+च युज्यमानः+ब्रिभिः+अर्थ यत्+च = यच्च यः+च =यश्च भूपतेः+दोषः मणि+त्रिपुणि योजयितुः+वचनीयता चिरात्+दृश्यते

Splitting of Compounds

पिङ्गलकस्य अभिमुखम् T.C. मन्त्रिणः पुत्रः मन्त्रिपुत्रः T. C. अव्याहतः प्रवेशः यस्य सः B.C. द्वितीयमण्डलस्य भागी T. C. प्राप्तः कालः यस्मिन् कर्मणितत् नखकुलिशेन अलङ्कृतम् T. C. अन्वयेन आगताः T. C. न अभिज्ञः अनभिज्ञः N. T. C. धनैः आद्यः धनाद्यः T. C. कनकभूषणसंग्रहणस्य उचित T. C.

Parsing.

अनुष्ठीयताम् Imperative III S. passive with अनुस्था प्रणम्य I.P.P. नम् with प्र प्रतस्थे R.P III S. स्था with प्र आगच्छन्तम् pr. P. गम with आ अपसार्यताम् Imperative III S. co. सृ with अप प्रवेश्यताम् pass Imperative III S. विश् with प्र अवादीत् A. III S. वद् to speak निर्दिष्टे P.P.P. दिश् with निर् उपविष्टः P.P.P. विश् with उप उवाच S. P. III S. वच् to speek. दृष्टः P.P.P. दृश् to see. वक्तव्यम् pot. P. वच् to speak. लभामहे present I.P. लभ् युक्तम् P.P.P. युज् to Join. नियोक्तव्या pot. P. युज् with नि वध्यते passive III S. बन्ध् to cry. विरौति present.

निष्कोणजकेन=குத்துவது (நோண்டுதல்) त्रिपुणि=சமத்தில்.

सव्यदक्षिणयोर्यत्र विशेषो नास्ती हस्तयोः ।
कस्तत्र क्षणभप्यार्यो नियमानगतिंवसेत् ॥ 82

काचे मणिर्मणौ काचो येषां बुद्धिर्विकल्प्यते ।
न तेषां सन्निधौ भृत्यो नाथमात्रोऽपि तिष्ठति ॥ 83

परीक्षका यत्र न सन्ति देशे नार्पयन्ति रत्नानि समुद्रजानी ।
अभीरदेशे किल चन्द्रकान्तं त्रिभिर्वराटैर्विपणन्ति गोपा ॥ 84

लोहिताख्यस्य च मणेः पद्मरागस्य चान्तरम् ।
यत्र नास्ति कथं तत्र क्रियते रत्नविक्रयः ॥ 85

निर्विशेषं यदा स्वामी समं भृत्येषु वर्तते ।
तत्रोद्यमसमर्थानामुत्साहः परिहीयते ॥ 86

न विना पार्थिवो भृत्यैर्न भृत्याः पार्थिवं विना ।
तेषां च व्यवहारोऽयं परस्परनिबन्धनः ॥ 87

भृत्यैर्विना स्वयं राजा लोकानुग्रहकारिभिः ।
मयूखैरिव दीप्तांशुस्तेजस्व्यपि न शोभते ॥ 88

अरैः सन्धार्यते नाभिर्नाभौ चाराः प्रतिष्ठिताः ।
स्वामिसेवकयोरेवं वृत्तिचक्रं प्रवर्तते ॥ 98

शिरसा विधृता नित्यं स्नेहेन परिपालिताः ।
केशा अपि विरज्यन्ते निःस्नेहाः किं न सेवकाः ॥ 90

राजा तुष्टो हि भृत्यानामर्थमात्रं प्रयच्छति ।
ते तु सम्मानमात्रेण प्राणैरप्युपकुर्वते ॥ 91

एवं ज्ञात्वा नरेन्द्रेण भृत्याः कार्या विचक्षणाः ।
कुलीनाः शौर्यसंयुक्ताः शक्ता भक्ताः क्रमागताः ॥ 92

Splitting of Sandhis.

सव्यदक्षिणयो + यत्र न + अस्ति कः + तत्र क्षणम् + अपि + आर्यः गतिः + वसेत् मणिः + मणौ बुद्धिः + विकल्पते नाममात्रः + अपि न + अर्धन्ति त्रिमिः वराटैः + च + अन्तरम् न + अस्ति तत्र + उद्यमसमर्थाः + अम + उत्साः भृत्यैः न व्यवहारः + अयम् भृत्यैः विना मयूखैः इव तेजस्वी + अपि नाभिः नाभौ सेवकयोः एवम् भृत्यनाम् + अर्थमात्रम् प्राणैः + अपि + उपकुर्वते च + अराः

Splitting of Compounds.

सव्यश्चदक्षिणश्च तयोः D.C. विद्यमाना गतिः यस्य B.C. समुद्रे जाति T.C. लोहितं इति अख्या यस्य B.C. उद्यमे समर्थाः तेषाम् T.C. परस्परं निबन्धनं यस्य B.C. लोकानाम् अनुग्रहकारिणः ते T.C. स्वामी च सेवकश्च तयोः D.C. वृत्तिरेव चक्रम् वृत्तिचक्रम् K.C. रत्नानां विक्रयः T.C. निर्गतः स्नेहः येभ्यः B.C. अर्थमेव अर्थमात्रम् सम्मानमेव = सम्मानमात्रम् शौर्येण संयुक्ताः शौर्यसंयुक्ताः T.C.

Parsing.

वसेत् pot. III S. वस् विकल्पते pre. III S. कृप् + वि अर्धान्ति pre III P. अर्ध् विगणन्ति pre. III P. गण् with वि क्रियते passive III S. कृ to do. परिहीयते passive III S. हा + परि शोभते pre. III S. शोभ् सन्धार्यते pre. passive III S. धृ प्रतिष्ठिताः P.P.P. स्था with प्रति विधृताः P.P.P. धृ with वि विरज्यन्ते pre. III P. रञ्ज् + वि तुष्टः P.P.P. तुष् प्रयच्छति pre. III S. दा (यच्छ) प्र उपकुर्वते pre. III P. कृ with उप ज्ञात्वा I.P.P. ज्ञा

Meaning.

अर्धन्ति = தக்கவிலையைப் பெருகின்றன आभीरदेशे = இடச்சேரியில் संधार्यते = நன்கு கவ்விப் பிடித்துக்கொண்டுள்ளது नाभिः = வண்டிச்சில்லின்குடம் अराः = சில்லின் 12 ஆரக்கட்டைகள், சில்லின் குடுக்குக்கட்டைகள் विरज्यन्ते = வெருக்கின்றன स्नेह என்ணெ அன்பு विचक्षणाः = அறிவாளிகள்.

यः कृत्वा सुकृतं राज्ञो दुष्करं हितमुत्तमम् ।
लज्जया वक्ति नो किञ्चित्तेन राजा सहायवान् ॥ 93

यस्मिन् कृत्यं समावेश्य निर्विशङ्केन चेतसा ।
आस्यते सेवकः स स्यात्कलत्रमिव चापरम् ॥ 94

योऽनाहूतः समभ्येति द्वारि तिष्ठति सर्वदा ।
पृष्टः सत्यं मितं ब्रूते स भृत्योऽर्हो महीभुजाम् ॥ 95

अनादिष्टोऽपि भूपस्य दृष्ट्वा हानिकरं च यः ।
यतते तस्य नाशाय स भृत्योऽर्हो महीभुजाम् ॥ 96

ताडितोऽपि दुरुक्तोऽपि दण्डितोऽपि महीभुजा ।
यो न चिन्तयते पापं स भृत्योऽर्हो महीभुजाम् ॥ 97

न गर्वं कुरुते माने नापमाने च तप्यते ।
स्वाकारं रक्षयेद्यस्तु स भृत्योऽर्हो महीभुजाम् ॥ 98

न क्षुधा पीड्यते यस्तु निद्रया न कदाचन ।
न च शीतातपाद्यैश्च स भृत्योऽर्हो महीभुजाम् ॥ 99

श्रुत्वा सांग्रामिकीं वार्तां भविष्यां स्वामिनं प्रति ।
प्रसन्नास्यो भवेद्यस्तु स भृत्योऽर्हो महीभुजाम् ॥ 100

सोमावृद्धिं समायाति शुक्लपक्ष इवोडुराट् ।
नियोगसंस्थिते यस्मिन् स भृत्योऽर्हो महीभुजाम् ॥ 101

सीमा सङ्कोचमायाति वह्नौ चर्म इवाहितम् ।
स्थिते यास्मिन्स तु त्याज्यो भृत्यो राज्यं समीहता ॥ 102

तथा शृगालोऽयमिति मन्यमानेन स्वामिना यदि ममोपरि अवज्ञा क्रियते तदपि अयुक्तम् ।

Splitting of Sandhis

राज्ञः+दुष्करम् हितम्÷उत्तमम् स्यात्+कलत्रम्+इव च+अपरम् यः+अनाहूतः 'भृत्यः+अर्हः अनादिष्टः+अपि ताडितः+अपि दुरुक्तः+अपि दण्डितः+अपि न+अपमाने रक्षयेत्+यः+तु शीतातपार्द्यै+च भवेत्+यः+तु इव+उडुराट् सङ्कोचम्+आयाति इव+आहितम् यद्भिन्+सः+तु शृगालः+अयम्+इति त्याज्यः+ भृत्यः मम+उपरि

Splitting of Compounds.

महाः भुजः तेषां T. C. शीतातपौ अदी येषांतैः B. C. प्रसन्नम् आस्यम् यस्य B.C. उडूनाम् राट् T.C नियोगे संस्थितः T.C.

Parsing.

कृत्वा I.P.P. कृ वक्ति present III S. वच् समावेश्य I P.P. विश् with सम्+आ आस्यते present passive आस् स्यात् pot. III S अस् आहूतः P P.P. ह्वे with आ पृष्टः P.P P. पृच्छ् ब्रूते pre. III S. ब्रू to speak. दृष्ट्वा I P.P दृश् to see. यतते present III S. यत् to strive. ताडितः P. P. P. ताड् दण्डितः P.P.P. दण्ड् अनादिष्टः P P.P. दिश् तप्यते present III S. तप् रक्षयेत् co. po. III S रक्ष् पीड्यते passive present III पीड् श्रुत्वा I.P.P. श्रु भवेत् pot. III S. भव् समायाति present III S. या to go with सम्आ. आयाति present III S. या+आ त्याज्यः pot. P. त्याज्

Meaning.

सुकृतम्=புண்ணியம் कृत्यम्=செய்யவேண்டிய காரியம் कलत्रम्=மனைவி मितम्=அளவாக स्वाकारम्=தன்மதிப்பை क्षुधा=பசி सीमावृद्धिम्=வரம்பு உயருதல்.

उक्तं च यतः—

कौशेयं कृमिजं सुवर्णमुपलाद् दूर्वापि गोरोमतः
पङ्कात्तामरसं शशाङ्क उदधेरिन्दीवरं गोमयात् ।
काष्ठादग्निरहेः फणादपि मणिर्गोपित्ततो रोचना
प्राकाश्यं स्वगुणोदयेन गुणिनो गच्छन्ति किं जन्मना ॥ 103

मूषिका गृहजातापि हन्तव्या स्वापकारिणी ।
भक्ष्यप्रदानैर्मार्जारो हितकृत्प्रार्थ्यते जनैः ॥ 104

एरण्डभिण्डार्कनडैः प्रभूतैरपि सञ्चितैः ।
दारुकृत्यं यथा नास्ति तथैवाज्ञैः प्रयोजनम् ॥ 105

किं भक्तेनासमर्थेन किं शक्तेनापकारिणा ।
भक्तं शक्तं च मां राजन् नावज्ञातुं त्वमर्हसि ॥ 106

पिंगलक आह— "भवतु एवं तावत् । असमर्थः समर्थो वा चिरन्तनः त्वमस्माकं मन्त्रिपुत्रः तद्विश्रब्धं ब्रूहि यत् किंचिद्वक्तुकामः" । दमनक आह— "देव! विज्ञाप्यं किञ्चिदस्ति" । पिङ्गलक आह— "तन्निवेदय अभिप्रेतम्" । सोऽब्रवीत्—

"अपि स्वल्पतरं कार्यं यद्भवेत्पृथिवीपतेः ।
तन्न वाच्यं सभामध्ये प्रोवाचेदं बृहस्पतिः ॥ 107

तत् एकान्तिके मद्विज्ञाप्यमाकर्णयन्तु देवपादाः ।

यतः—

षट्कर्णो भिद्यते मन्त्रश्चतुष्कर्णः स्थिरो भवेत् ।
तस्मात्सर्वप्रयत्नेन षट्कर्णं वर्जयेत्सुधीः ॥ 108

अथ पिंगलकाभिप्रायज्ञा व्याघ्रद्वीपिवृकपुरःसराः सर्वेऽपि तद्वचः समाकर्ण्य संसदि तत्क्षणादेव दूरिभूताः । ततश्च दमनक आह— "उदकग्रहणार्थं प्रवृत्तस्य स्वामिनः किमिह निवृत्यावस्थानम्" । पिंगलक आह— (सविलक्षस्मितं) "न किञ्चिदपि" । सोऽब्रवीत् । "देव! यदि अनाख्येयं तत्तिष्ठतु ।

Splitting of Sandhis

सुवर्णम्+उपलात् दूर्वा+अपि पङ्कात्+तामरसम् उदधेः+इन्दीवरम् काष्ठात्+अग्निः+अहेः फणात्+अपि मणिः+गोपित्ततः गृहजाता+अपि प्रदानैः+मार्जारः प्रभूतै+अपि न+अस्ति तया+एव+अज्ञैः भक्तेन+असमर्थेन शक्तेन+अपकारिणा न+अवज्ञातुम् त्वम्+अर्हसि समर्थः+वा त्वम्+अस्माकम् तद्+विश्रब्धम् किञ्चित्+अस्ति तत्+निवेदय सः+अब्रवीत् यद्+भवेत्+पृथिवीपतेः तत्+न प्रोवाच+इदम् मद्विज्ञाप्यम्+आकर्णयन्तु मन्त्रः+चतुष्कर्णः स्थिरः+भवेत् तस्मात्+सर्वप्रयत्नेन वर्जयेत्+सुधीः सर्वे+अपि तत्क्षणाद्+एव ततः+च दमनक+आह किम्+इह निवृत्य+अवस्थानम् तत्+तिष्ठतु

Splitting of Compounds

गृहे जाता गृहजाता T·C· भक्ष्याणाम् प्रदानम् तैः T·C· एरण्डश्च भिण्डश्च अर्कश्च नडश्च D·C· दारुणः कृत्यम् T·C· न समर्थः असमर्थः तेन T·C· पृथिव्याः पतिः T·C· सभायाः मध्ये T·C· मया विज्ञाप्यम् मद्विज्ञाप्यम् T·C· षट् कर्णाः यस्य सः B·C· चत्वारः कर्णाः यस्य सः B·C· पिङ्गलकस्य अभिप्रायः तस्य ज्ञा· T·C· व्याघ्रद्वीपवृकाः पुरःसराः येषाम् B·C· तस्य वचः T·C·

Parsing.

उक्तम् P·P·P· वच् हन्तव्या po. P. हन् प्रार्थ्यते passive III S· अर्थ्+प्र अवज्ञातुम् Infinitive ज्ञा with अव· अर्हसि pre· II S· अर्ह ब्रूहि Imperative II S· ब्रू निवेदय Imper. II S. विद् अभिप्रेतम् P·P·P· इ to go with अभि+प्र वाच्यम् pot· P· वच् आकर्णयन्तु Imperative III P· कर्ण् with आ भिद्यते pass. III S· भिद् वर्जयेत् pot· III S· वर्ज् समाकर्ण्य I·P·P. कर्ण् with सम् and आ· अनाख्येय po· P· चक्ष् to speak·

Meaning

कौशिकम् = பட்டு दूर्वा = அருகம் புல் एरण्ड, पिण्ड, अर्क, नड = ஏரண்டம், பிண்டம், எருக்கம், (பலவும் ஒரு காட்டுச் செடிகள்)

उक्तञ्च—

दारेषु किञ्चित्स्वजनेषु किञ्चिद्गोप्यं वयस्येषु सुतेषु किञ्चित्।
युक्तं न वा युक्तमिदं विचिन्त्य वदेद्विवक्षुन्महतोऽनुरोधात्॥ 109

तच्छ्रुत्वा पिंगलकश्चिन्तयामास—"योग्योयं दृश्यते। तत् कथयामि एतस्य अग्रे आत्मनोऽभिप्रायम्।

उक्तञ्च—

सुहृदि निरन्तरचित्ते गुणवति भृत्येऽनुवर्तिनि कलत्रे।
स्वामिनि सौहृदयुक्ते निवेद्य दुःखं सुखी भवति॥ 110

भो दमनक शृणोषि शब्द द्वरात् महान्तम्? सोऽब्रवीत् स्वामिन्! शृणोमि, ततः किम्?"। पिंगलक आह—भद्र! अहमस्मात् वनात् गन्तुमिच्छामि"। दमनक आह—"कस्मात्"?। पिंगलक आह—"यतोऽद्य अस्मद्वने किमपि अपूर्वं सत्वं प्रविष्टं यस्य अयं महाशब्दः श्रूयते। तस्य च शब्दानुरूपेण पराक्रमेण भाव्यमिति"। दमनक आह यत् शब्दमात्रादपि भवमुपगतः स्वामी तदपि अयुक्तम्।

उक्तञ्च—

अम्भसा भिद्यते सेतुस्तथा मन्त्रोऽप्यरक्षितः।
पैशुन्याद्भिद्यते स्नेहो भिद्यते वाग्भिरातुरः॥ 111

तन्न युक्तम् स्वामिनः पूर्वोपार्जितं वनं त्यक्तुं। यतो भेरिवेणु-वीणामृदङ्गतालपटहशंखकाहलदिभेदेन शब्दा अनेकविधा भवन्ति। तत् न केवलात् शब्दमात्रादपि भेतव्यम्।

उक्तञ्च—

अत्युत्कटे च रौद्रे च शत्रौ प्राप्ते न हीयते।
धैर्यं यस्य महीनाथ न स याति पराभवम्॥ 112

दर्शितभयेऽपि धातरि धैर्यध्वंसो भवेन्न धीराणाम्।
शोषितसरसि निदाघे नितरामेवोद्धतः सिन्धुः॥ 113

तथा च—

यस्य न विषादि विषादः सम्पदि हर्षो रणे न भीरुत्वम्।
तं भुवनत्रयतिलकं जनयति जननी सुतं विरलम्॥ 114

Splitting of Sandhis.

किञ्चित् गोप्यम् वदेत्+विपश्चिद्+महतः+अनुरोधात् तत्+श्रुत्वा पिङ्गलकः+चिन्तयमास योग्यः+अयम् आत्मनः+अभिप्रायम् भृत्ये+अनुवर्तिनि सः+अब्रवीत् अहम्+अस्मात् गन्तुम्+इच्छामि यतः+अद्य भाव्यम्+इति शब्दमात्रात्+अपि उक्तम्+च सेतुः+तथा मन्त्रः+अपि+अरक्षितः पैशुन्यात्+भिद्यते वाग्भिः+आतुरः तत्+न भेरी, वेणु, वीणा, मृदङ्ग, ताल, पटह, शंख, काहल, आदि दर्शितमये+अपि नितराम्+एव

Splitting of Compounds.

स्वस्य जनः तेषु T. C. निरन्तरं चित्तं यस्य B. C. अस्माकम् वनम् T. C. महांश्चासौ शब्दश्च K. C. शब्दस्य अनुरूपः तेन T. C. पूर्वैः उपार्जितम् T. C.

Parsing.

गोप्यम् Po. P. गुप् श्रुत्वा I. P. P. श्रु चिन्तयामास peri perfect III. S. चिन्त् दृश्यते passive III. S. दृश to see निवेद्य I. P. P. विद् with नि इच्छामि present II. S. शु पविष्टम् P. P. p. विश+प्र श्रूयते passive III. S. श्रु भिद्यते III S. भिद् त्यक्तुम् Infinitive त्यज् भेतव्यम् pot. P. भिद् प्राप्ते P. P. P. आप् with प्र हीयते passive III S. हा जनयति co. pre. III. S. जन् भवेत् pot III. S. भू

Meaning

विपश्चित् = அறிவாளி आतुरः = பிணி உள்ளவன் पराभवम् = அவமானம் विरलम् = மிகக் குறைவாகவே.

तथा च—

शक्तिवैकल्यनम्रस्य निःसारत्वाल्लघीयसः ।
जन्मिनो मानहीनस्य तृणस्य च समा गतिः ॥ 115

अपि च—

अन्यप्रतापमासाद्य यो दृढत्वं न गच्छति ।
जतुजाभरणस्येव रूपेणापि हि तस्य किम् ॥ 116

तदेवं ज्ञात्वा स्वामिना धैर्य्यवष्टम्भः कार्य्यः । न शब्द मात्रात् भोक्तव्यम् ।

उक्तञ्च—

पूर्वमेव मया ज्ञातं पूर्णमेतद्धि मेदसा ।
अनुप्रविश्य विज्ञातं तावच्चर्म च दारु च ॥ 117

पिंगलक आह—"कथमेतत्" । सोऽब्रवीत् । —

कथा 2

कश्चिद्गोमायुर्नाम शृगालः क्षुत्क्षामकंठ इतस्ततः परिभ्रमन् वने सैन्यद्वयसंग्रामभूमिमपश्यत् । तस्याञ्च दुन्दुभेः पतितस्य वायुवशात् वल्लीशारवाग्रैः हन्यमानस्य शब्दमशृणोत् । अथ स क्षुभितहृदयश्चिन्तयामास—"अहो विनष्टोऽस्मि यद्यावत् न अस्य प्रोच्चारितशब्दस्य दृष्टगोचरे गच्छामि तावत् अन्यतो व्रजामि । अथवा नैतत् युज्यते सहसैव पितृपैतामहं वनं त्यक्तुम् ।

उक्तञ्च—

भयेवा यदि वा हर्षे संप्राप्ते यो विमर्शयेत् ।
कृत्यं न कुरुते वेगात्र स सन्तापमाप्नुयात् ॥ 118

तत् तावत् जानामि कस्य अयं शब्दः? "धैर्य्यमालम्ब्य विमर्शयन् यावत् मन्दं मन्दं गच्छति तावत् दुन्दुभिमपश्यत् । स च तं परिज्ञाय समीपं गत्वा स्वयमेव कौतुकात् अताडयत् । भूयश्च हर्षात् अचिन्तयत्—"अहो चिरादेतत् अस्माकं महत् भोजनमापतितम् । तत् नूनं प्रभूतमांसमेदोऽसृग्भिः परिपूरितं भविष्यति", ततः परुषचर्मावगुंठितं तत्कथमपि विदार्य्य एकदेशे छिद्रं कृत्वा संहृष्टमना मध्ये प्रविष्टः । परं चर्मविदारणतो दंष्ट्राभङ्गः समजनि ।

Splitting of Sandhis.

निःसारत्वात्+लघीयसः जन्मिनः+मानहीनस्य अन्यप्रतापम्+आसाद्य यः+दृढत्वम् जतुजाभरणस्य+इव तद्+एवम् पूर्णम्+एतत्+हि तावत्+चर्म कथम्+एतत् सः+अब्रवीत् कश्चित्+गोमायुः+नाम सग्रामभूमिम्+अपश्यत् तस्मात्+च शब्दम्+अश्रृणोत् हृदयः+चिन्तयामास विनष्टः+अस्मि यद्+यावत् अन्यतः+व्रजामि न+एतत् सहसा+एव वेगात्+न=वेगान्न सन्तापम्+अवाप्नुयात् धैर्य्यम्+आलम्ब्य दुन्दुभिम्+अपश्यम् स्वयम्+एव भूयः+च भोजनम्+आपतितम् मेदः+असृग्भिः कथम्+अपि विदारणतः+दंष्ट्राभङ्गः

Splitting of Compounds

शक्तिवैकल्येन नम्रः तस्य T-C. मानेन हीनः तस्य T.C. अन्यस्य प्रतापः तं T·C. जतुजञ्चतत् आभरणञ्च तस्य K·C. धैर्यस्य अवष्टम्भः तस्य T·C. सैन्यद्वयस्य सङ्ग्रामभूमिः तम् T·C. वल्लीशाखानाम् अग्राणि T.C. क्षुभितम् हृदयं यस्य तस्य B·C. प्रोच्चारितः शब्दः येन तस्य B·C. दृष्टेः गोचरः तस्मिन् T·C. परुषचर्मणा आवकुण्ठितम् T·C. प्रभूतञ्च तत् मांसमेदश्च K.C. परुषचर्मणा आवकुण्ठितत् T·C. संहृष्टम् मनः यस्य B·C. दंष्ट्राणाम् भङ्गः T·C.

Parsing

गतिः गम् V·n· आसाद्य I·P·P. सद् आ कार्य्यः pot· P. कृ भोक्तव्यम् P.P. भुज् ज्ञातम् P·P·P. ज्ञा अनुप्रविश्य I·P·P. विश् with अनु विज्ञातम् P·P·P. ज्ञा-वि अपश्यत् Imper. III S· दृश् (पश्य्) अश्रृणोत् Imper· III S. श्रु चिन्तयामास per· P. III S चिन्त् विनष्टः P.P·P. नश् with वि व्रजामि pre· I S· व्रज् युज्यते passive III S· युज् त्यक्तुम् Infinit त्यज् संप्राप्ते P·P·· आप् सम् विमर्शयेत् pot· III S. मृश् with वि परिज्ञाय I.P·P ज्ञा with परि. अताडयत् Imperfect. III S. ताड् अचिन्तयत् Imperfect. III S· चिन्त् आपतितम् P.P·P· पत् with आ परिपूरितम् P·P·P· पूर् with परि. भविष्यति IInd Future III S. भू विदार्य I·P. P. दार्, समजनी+वि Ao. III S· जन्+सम्.

Meaning.

जतु=அரக்கு क्षुत्क्षाम=பசிப்பிணி दुन्दुभि=வாத்தியம் छिद्रम्=ஓட்டை

अथ निराशीभूतः तत् दारुशेषमवलोक्य श्लोकमेनमपठत् "पूर्वमेव मया ज्ञातम्" इति । ततो "न शब्दमात्रात् भेतव्यम्" । पिंगलक आह— "भोः! पश्य, अयं मम सर्वोऽपि परिग्रहो भयव्याकुलितमनाः पलायितुमिच्छति । तत् कथमहं धैर्यावष्टम्भं करोमि" । सोऽब्रवीत्—"स्वामिन्! नैषामेष दोषो यतः स्वामिसदृशा एव भवन्ति भृत्याः ।

उक्तञ्च—

अश्वः शस्त्रं शास्त्रं वीणा वाणी नरश्च नारी च ।
पुरुषविशेषं प्राप्ता भवन्त्ययोग्याश्च योग्याश्च ॥ 119

तत् पौरुषावष्टम्भं कृत्वा त्वं तावत् अत्र एव प्रतिपालय । यावदहमेतत् शब्दस्वरूपं ज्ञात्वा आगच्छामि। ततः पश्चात् यथोचितं कार्य्यम्" इति । पिंगलक आह—"किं तत्र भवान् गन्तुमुत्सहते"? । स आह— "किं स्वाम्यादेशात्सद्भृत्यस्य कृत्याकृत्यमस्ति ?

उक्तञ्च—

स्वाम्यादेशात्सुभृत्यस्य न भीः सञ्जायते क्वचित् ।
प्रविशेन्मुखमाहेयं दुस्तरं वा महार्णवम् ॥ 120

तथा च—

स्वाम्यादिष्टस्तु यो भृत्यः समं विषममेव च ।
मन्यते न स सन्धार्यो भूभुजा भूतिमिच्छता ॥ 121

पिङ्गलक आह— "भद्र! यदि एवं तत् गच्छ । शिवास्ते पन्थानः सन्तु" इति । दमनकोऽपि तं प्रणम्य सञ्जीवकशब्दानुसारी प्रतस्थे । अथ दमनके गते भयव्याकुलमनाः पिंगलकः चिन्तयामास—"अहो! न शोभनं कृतं मया, यत् तस्य विश्वासं गत्वा आत्माभिप्रायो निवेदितः । कदाचिद्दमनकोऽयमुभयवेतनो भूत्वा ममोपरि दुष्टबुद्धिः स्यात् भ्रष्टाधिकारत्वात् ।

उक्तञ्च—

ये भवन्ति महीपस्य सम्मानितविमानिताः ।
यतन्ते तस्य नाशाय कुलीना अपि सर्वदा ॥ 122

तत् तावदस्य चिकीर्षितं वेत्तुमन्यत् स्थानान्तरं गत्वा प्रतिपालयामि । कदाचिद्र दमनकः तमादाय मां व्यापादयितुमिच्छति ।

Splitting of Sandhis

दारुशेषम् + अवलोक्य श्लोकम् + एनम् + अपढत् पूर्वम् + एव सर्वैः+अपि पलायितुम्+इच्छति कथम्+अहम् सः+अब्रवीत् न+एषाम्+एष यावद्+अहम्+एतत् गन्तुम्+उत्सहते आदेशात्+ सद्भृत्यस्य कृत्याकृत्यम्+अस्ति आदेशत्+सुभृत्यस्य प्रविशेत्+ मुखम्+आहेयम् आदिष्टः+तु विषमम् + एव भूतिम्+इच्छता शिवाः+ते दमनकः+अपि आत्माभिप्रायः+निवेशितः दमनकः+ अयम्+उभय मम+उपरि वेत्तुम्+अन्यत् तम्+आदाय व्यादयितुम्+इच्छति

Splitting of Compounds.

दारुणा शेषम् T. C. भयव्याकुलितं मनः यस्य B. C. धैर्यस्य अवष्टम्भम् T.C. न योग्याः N.T.C. पौरुषस्य अवष्टम्भम् T.C. शब्दस्य स्वरूपम् T.C. स्वामिनः आदेशः T.C. संश्चासौ भृत्यश्च K.C. कृत्यञ्च अकृत्यञ्च तयोः समाहरः कृत्याकृत्यम् D. C. स्वामिना आदिष्टः T. C. सञ्जीवकशब्दस्य अनुसारी T. C. आत्मनः अभिप्रायः T.C. उभयस्मिन् चेतनं यस्य B.C. दुष्टा बुद्धिः यस्य B.C. भ्रष्टः अधिकारः यस्मात् B.C. पूर्वं सम्मानिताः पश्चात् विमानिताः सम्मानितविमानिताः अन्यत् स्थानम् स्थानान्तरम्

Parsing.

अवलोक्य I.P.P. लोक् + अव अपठत् Imperfe. III S. पद् ज्ञातम् P P.P. ज्ञा भेदव्यम् pot. P. भिद् पलायितुम् Infinitive अय to go with परा परा-पलாएனமாறும் கவனிக்கவும் प्राप्राः P.P.P. आप् with प्र प्रतिपालय Imperative II S. पाल् with प्रति ज्ञात्वा I P P. ज्ञा कार्य्यम् po. P. कृ आह present III S. from ब्रू to speak. (present perfect) सञ्जायते present III S. जा सम् गच्छ Imper II S. गम् सन्तु Imperative. III P. अस् दमनके गते L. Ab. प्रणम्य I.P.P. नम् with प्र प्रतस्थे R P. III S. स्था प्र चिन्तयामास per. perfect. III S. चिन्त् निवेदितः P.P.P. विद् with नि स्याव p.t. III S. अस् to be. वेत्तुम् Infinitive विद् to know प्रतिपालयामि present. I S. पाल् with प्रति आदाय I.P.P. दा with आ व्यापादयितुम् Infinitive. पद् with वि and आ

Meaning

धैर्यावष्टम्भम् = தைரியத்தைக் கடைப் பிடித்தல் **सुभृत्यः** = நல்ல சேவகள் **वेतन** = சம்பளம்

उक्तञ्च—

न वध्यन्ते हविश्वस्ता बलिभिर्दुर्बला अपि ।
विश्वस्तात्वेव वध्यन्ते बलवन्तोऽपि दुर्बलैः ॥ 123

बृहस्पतेरपि प्राज्ञो न विश्वासे व्रजेन्नरः ।
य इच्छेदात्मनो वृद्धिमायुष्यं च सुखानि च ॥ 124

शपथैः सन्धितस्यापि न विश्वासे व्रजेद्रिपोः ।
राज्यलोभोद्यतो वृत्रः शक्रेण शपथैर्हतः ॥ 125

न विश्वासं विना शत्रुर्देवानामपि सिद्ध्यतिः ।
विश्वासात्त्रिदशेन्द्रेण दितेर्गर्भो विदारितः ॥ 126

एवं सम्प्रधार्य्य स्थानान्तरं गत्वा दमनकमार्गमवलोकयन् एकाकि तस्थौ । दमनकोऽपि सञ्जीवकसकाशं गत्वा वृषभोऽयमिति परिज्ञाय हृष्टमना व्यचिन्तयत् — "अहो ! शोभनमापतितम् । अनेन एतस्य सन्धि विग्रहद्वारेण मम पिंगलको वश्यो भविष्यति इति ।

उक्तञ्च—

न कौलीन्यान्न सौहार्दान्नृपो वाक्ये प्रवर्तते ।
मन्त्रिणां यावदभ्येति व्यसनं शोकमेव च ॥ 127

सदैवापद्गतो राजा भोग्यो भवति मन्त्रिणाम् ।
अत एव हि वाञ्छन्ति मन्त्रिणः सापदं नृपम् ॥ 128

यथा नेच्छति नीरोगः कदाचित्सुचि कित्सकम् ।
तथापद्रहितो राजा सचिवं नाभिवाञ्छति ॥ 29

एवं विचिन्तयन् पिंगलकाभिमुखं प्रतस्थे । पिंगलकोऽपि तमायान्तं प्रेक्ष्य स्वाकारं रक्षन् यथापूर्वमवस्थितः । दमनकोऽपि पिंगलकसकाशं गत्वा प्रणम्य उपविष्टः । पिंगलक आह— "किं दृष्टं भवता तत्र सत्यम् ?" । दमनक आह— "दृष्टं स्वामिप्रसादात्" । पिंगलक आह— "अपि सत्यम् ?" । दमनक आह— किं स्वामिपादानामग्रेऽसत्यं विज्ञाप्यते ?

Splitting of Sandhis

हि+अविश्वस्ताः वलिभिः+दुर्बलः विश्वस्ताः+तु+एव बलवन्तः +अपि बृहस्पतेः+अपि व्रजेत्+नरः इच्छेत् +आत्मनः वृद्धिम् +आयुष्यम् सन्धितस्य+अपि व्रजेत् + रिपोः राज्यलोभात्+यतः शपथैः + हतः शत्रुः + देवनाम्+अपि विश्वासात् + त्रिदशेन्द्रण दितेः+गर्भः दमनकमार्गम् अवलोकयन् दमनः + अयि वृषभः+ अयम् + इति शोभनम्+आपाततम् पिंगलकः+वश्यः कौली-न्यात् + न सौहार्दात्+नृपः यावद्+अभ्येति शोकम्+एव+ आपद्गतः न+इच्छति कदाचित् + सुचिकित्स तथा+ अपद्रहितः न+अभिवाञ्छति पिङ्गलकः+अपि तम्+आयन्तम् यथापूर्वम्+ अवस्थितः दमनकः+अपि स्वामिपादानम्+अग्रे अग्रे+असत्यम्

Splitting of Compounds.

न विश्वस्ताः N. T. C. राज्यस्य लाभः T. C. त्रिदशानम् इन्द्रः तेन T. C. अन्यत् स्थानम् स्थानान्वरम् दमनकस्य मार्गः तम् T. C. सञ्जीवकस्य सकाशम् T. C. हृष्टम् मनः यस्य B. C. सन्धिविग्र-हावेवद्वारम् K. C. अपदि गतः T. C. रागात् निर्गतः नीरोगः अपदा रहितः T. C. पिंगलकमभि मुखं यस्य B. C. पिंगलकस्य सकाशम् T. C. स्वामिनः प्रसादः T. C. न सत्यम्=असत्यम् N. T. C

Parsing

बध्यन्ते passive III. P. वध् व्रजेत् pot III S. व्रज् to go इच्छेत् pot. III S. इष् हतः P. P. P. हन् to kill सिध्यति pres. III S. सिध् विदारितः P. P. P. दारु वि संप्रधार्य I. P. P धृ सम्+प्र अवलोकयन् pre P. लोक् with अव तस्थौ R. P. III S. स्था व्यचिन्तयत् Imperfect III. S चिन्त् with वि आपतितम P. P. P. पत् with आ भविष्यति IInd future III S. भव् अभ्येति pres III. S इ+ अभि वाञ्छन्ति prese III. P. वाञ्छ विचिन्तयन् p. e. P. चिन्त् with वि प्रतस्थे R. P. III. S. स्था+प्र आयान्तम्— pre P. या with आ प्रेक्ष्य I. P. P. ईक्ष् with प्र रक्षन् pre P. रक्ष् उपविष्टः P. P. P. विश with उप विज्ञाप्यते co. pre. III S. ज्ञा+वि

Meaning

ते = அசுரர்களின் தாய் = திதி त्रिदश = தேவர்கள் மூன்று தலை சகள் பல்யம், கௌமாரம், யௌவனம் இவை உடையவர் चिदिकित्सक = வைத்தியர்.

उक्तञ्च—

अपि स्वल्पमसत्यं यः पुरो वदति भूभुजाम् ।
देवानां च विनश्येत स द्रुतं सुमहानपि ॥ 130

तथा च—

सर्वदेवमयो राजा मनुना सम्प्रकीर्तितः ।
तस्मात्तं दववत्पश्येन्न व्यलीकेन कीर्हचित् ॥ 131

सर्वदेवमयस्यापि विशेषो नृपतेरयम् ।
शुभाशुभफलं सद्यो नृपाद्देवाद्भवान्तरे ॥ 132

पिङ्गलक आह—"सत्यं दृष्टं भविष्यति भवता । न दीनोपरि महान्तः कुप्यन्ति, इति न त्वं तेन निपातितः ।

यतः—

तृणानि नोन्मूलयति प्रभञ्जनो मृदूनि नीचैः प्रणतानि सर्वतः ।
स्वभाव एवोन्नतचेतसामयं महान्महत्स्वेव करोति विक्रमम् ॥ 133

अपि च—

गण्डस्थलेषु मदवारिषु बद्धरागमत्तभ्रमद्भ्रमरपादतलाहतोऽपि
कोपं न गच्छति नितान्तबलोऽपि नागस्तुल्येबलेषु
बलवान्परिकोपमेति ॥ 134

दमनक आह—"अस्तु एवं स महात्मा वयं कृपणा । तथापि स्वामी यदि कथयति ततो भृत्यत्वे नियोजयामि । पिङ्गलक आह—(सोच्छ्वासम्) किं भवान् शक्नोत्येवं कर्तुम्?"। दमनक आह—"किमसाध्यं बुद्धेरस्ति"।

उक्तञ्च—

न तच्छस्त्रैर्न नागेन्द्रैर्न हयैर्न पदातिभिः ।
कार्य्यं संसाद्धमभ्येति यथा बुद्ध्या प्रसाधितम् ॥ 135

पिङ्गलक आह—"यदि एवं तर्हि अद्यप्रभृति मदीयपदे अध्यारोपितस्त्वम् । अद्यप्रभृति प्रसादानग्रहादिकं त्वयैव कार्य्यमिति निश्चयः । अथ दमनकः सत्वरं गत्वा साक्षेपं तमिदमाह—"एह्येहि दुष्टवृषभ! स्वामी पिंगलकः त्वाम् आकारयति । किं निःशङ्को भूत्वा मुहुर्मुहुर्दुर्नदसि वृथेति । तच्छ्रुत्वा सञ्जीवकोऽब्रवीत्—"भद्र! कोऽयं पिंगलकः"? । दमनक आह—"किं स्वामिनं पिंगलकमपि न जानासि? तत् क्षणं प्रतिपालय । फलेनैव ज्ञास्यसि ।

Splitting of Sandhis

स्वल्पम्+असत्यम् तस्मात्+तम् सर्वदेवमयस्य+अपि नृपतेः+अयम् नृपात्+देवात्+भवान्तरे न+उन्मूलयति एव+उन्नतचेतसाम्+अयम् महान्+महत्सु+एव तलाहतः+अपि नितान्तबलः+अपि नागः+तुल्ये परिकोपम्+एति शाक्नोति+एवम् किम्+असाध्यम्+स्कन्धैः+अ तत्+शस्त्रैः न+नागेन्दैः+न हयैः+न संसिद्धिम्+अभ्येति अध्यारोपितः+त्वम् त्वया+एव+कार्यम्+इति तम्+इदम्+आह एहि+एहि मुहुर्मुहुः+नदसि वृथा+इति तत्+श्रुत्वा फलेन+एव.

Splitting of Compounds

न सत्यम् असत्यम् T·C· भुवः भुजः तेषाम् T·C· बद्ध····पादतलेन आहतः T C नितान्तम् बलम् यस्य B·C· नागानाम् इन्द्राः तैः T·C· अमात्यस्य पदम् तस्मिन् T·C· प्रसादनिग्रहौ अदौ ये B·C· दुष्ट श्चासौ वृषभश्च तस्य सबद्धिः K·C·

Parsing

विनश्येत pot· III S· नश् with वि पश्येत् pot· III S· दृश् to see· आह pre. III S· ब्रू to speak· भविष्यनि IIId F. III S· भू कुप्यन्ति pre· III P· कुप् निपातितः P·P·P· Co· पत्+नि प्रणतानि P·P·P· नम् wiih प्र अस्तु Imper III S· अस् शक्नोति preset· III S· शक् कर्तुम् Infinitive· कृ अध्यारोपितः Co· P·P·P· रुहे+अधि एहि Imper· II S· इ to go, आ नदसी present II S. नद् श्रुत्वा I·P·P· III S· श्रु to hear· अब्रवीत् Imper· II S· ब्रू. प्रतिपालय Imper· II S· पाल्+प्रति ज्ञास्यसि II Futur II per· S· ज्ञा.

Meaning

ह्यलीकेन = பொய்யாக भवान्तरे = மறுபிறவியில் विक्रमम् = எதிர்த்தலை गण्डस्थल = கன்னம் सोच्छ्वासम् = பெருமூச்சுடன் पदाति = காலாள்ப்படை आकारयति = கூப்பிடுகிறான் नदसि = கர்ஜிக்கின்றாய் प्रतिपालय = எதிர்பார்.

ननु अयं सर्वमृगपरिवृतो वटतले स्वामी पिंगलकनामा सिंह-स्तिष्ठति"। तच्छ्रुत्वा गतायुषमिवात्मानं मन्यमानः सञ्जीवक[3] परं विषादमगमत्। आह च—"भद्र! भवान् साधुसमाचारो वचनपटुश्च दृश्यते। तत् यदि मामवश्यं तत्र नयसि तदभयप्रदानेन स्वामिनः सकाशात् प्रसादः कारयितव्यः"। दमनक आह—"भोः! सत्यमभिहित भवता!

नीतिरेषा यतः—

पर्यन्ता लभ्यते भूमेः समुद्रस्य गिरेरपि!
न कथञ्चिन्महीपस्य चित्तान्तः केनचित् क्वचित्॥ 136

तत् त्वमत्रैव तिष्ठ, यावदहं तं समयं दृष्ट्वा ततः पश्चात् त्वां नयामि" इति। तथा अनुष्ठिते दमनकः पिंगलकसकाशं गत्वा इदमाह—"स्वामिन्! न तत् प्राकृतं सत्वं, स हि भगवतो महेश्वरस्य वहनभूतो वृषभ इति। मया पृष्ट इदमूचे—महेश्वरेण परितुष्टेन कालिन्दीपरिसरे शष्पाग्राणि भक्षयितुं समादिष्टः। किं बहुना मम प्रदत्तं भगवता क्रीडार्थं वनमिदम्"। पिंगलक आह—(सभयम्) सत्यं ज्ञातं मयाऽधुना न देवताप्रसादं विना शष्पभोजिनो व्यालाकीर्णे एवंविधे वने निःशंकाः नदन्तो भ्रमन्ति। ततस्त्वया किमभिहितम्"?। दमनक आह—"स्वामिन्! एतदभिहितम् मया यदेदृग्वनं चण्डिकावाहनभूतस्य मत्स्वामिनः पिंगलकनाम्नः सिंहस्य विषयीभूतं तद्भवानभ्यागतः प्रियोऽतिथिः। तत् तस्य सकाशं गत्वा भ्रातृस्नेहेन एकत्र भक्षणपानविहरणक्रियाभिः एकस्थानाश्रयेण कालो नेय इति"। ततः तेनापि सर्वमेतत् प्रतिपन्नमुक्तञ्च सहर्षम्—"स्वामिनः सकाशात् अभयदक्षिणा दापयितव्या। इति तदत्र स्वामि प्रमाणम्" तच्छ्रुत्वा पिंगलक आह—"साधु सुमते! साधु मन्त्रिश्रोत्रिय साधु, मम हृदयेन सह सम्मन्तय भवत इदमभिहितम्। तदत्ता मया तस्य अभयदक्षिणा, परं सोऽपि मदर्थं अभयदक्षिणां याचयित्वा द्रुततरमानीयतामिति। अथवा साधु चेदमुच्यते—

अन्तः सारैरकुटिलैरच्छीद्रैः सुपरीक्षितैः!
मन्त्रिभिर्धार्यते राज्यं सुस्तम्भैरिव मन्दिरम्॥ 137

Splitting of Sandhis

परिवृतः+वटतले सिंहः+तिष्ठति गतायुषम्+इव+आत्मा विषादम्+आगमत् समाचार+वचनपटुः+च माम्+अवश्यम् सत्यम्+अभिहितम् नीतिः+एषा गिरेः+अपि कथञ्चित्+महीपस्य त्वम्+अत्र+एव यावद्+अहम् इदम्+आह वाहनभूतः+वृषभः पृष्टः+इदम्+ऊचे वनम्+इदम् मया+अधुना शष्पभोजिनः+ व्याला नदन्तः+भ्रमन्ति ततः+त्वया तद्+भवान्+अभ्यागतः प्रियः+अतिथिः कालः+नेयः तेन+अपि प्रतिपन्नम्+ऊकम्+च तद्+अत्र तत्+श्रुत्वा इदम्+अभिहितम् सः+अपि द्रुततरम्+ आनीयताम्+इति च+इदम्+उच्यते सारैः+अकुटिलैः+अच्छिद्रैः मन्त्रिभिः+धार्यते सुस्तंभै+इव

Splitting of Compounds

सर्वमृगैः परिवृतः T.C. पिङ्गलकः इति नाम यस्य B.C. गतम् आयुः यस्मात् तं B.C. वचने पटुः B.C. अभयस्य प्रदानम् तेन T.C. मह्याः पः तस्य T.C. देवतायाः प्रसादः तम् T.C. शष्पा-: पान् भोजी तस्य T.C. व्यालैः आकीर्णम् तस्मिन् T.C. चण्डिकायाम् वाहनभूतः तस्य T.C. एकस्थाने आश्रय तेन T.C. मन्त्री च असौ श्रोत्रियश्च K.C. अभयमेव दक्षिणा K.C. अन्तः सारः येषां ते तैः B.C. न कुटिलाः तैः T.C. नविद्यते छन्द्रं येषांतैः B.C. सुष्ठु परिक्षिताः तैः T.C.

Parsing.

न्यामा न pre. P. मन् अगमत् Ao. III S. गम् कारयितव्यः Co. po. P. कृ ऊचे S. per. III S. वच् सम् आ समादिष्टः P.P.P. विश् अभिहितम् P.P.P. धा+अभि नेयः pot. P. नम् याचायित्वा Co. I.P.P. याच् आनीयताम् pass. Imper. III S. नी+आ उच्यते pass. pre. III S. वच् धार्यते pass. pre. III S. धार्

Meaning

चण्डिका = பார்வதி । व्याल = துட்டமிருகம்

तथा च—

मन्त्रिणां भिन्नसन्धाने भिषजां सान्निपातिके !
कर्मणि व्यज्यते प्रज्ञा स्वस्थे को वा न पण्डितः !! 138

दमनकोऽपि तं प्रणम्य सञ्जीवकसकाशं प्रस्थितः सहर्षमचिन्तयत्—"अहो प्रसादसम्मुखो नः स्वामी वचनवशगश्च संवृत्तस्तत्नास्ति धन्यतरो मम।

उक्तञ्च—

अमृतं शिशिरे वह्निरभृतं प्रियदर्शनम् !
अभृतं राजसम्मानमभृतं क्षीरभोजनम् !! 139

अथ सञ्जीवकसकाशमासाद्य सप्रश्रयमुवाच — "भो मित्र ! प्रार्थितोऽसौ मया भवदर्थे स्वाम्यभयप्रदानम्। तद्विश्रब्धमागम्यतामिति। परं त्वया राजप्रसादमासाद्य मया सह समयधर्मेण वर्तितव्यम्। न गर्वमासाद्य स्वप्रभुतया विचरणीयम्। अहमपि तव संकेतेन सर्वां राज्यधुरममात्यपदवीमाश्रित्य उद्धरिष्यामि। एवं कृते द्वयोरपि आवयोः राज्यलक्ष्मीर्भोग्या भविष्यति।

यतः—

आखेटकस्य धर्मेण विभवाः स्युर्वशे नृणाम् !
नृपजाः प्रेरयत्येको हन्त्यन्योऽत्र मृगानिव !! 140

तथा च—

यो न पूजयते गुरुदुत्तमाधममध्यमान् !
भूपसम्मानमान्योऽपि भ्रश्यते दन्तिलो यथा !! 141

सञ्जीवक आह "कथमेतत् ?" सोऽब्रवीत्—

कथा 3

अस्त्यत्र धरातले वर्द्धमानं नाम नगरम्। तत्र दन्तिलो नाम नानाभाण्डपतिः सकलपुरनायकः प्रतिवसतिस्म। तेन पुरकार्य्यं नृपकार्य्यञ्च कुर्वता तुष्टिं नीताः तत्पुरवासिनो लोका नृपतिश्च। किं बहुना। नकोऽपि तादृक् केनापि चतुरो दृष्टो नापि श्रुतो वेति। अथवा साधु चेदमुच्यते—

नरपतिहितकर्ता द्वेष्यतां याति लोके, जनपदहितकर्ता
त्यज्यते पार्थिवेन्द्रैः !
इति महति विरोधे वर्तमाने समाने, नृपतिजनपदानां
दुर्लभः कार्यकर्ता !! 142

Splitting of Sandlis

कः+वा दमनकः+अपि सहर्षम्+अचिन्तयत् प्रसादसंमुखः+नः वचनवशगः+च संवृत्तः+तत्+न+अस्ति धन्यतरः+मम बहूनि+अमृतम् राजसन्मानम्+अमृतम् सकाशम्+आसाद्य सप्रश्रयम्+उवाच प्रार्थितः+असौ स्वामी+अभयप्रदानम् तत्+विश्रब्धम् अगम्यताम् +इति राजप्रसादम्+आसाद्य गर्वम्+आसाद्य अहम्+अपि राज्यधुरम्+अमात्यपदवीम्+आश्रित्य द्वयोः+अपि राज्यलक्ष्मी +भोज्या स्युः+वशे प्रेरयिति+एकः हन्ति+अन्यः+अत्र मृगान् इव गर्वात्+उत्तमाधम मान्यः+अपि दन्तिलः+ यथा कथम्+ एतत् सः+अब्रवीत् अस्ति+अत्र दन्तिलः+नाम नृपकार्यम्+च वासिनः+ लोकाः+नृपति+च कः+अपि=कोऽपि केन+अपि= केनापि न+अपि=नापि श्रुतः +वा+इति च+इदम्+उच्यते

Splitting of Compounds

भिन्नश्चतत् सन्धानश्च तस्मिन् K. C सञ्जीवकस्य सकाशम् T C. हर्षेण सह वर्तते इति सहर्षम् B.C. प्रसादे सम्मुखः प्रसादसम्मुखः T.C वचनवशं गः वचनवशगः T.C. प्रियस्य दर्शनम् T.C राज्ञः सम्मानम् T. C क्षीरसहितम् भोजनम् T.C प्रश्रयेण सह वर्तत इति सप्रश्रयम् B. C अभयस्य प्रदानम् T.C समयस्य धर्मः तेन T. C राज्यस्य धूः ताम् राज्यधुरम् T.C अमात्यस्य पदवी ताम् T. C राज्यस्य लक्ष्मीः T C नर एव प्रजाः नृप्रजाः K.C उत्तमश्च अधमश्च मध्यमश्चतान् D.C भूपसम्मानेन मान्यः T. C नानाभाण्डानाम् पतिः T. C सकलपुरस्य नायकः T.C पुरस्य कार्यम् पुरकार्यम् T.C नृपस्य कार्यम् नृपकार्यम् T.C परपतेः हितकर्ता T, C जनपदानाम् हितकर्ता T.C

Parsing.

आसाद्य I.P.P सद्+आ उद्धरिष्यति IInd F. III. S धृ with उद्

Meaning.

आखेटक = வேட்டை दन्तिलकः = தந்திலகன்

अथ एवं गच्छति काले दन्तिलस्य कदाचिद्विवाहः सम्प्रवृत्तः। तत्र तेन सर्वे पुरनिवासिनो राजसन्निधिलोकाश्च सम्मानपुरःसरमामन्त्य भोजिता वस्त्रादिभिः सत्कृताश्च। ततो विवाहानन्तरं राजा सान्तःपुरः स्वगृहमानीय अभ्यर्चितः। अथ तस्य नृपतेः गृहसम्मार्जनकर्ता गोरम्भो नाम राजसेवको गृहायातोऽपि तेन अनुचितस्थाने उपविष्टोऽवज्ञया अर्द्धचन्द्रं दत्वा निःसारितः। सोऽपि ततः प्रभृति निःश्वसन् अपमानात् न रात्रौ अपि अधिशेते। "कथं मयः तस्य भाण्डपतेः राजप्रसादहानिः कर्तव्या" इति चिन्तयन् आस्ते। अथवा किमनेन वृथा शरीरशोषणेन। न किंचित् मया तस्य अपकर्तुं शक्यामिति। अथवा साधु इदमुच्यते—

यो ह्यपकर्तुमशक्तः कुप्यति किमसौ नरोऽत्र निर्लज्जः!
उत्पतितोऽपि हि चणकः शक्तः किं भ्रष्टुकं भङ्क्तुम्!! 143

अथ कदाचित्प्रत्यूषे योगनिद्रां गतस्य राज्ञः शय्यान्ते मार्जनं कुर्वन् इदमाह—"अहो! दन्तिलस्य महद्दृष्टत्वं यत् राजमहिषीमालिङ्गति। तच्छ्रुत्वा राजा ससम्भ्रममुत्थाय तमुवाच, "भो! भो! गोरम्भ! सत्यमेतत् यत् त्वया जल्पितं किं देवी दन्तिलेन समालिङ्गिता इति।" गौरम्भः प्राह—"देव! रात्रि जागरणेन दधूनासक्तस्य मे बलात् निद्रा समायाता। तत् न वेद्मि किं मया अभिहितम्। राजा (सेर्ष्यं स्वगतम्) एष तावदस्मद्गृहे अप्रतिहतगतिः तथा दन्तिलोऽपि। तत्कदाचित् अनेन देवी समालिंग्यमाना दृष्ट्वा भविष्यति। तेन इदमभिहितम्।

उक्तञ्च—

यद्वाञ्छति दिवा मर्त्यो वीक्षते वा करोति वा!
तत्स्वप्नेऽपि तदभ्यासाद् वेत्ति वाऽथ करोति वा!! 144

तथा च—

शुभं वा यदि वा पापं यन्नृणां हृदि संस्थितम्!
सुगूढमपि तज्ज्ञेयं स्वप्नवाक्यात्तथा मदात्!! 145

अथवा स्त्रीणां विषये कोऽत्र संदेहः?

जल्पन्ति सार्द्धमन्येन पश्यन्त्यन्यं सविभ्रमम्!
हृदगतं चिन्तयन्त्यन्यं प्रियः को नाम योषिताम्!! 146

Splitting of Sandhis

कदाचित्+विवाहः वासिनः+ राज लोकाः+च पुरःसरम्+ आमन्त्र्य भोजिता+वस्त्रादिभिः सत्कृतः+च स्वगृहम्+आनीय गोरम्यः+नाम सेवकः+ग्रहयातः+अपि उपविष्टः+अवज्ञया सः +अपि=सोऽपि किम्+अनेन शक्यम्+इति इदम्+उच्यते हि+ अपकर्तुम्+अशक्तः किम्+असौ नरः+ अत्र उत्पतितः+अपि कदाचित्+प्रत्यूषे इदम्+आह राजमहिषीम्+अलिङ्गति+तत् श्रुत्वा ससंभ्रमम्+उत्थाय तम्+उवच सत्यम्+एतत् तावद्+अस्मद्ग्रहे दन्तिलः+अपि इदम्+अभिहितम् यदू+वाञ्छति तत्स्वप्ने+अपि वा+अथ=वाऽथ वम्+ज्ञेयम् स्वप्नवाक्यात्+तथा सार्धम्+अन्येन पश्यन्ति+अन्यम् चिन्तयान्त+अन्यम्, कः+नामः

Splitting of Compounds.

संमानम् पुरसरम् यस्मिन् कर्मणि B. C वस्त्रम् आदिः येषाम् तैं B. C विवाहात् अनन्तरम् T. C अन्तपुरैः सहवर्तते इति T. C स्वस्य गृहम् T. C राज्ञः सेवकः राजसेवकः T.C राजप्रसादस्य हानिः T.C शरीरस्यशोषणम् तेन T. C न शक्तःअशक्तः NTC राज्ञः महिषी ताम् T. C मम गृहम् अस्मद्गृहम् तस्मिन् T. C अप्रतिहता गतिः यस्य B. C तस्य अभ्यासः तस्मात् B. C स्वप्नस्य वाक्यम् तस्मात् T. C

Parsing

संवृत, P. P. P. वत् with सम् and प्र आमन्त्र्य I. P. P. मन्त्र् with आ अभ्यर्चितः P. P. P. अर्च् with अभि निंः सारितः P P. P. co सृ with नि अधिशेते pre III S शी with अधि उच्यते passive pre III S भङ्क्तुम् Infinitve भञ्ज् अलिङ्गति pre III S. लिङ् with आ अभिहितम् P.P.P. धा with अभि

Meaning

मार्जनकर्ता = வீடுகூட்டுபவன் अर्धचन्द्र = படனியில் கைவைத்து தள்ளுவது भाण्डपतिः = பணக்காரன் भ्राष्टकम् = பானை चणकः = கொண்டக்கடலை योगनिद्र = பொத்தூக்கம் द्यूत = சூதாட்டம் योषित् = பெண்மணி.

अन्यच्च—

एकेन स्मितपाटलाधररुचो जल्पन्त्यनल्पाक्षरं
वीक्षन्तेऽन्यमितः स्फुटत्कुमुदिनी फुल्लोल्लसल्लोचनाः।
दूरोदारचरित्रचित्रविभवम् ध्यायन्ति चान्यं धिया
केनेत्थं। परमार्थतोऽर्थवदिव प्रेमास्ति वामभ्रुवाम् ॥ 147

तथा च—

नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः।
नान्तकः सर्वभूतानाम् न पुंसांवामलोचना ॥ 148

रहो नास्ति क्षणो नास्ति नास्ति प्रार्थयिता नरः
तेन नारद नारीणां सतीत्वमुपजायते ॥ 149

यो मोहान्मन्यते मूढो रक्तेयं मम कामिनी।
स तस्यावशगो नित्यं भवेत्क्रीडाशकुन्तवत् ॥ 150

तासा वाक्यानि कृत्यानि स्वरूपाणि सुगुरूण्यपि।
करोति यः कृती लोके लघुत्वं याति सर्वतः ॥ 151

स्त्रियश्च यः प्रार्थयते सन्निकर्षञ्च गच्छति।
ईषच्च कुरुते सेवां तमेवेच्छन्ति योषितः ॥ 152

अनर्थित्वान्मनुष्याणां भयात्परिजनस्य।
मर्य्यादायाममर्य्यादाः स्त्रियस्तिष्ठन्ति सर्वदा ॥ 153

नासाम् कश्चिदगम्योऽस्ति नासाञ्च वयसि स्थितिः।
विरूपं रूपवन्तं वा पुमानित्येव भुज्यते ॥ 154

रक्तो हि जायते भोग्यो नारीणां शाटको यथा।
धृष्यते यो दशालम्बी नितम्बे विनिवेशितः ॥ 155

अलक्तको यथा रक्तो निष्पीड्य पुरुषस्तथा।
अबलाभिर्बलाद्रक्तः पादमूले निपात्यते ॥ 156

Splitting of Sandhis

अन्यत्+च=अन्यच्च जल्पन्ति+अनल्पाक्षरम् वीक्षन्ते+अन्यम्+इतः च+अन्यम् केन+इत्थम् परमार्थतः+अर्थवत्+इव प्रम+अस्ति न+अग्निः+तृप्यति न+आपगानाम् न+अन्तकः रहः+न+अस्ति क्षणः+न+अस्ति सतीत्वम्+उपजायते यः+मोहात्+मन्यते मूढः+रक्ता+इयम् भवेत् क्रीडाशकुन्त सुगुरूणि+अपि स्त्रियम्+च सन्निकर्षम्+च ईषत्+च तम्+एव+इच्छन्ति अनर्थित्वात्+मनुष्या भयात्+परिजनस्य मर्यादायाम्+अमर्यादाः स्त्रियः+तिष्ठन्ति न+आसाम् कश्चित्+अगम्यः+अस्ति न+आसाम्+च पुमान्+इति+एव पुरूषः+तथा अबलाभिः+बलात्+रक्तः

Splitting of Compounds

स्मितेन पाटला अधररुक् यसांताः B·C अनल्पानि अक्षराणि यस्मिन् ,स्फुटच्कुमुदिनीफुल्लोल्लसती लोचने यासां ताः B.C दूरोदार चरित्रं चित्रं विभवम् यस्य B·C वामे भुवौ यासाम् ताः तासाम् B·C सर्वं च ते भूताश्च तेषाम् K·C वामे लोचने यस्याः सा B·C क्रीडाशकुन्तः इव क्रीडाशकुन्तवत् न विद्यते मर्यादा यासाम् ताः B·C पादयोः मूलम् तस्मिन् T·C

Parsing.

जल्पन्ति pre III P वीक्षन्ते pre III P इक्षू with वि ध्यायन्ति pre III P. ध्यै तृप्यति pre III S तृप् उपजायते pre III S जन् (जा) with उप मन्यते pre III S मन् भवेत् pot III S. भव् याति pre III S या प्रार्थयते pre III S अर्थ with प्र भुज्यते pre III S भुज् धृष्यते pre III S. धृष निषीदत I. P. P षीद with निस् निपात्यते passive pre III S पत् with नि

Meaning

अधर = உதடு कुमुदिनी = ஆம்பல்ஆடை वामभुवाम् = பெண்களுக்கு अपगा = ஆறு वामलोचन = பெண் कामिनी = நாயகி क्रीडाशकुन्त = விளையாடுவதற்குரிய பொம்மை பறவை लघुत्वम् = அவவானத்தை शाटकः = சேலை दशालम्बी = சேலையின் நுனியில்த் தொங்குபவன் अबला = பெண்

एवं स राजा बहुविधं विलप्य ततःप्रभृति दन्तिलस्य प्रसादपराङ्मुखः सञ्जातः। किं बहुना राजद्वारप्रवेशोऽपि तस्य निवारितः। दन्तिलोऽपि अकस्मादेव प्रसादपराङ्मुखमवनीपतिमवलोक्य चिन्तयामास— "अहो! साधु चेदमुच्यते।

कोऽर्थान् प्राप्य न गर्वितो विषयिणः कस्यापदोऽस्तंगताः
स्त्रीभिः कस्य न खण्डितं भुवि मनः को नाम राज्ञां प्रियः।
कः कालस्य न गोचरान्तरगतः कोऽर्थी गतो गौरवं
को वा दुर्जनवागुरासु पतितः क्षेमेण यातः पुमान्! 157

तथा च—

काके शौचं द्यूतकारे च सत्यं सर्पे क्षान्तिः स्त्रीषु कामोपशान्तिः।
क्लीबे धैर्यं मद्यपे तत्त्वचिन्ता राजा मित्रं केन दृष्टं श्रुतं वा॥ 158

अपरं च मया अस्य भूपतेरथवा अन्यस्यापि कस्यचित् राजसंबन्धिनः स्वप्नेऽपि न अनिष्टं कृतम्। तत्किमेतत् पराङ्मुखो मां प्रति भूपतिः" इति। एवं तं दन्तिलं कदाचित् राजद्वारे विस्तम्भितं विलोक्य सम्मार्जनकर्ता गोरम्भो विहस्य द्वारपालानिदमूचे— भो भो द्वारपालाः! राजप्रसादाधिष्ठितोऽयं दन्तिलः स्वयं निग्रहानुग्रहकर्ता च। तदनेन निवारितेन यथा अहं तथा यूयमपि अर्द्धचन्द्रभाजिनो भविष्यथ"। तच्छ्रुत्वा दन्तिलश्चिन्तयामास— "नूनमिदमस्य गोरम्भस्य चेष्टितम्।

अथवा साधुवदमुच्यते—

अकुलीनोऽपि मूर्खोऽपि भूरालं योऽत्र सेवते।
अपि सम्मानहीनोऽपि स सर्वत्र प्रपूज्यते॥ 159

अपि कापुरुषो भीरुः स्याच्चेन्नृपतिसेवकः।
तथापि न पराभूतिं जनादाप्नोति मानवः॥ 160

एवं स बहुविधं विलप्य विलक्षमनाः सोद्वेगो गतप्रभावः स्वगृहं गत्वा निशामुखे गोरम्भमाहूय वस्त्रयुगलेन सम्मान्य इदमुवाच— "भद्र! मया न तदा त्वं रागवशात् निःसारितः। यतस्त्वं ब्राह्मणानामग्रेऽनुचितस्थाने समुपविष्टो दृष्ट इति अपमानितः तत् क्षम्यताम्"। सोऽपि स्वर्गराज्योपमं तद्वस्त्रयुगलमासाद्य परं परितोषं गत्वा तमुवाच—"भोः श्रेष्ठिन्! क्षान्तं मया ते तत्। तदस्य सम्मानस्य कृते पश्य मे बुद्धिप्रभावं राजप्रसादञ्च"। एवमुक्त्वा सपरितोषं निष्क्रान्तः।

Splitting of Sandhis.

प्रवेशः+अपि दन्तिलः+अपि अकस्मात्+एव प्रसादपराङ्मुखम्+अवनीपतिम्+अवलोक्य च+इदम्+उच्यते कः+अर्थान् गर्वितः+विषयिणः कस्य+आपदः+अस्तंगताः कः+नाम कः+अर्थी+गतः भूपतेः+अथवा अन्यस्य+अपि स्वप्ने+अपि पराङ्मुखः+माम् गोरम्भः+विहस्य द्वारपालान्+इदम्+ऊचे अधिष्ठितः+अयम् तद्+अनेन यूयम्+अपि तद्+अनेन यूयम्+अपि भाजिनः+भविष्यथ तत्+श्रुत्वा दन्तिलः+चिन्तयामास नूनम्+इदम्+अस्य साधु+इदम्+उच्यते अकुलीनः+अपि मूर्खः+अपि यः+अत्र सम्मानहीनः+अपि स्यात् चेत्+नृपतिसेवकः जनात्+आप्नोति सोद्वेगः+गतप्रसवः गोरम्भम्+आहूय इदम्+उवाच यतः+त्वम्+ब्राह्मणानाम्+अग्रतः+अनुचितस्थाने सः+अपि वस्त्रयुगलम्+आसाद्य तम्+उवाच राजप्रसादम्+च एवम्+उक्तवा

Splitting of Compounds

प्रसादे पराक् मुखम् यस्य सः B.C. राजद्वारे प्रवेशः राजद्वार-प्रवेशः T.C. अवन्याः पतिः तम्.....T.C. गोचरान्तरम् गतः T.C. दुर्जन एव वागुरा तासु K.C. राजप्रसादम् अधिष्ठितः निग्रहानुग्रहयोः कर्ता T.C. अर्धचन्द्रस्य भाजिनः T.C. न कुलीनः अकुलीनः N.T.C कुत्सितः च असौ पुरुष श्च K.C. नृपतेः सेवकः नृपातिसेवकः T.C! निशायाः मुखम् तद्मिन् T.C. गत प्रभावः यस्य B.C. स्वर्गराज्येन उपमा यस्य B.C. वस्त्रयोः युगलम् T.C. राज्ञः प्रसादः तम् T.C.

Parsing.

चिन्तयामास perfect. per. विलप्य I P P. लम् with वि निष्क्रान्तः P.P.P. क्रम् with निस्

Meaning

निशामुखे = வலை पराभूतिम् = அவி क्लेश = அவமானம்
वागुरा = சாயங்காலத்தில்

साधु चेदमुच्यते—

"स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम् !
अहो सुसदृशी चेष्टा तुलायष्टेः खलस्य च !! 161

ततश्च अन्येद्युः स गोरम्भो राजकुले गत्वा योगनिद्रां गतस्य भूपतेः सम्मार्जनक्रियां कुर्वन् इदमाह— "अहो अविवेको ऽस्मद्भूपतेः यत् पुरीषोत्सर्गमाचरन् चिर्भटीभक्षणं करोति" । तच्छ्रुत्वा राजा सविस्मयं तमुवाच—"रे रे गोरम्भ ! किमप्रस्तुतं जल्पसि ? गृहकर्मकरं मत्वा त्वां न व्यापादयामि । किं त्वया कदाचित् अहमेवंविधं कर्म समाचरन् दृष्टः" ? सोऽब्रवीत्— "देव ! द्यूतासक्तस्य रात्रिजागरणेन सम्मार्जनं कुर्वाणस्य मम बलात् निद्रासमायाता । तथा अधिष्ठितेन मया किञ्चिज्जल्पितम्, तन्न वेद्मि । तत्प्रसादं करोतु स्वामी निद्रापरवशस्येति" । एवं श्रुत्वा राजा चिन्तितवान्—"यन्मया जन्मान्तरे पुरीषोत्सर्गं कुर्वता कदापि चिर्भटिका न भक्षिता तत् यथा अयं व्यतिकरो असम्भाव्यो मम अनेन मूढेन व्याहृतः तथा दन्तिलस्य अपि इति निश्चयः । तन्मया न युक्तं कृतं यत् स वराकः सम्मानेन वियोजितः । न तादृक्पुरुषाणामेवंविधं चेष्टितं सम्भाव्यते । तदभावेन राजकृत्यानि पौरकृत्यानि न सर्वाणि शिथिलतां व्रजन्ति" । एवमनेकधाविमृश्य दन्तिलं समाहूय निजांगवस्त्राभरणादिभिः संयोज्य स्वाधिकारे नियोजयामास । अतोऽहं ब्रवीमि—"यो न पूज्यते गर्वात्" इति ।

सञ्जीवक आह—"भद्र ! एवमेवैतत् । यद्भवता अभिहितं तदेव मया कर्तव्यमिति" । एवमभिहिते दमनकस्तमादाय पिङ्गलकसकाशमगमत् । आह च—"देव ! एष मया आनीतः स सञ्जीवकः । अधुना देवः प्रमाणम्" । संजीवकोऽपि तं सादरं प्रणम्य अग्रतः सविनयं स्थितः । पिङ्गलकोऽपि तस्य पीनायतककुद्यतो नखकुलिशालंकृतं दक्षिणपाणिमुपरि दत्वा सानुपूर्वमुवाच —"अपि शिवं भवतः ? कुतस्त्वमस्मिन्वने विजने समायातोऽसि ?" । तेनापि आत्मवृत्तान्तः कथितः । यथा वर्द्धमानेन सह वियोगः संजातस्तथा सर्वं निवेदितम् । तच्छ्रुत्वा पिंगलकः सादरतरं तमुवाच— "वयस्य ! न भेतव्यम् । मद्भुजपंजरपरिरक्षितेन यथेच्छं त्वया अधुना वर्तितव्यम् । अन्यच्च नित्यं मत्समीपवर्तिना भाव्यं यतः कारणाद्वह्वपायं रौद्रसत्वनिषेवितं वनं गुरूणामपि सत्वानामसेव्यं कुतः शष्पभोजिनाम्" । एवमुक्त्वा सकलमृगपरिवृतो यमुनाकच्छमवतीर्य्य उदकग्रहणं कृत्वा स्वैरेच्छया तदेव वनं प्रविष्टः । ततश्च करटकदमनकनिक्षिप्तराज्यभारः

Splitting of Sandhis

स्तोकेन+उन्नतिम्+आयाति स्तोकेन+आयाति+अधोगतिम्— ततः+च इदम्+आह अविवेकः+अस्मद्भूप परिषोत्सर्गम्+ आचर् तत्+श्रुत्वा तम+उवाच किम्+अप्रस्तुतम् अहम्+ एवंविधम् किञ्चित्+जल्पितम् तत्+न=तन्न निद्रापरवशस्य+ इति यत्+मया असंभाव्यः+मम तत्+मया तादृक्+पुरुषाणाम्+ एवंविधम् एवम्+अनेकधा+विभृश्य अतः+अहम् एवम्+एव+ एतत् एवम्+अभिहिते दमनकः+तम्+आदाय पिङ्गलकसकाशम्+ अगमत् संजीवकः+अपि पिङ्गलकः+अपि दक्षिणपाणिम्+ उपरि मानपुरःसरम्+उवाच कुतः+त्वम्+अस्मिन् समायातः+ असि तेन+अपि तत्+श्रुत्वा तम्+उवाच अन्यत्+च बहु+ अपायम् गुरूणाम्+अपि सत्वानाम्+असेव्यम् एवम्+उक्त्वा यमुनाकच्छम्+अवतीर्य तद्+एव ततः+च

Splitting of Compounds.

तुला सहिता यष्टिः राज्ञः कुलम् T·C· संमार्जनस्य क्रिया T·C· द्यूते आसक्तः तस्य T·C· रात्रौ जागरणम् तेन T·C· निद्रायां परवशः T·C· अन्यत् जन्म=जन्मान्तरम् पुरीषस्य उत्सर्गः T·C· तादृशव्रते पुरुषाश्च K·C· राज्ञः कृत्यानि T·C· पौरस्य कृत्यानि T·C· निजाङ्गवस्त्राभरणानि आदिः येषाम् B·C· पिङ्गलकस्यसकाशम् T.C· (विनयेन सह वर्तते यस्मिन् कर्मणि तत् यथा भवति तथा सविनयम्) नखकुलिशेन अलङ्कृतम् आत्मनः वृत्तान्तः T·C· दक्षिणश्चतम् पाणिञ्च K·C· पञ्चरेण परिरक्षितः T·C· रौद्रसत्वैः निषेवितम् T·C· न सेव्यम् असेव्यम् T·C· शष्पाणाम् भोजिनः T·C· सकलमृगैः परिवृतः T·C· करटकदमनकयोः निक्षिप्तः राज्यभारः येन B·C·

Parsing

कुर्वन् pre. P· कृ उवाच S· perfect· वच् विभृश्य I·P·P· भृश्+वि कर्तव्यम् pot· P· कृ प्रणम्य I·P·P· नम्+प्र निवेदितम् P·P·P· विद्+नि मेतव्यम् pot· P· भिद् अवतीर्य I.P.P· तृ+अव प्रविष्टः P·P·P· विश्+प्र.

Meaning

पुरीष=பலம் चर्भटी=முருக்கு व्यतिकरः=நிகழ்ச்சி वराक=அப்பாவி प्रमाणम्=பொருப்பாளி ककुद्=திமில் शष्पम्=புல் कच्छ=ஈரமண்பூமி.

संजीवकेन सह सुभाषितगोष्ठीमनुभवन्नास्ते।
अथवा साम्विदमुच्यते—

यदृच्छयाप्युपनतं सकृत्सज्जनसंगतम्।
भवत्यजरमत्यंतं नाभ्यासक्रममीक्षते॥ 162

संजीवकेनापि अनेकशास्त्रावगाहनात् उत्पन्नबुद्धिप्रागल्भ्येन स्तोकैरेवाहोभिर्मूढमति पिंगलकस्तथा धीमान् कृतो यथारण्यधर्माद्धि योज्य ग्राम्यधर्मेषु नियोजितः। किं बहूना, प्रत्यहम् पिंगलकसंजीवकावेव केवलं रहसि मन्त्रयतः। शेषः सर्वोऽपि मृगनो दूरिभूतस्तिष्ठति। करटकदमनकावपि प्रवेशम् न लभेते। अन्यच्च सिंहपराक्रमाभावात्सर्वेऽपि मृगजनस्तौ च शुगालौ क्षुधाव्याधिता एकां दिशमाश्रित्य स्थिताः।

उक्तञ्च—

फलहीनं नृपं भृत्याः कुलीनमपि चोन्नतम्।
संत्यज्यान्यत्र गच्छन्ति शुष्कम् वृक्षमिवाण्डजाः॥ 163

अपि सम्मानसंयुक्ताः कुलीना भक्ततत्पराः।
वृत्तिभंगान्महीपालं त्यजन्त्येव हि सेवकाः॥ 164

कालातिक्रमणं वृत्तेर्यो न कुर्वीत भूपतिः।
कदाचित्तं न मुंचन्ति भर्सिता अपि सेवकाः॥ 165

तथा नु केवलं सेवका इत्थम्भूता यावत् समस्तमपि एतज्जगत् परस्परं भक्षणार्थं सामादिभिरूपायै स्तिष्ठन्ति। तद्यथा—

देशानामुपरि क्षमाभृदातुराणां चिकित्सकाः।
वाणिजो ग्राहकाणां च मूर्खाणामपि पण्डिताः॥ 166

प्रमादिनाम् तथा चौरा भिक्षुका गृहमेधिनाम्।
गणिकाः कामिनां चैव सर्वलोकस्य शिल्पिनः॥ 167

सामादिसज्ञितैः पाशैः प्रतीक्षन्ते दिवानिशम्।
उपजीवन्ति शक्त्या हि जलजा जलदानिव॥ 168

Splitting of Sandhis.

सुभाषितगोष्ठीम्+अनुभवन्+आस्ते साधु+इदम्+उच्यते यदृच्छया +अपि+उपनतम् भवति+अजरम्+अभ्यासक्रमम्+ ईक्षते संजीवकेन+अपि स्तोकै+एव+अहोभिः पिंगलक'+तथा अरण्यधर्मात्+वियोज्य पिंङ्गलकसंजीवकौ+एव सर्वः+अपि मृग-जनः+दुरिभूतः+तिष्ठ करटकदमनकौ+अपि अन्यत्+च सिंह-पराक्रमाभावात्+सर्वः+अपि मृगजनः+तौ क्षुधाव्याधिताः+एकाम् कुलीनः+अपि+च+उन्न वृत्तिभङ्गात्+महिपालम् त्यजन्ति+एव वृत्तेः+यः कदाचित्+तम् समस्तम्+अपि एतत्+जगत् सामा-दिभिः+उपायै+तद्+यथा देशानाम्+उपरि क्षमाभृत्+आतुराणाम् मुर्वीणाम्+अपि च+एव जलदान्+इव

Splitting of Compounds

सज्जनानाम् सङ्गतम् T·C न विद्यते जरा यस्य तत् अजरम् B· C अभ्यासस्य क्रमः तम् T· C· अनेकशास्त्राणाम् अवगाहनम् तस्मात् T·C उत्तमम् बुद्धिप्रागल्भ्यम् यस्य तेन B C अरण्यस्य धर्मः तस्मात् T·C ग्राम्यश्चासौ धर्मश्च ग्राम्यधर्मः K· C पिंगलकश्च संजीवकश्च=पि कौ D· C· करटकश्च दमनकश्च करटकदमनकौ D· C· सिंहपराक्रमस्य अभावः तस्मात् T·C क्षुधया व्याधिता क्षुधा=ताः T·C संमानेन संयुक्ताः संमानसंयुक्ताः T· C वृत्तेः भङ्गः तस्मात् T· C कालस्य अतिक्रमणम् T·C सामादिना सज्ञितैः T· C

Parsing.

आस्ते pre III S· आस् उच्यते pass, pre III S वच् उपनतम् P P P· नम्+उप वियोज्य co I P P युज् with वि नियोजितः co P P P युज् with नि आश्रित्या I P P श्रि+आ कुर्वीत pot III· S कृ प्रतीक्षन्ते pre· III P· ईक्ष् with प्रति उपजीवन्ति pre III P जीव् with उप

Meaning

सुभाषितगोष्ठी=இனிமையாக நண்பர்களுடன் பேசுதல் अभ्यास-क्रमम्=அடிக்கடி பழகவேண்டுமென்னும் முறையை प्रागल्भ्येन=திற மையினால் अरण्यधर्म=காட்டுவாழ்க்கைமுறை ग्राम्यधर्म=கிராம வாழ்க்கைமுறை क्षुधाव्याधिता=பசிப்பிணியுற்று अण्डज=பறவை वृत्तिभङ्गात्=வேலை இல்லையேல் आतुर=நோயாளி जलदान्=மேக ங்களை.

अथवा साध्विदमुच्यते—

सर्पाणाम् च खलानाम् च परद्रव्यापहारिणाम् !
अभिप्राया न सिध्यन्ति तेनेदं वर्तते जगत् !!

अन्तुं वांछति शाम्भवो गणपतेराखुं क्षुधार्तःफणी
तं च क्रौंचरिपोः शिखी गिरिसुतासिंहोऽपि नागाशनम् !
इत्थं यत्र परिग्रहस्य घटनाशम्भोरपि स्याद् गृहे
तत्रान्यस्य कथं न भावि जगतो यस्मात्स्वरूपं हि तत् 170

ततः स्वामिप्रसादरहितौ क्षुत्क्षामकण्ठौ परस्परं करटक दमनकौ मंत्रयेते । तत्र दमनको ब्रूते—"आर्य करटक ! आवां तावप्रधानताम् गतौ । एष पिंगलकः संजीवकानुरक्तः स्वाव्यापारपराङमुखः संजातः । सर्वोऽपि परिजनोगतः । तत्किं क्रियते" करटक आह—"यद्यपि त्वदीयवचनं न करोति, तथापि स्वामी स्वदोषनाशाय वाच्य ।

उक्तञ्च—

अशृण्वन्नपि बोद्धव्यो मंत्रिभिः प्रथिवीपतिः
यथा स्वदोषनाशाय विदूरेणाम्बिकासुतः !! 171

तथा च—

मदोन्मत्तस्य भूपस्य कुञ्जरस्य च गच्छतः !
उन्मार्गं वाच्यतां यान्ति महामात्राः समीपगाः !! 172

तत् त्वया एष शल्यभोजी स्वामिनः सकाशमानीतस्तत्स्वहस्तेन अङ्गाराः कर्षिताः" । दमनक आह—" सत्यमेतत् । ममायं दोषो न स्वामिनः । उक्तं च—

जम्बूको हुडुयुद्धेन वयं चापाढभूतिना !
दूतिका परकार्य्येण त्रयो दोषाः स्वयंकृताः !! 173

करटक आह—" कथमेतत् ?? सोऽब्रवीत्—

कथा 4

अस्ति कस्मिंश्चिद्विक्तप्रदेशे मठायतनम् । तत्र देवशर्मा नाम परिव्राजकः प्रतिवसति स्म । तस्य अनेकसाधुजनदत्तसूक्ष्मवस्त्रविक्रयवशात् कालेन महति वित्तपात्रा सञ्जाता । ततः स न कस्यचिद्विश्वसिति । तत्तन्दिनं कक्षान्तरात्तौ मात्रां न मुञ्चति ।

Splitting of Sandhis

साधु+इदम्+उच्यते तेन+इदम् गणपतेः+आखुम् गिरिसुता-सिंहः+अपि शम्भोः+अपि तत्र+अन्यस्य दमनकः+ब्रूते तावत्+अप्रधानताम् सर्वैः+अपि उक्तम्+च अश्रृण्वन्+अपि विदुरेण+अम्बिका स्वामिनः+सकाशम्+आनीतः+तत् सत्यम्+एतत् मम+अयम् च+आषाढभूतिना त्रयः+दोषाः कथम्+एतत् 4 - कथा कस्यचित्+विश्वसिति कक्षान्तरात्+ताम्

Splitting of Compounds

परद्रव्यस्य अपहारिणः तेषाम् T·C· गणानं पतिः गणपतिः T·C· क्रौञ्चस्य रिपुः तस्य T·C· गिरिसुतायाः सिंहः T·C नागः अशनः यस्य तं B·C· स्वापिप्रसादेन रहितौ T.C करटकश्च दमनकश्च D·C· संजीवके अनुरक्तः T·C· स्वव्यापारे पराङ्मुखम् यस्य B·C· त्वदीयश्च तत् वचनश्च K·C· स्वदोषाणाम् नाश तस्मौ T·C·न श्रृण्वअश्रृण्वन् N·T·C· पृथिव्याः पतिः पृथिवीपतिः T·C· अम्बिकायाः सुतः T·C· विविक्त श्चासौ प्रवेशश्च K·C· नक्तञ्च दिवाच नक्तन्दिवम् D·C· कक्षायाः अन्तरम् तस्मात् T.C·

Parsing.

सिध्यान्ति pres. III S· सिध् अत्तुम् Infinitive· अद् वाच्छति present· III S· वाच्छ् मन्त्रयते pre· III S· मन्त्र आह pre· III S· ब्रू क्रियते passive III S· कृ वाच्यः pot· P· वच् बोद्धव्यः pot· P· यान्ति pre· III P· या कर्षिताः P.P·P. कृष् विश्वसिति pre. III S· श्वस् with वि

Mneanig

आखुम् = எலியை फणी = பாம்பு शिखी = மயில் नागाशनम् = மயிலை विदुरेण = விதுரன் (திருதராஷ்டனின் தம்பி) अम्बिकासुतः = திருதராஷ்டரன் अङ्गाराः = நெருப்புக்கொள்ளி परिव्राजक = துறவி वित्तमात्रा = பணமுடிப்பு कक्षन्तरात् = கமுக்கட்டிலிருந்து (அல்லது) உள்ளிருந்து.

अथवा साधु चेदमुच्यते—

अर्थानामर्जने दुखमर्जितानाञ्च रक्षणे ।
आय दुखं व्यये धिगर्थाः कष्टसंश्रयाः ॥ 174

अथ आषाढभूतिर्नाम परवित्तापहारी धूर्तस्तामर्थमात्रां तस्य कक्षान्तरगतां लक्षयित्वा व्यचिन्तयत्—"कथं मया अस्य इयमर्थमात्रा हर्तव्येति" । तदत्र मठे तावद्दृढशिलासञ्चयवशात् भित्तिभेदो न भवति । उच्चैस्तरत्वाच्च द्वारे प्रवेशो न स्यात् । तदेनं मायावचनैर्विश्वास्य अहं छात्रतां व्रजामि । येन स विश्वस्तः कदाचिद्विश्वागमेति ।

उक्तञ्च—

निस्पृहो नाधिकारी स्यान्नाकामी मण्डनप्रियः ।
नाविदग्धः प्रियं ब्रूयात्स्फुटवक्ता न वञ्चकः ॥ 175

एवं निश्चित्य तस्यान्तिकमुपगम्य 'ॐ नमः शिवायेतिः प्रोच्चार्य्य साष्टांगं प्रणम्य च सप्रश्रयमुवाच— "भगवन् ! असार' ससारोऽयं, गिरिनदीवेगोपमं यौवनं, तृणाग्निसमं जीवितम्, शरदभ्रच्छायासदृशा भोगाः स्वप्नसदृशो मित्रपुत्रकलत्र भृत्यवर्ग संबन्धः एवं मया सम्यक् परिज्ञातम् । तत् किं कुर्वतो मे संसार-समुद्रोत्तरणं भविष्यति" । तच्छ्रुत्वा देवशर्मा सादराह— "वत्स ! धन्योऽसि, यत्प्रथमे वयसि एवं विरक्तिभावः ।

उक्तञ्च—

पूर्वे वयसि यः शान्तः स शान्त इति मे मतिः ।
धातुषु क्षीयमाणेषु शमः कस्य न जायते ॥ 176

आदौ चित्ते ततः काये सतां सम्पद्यते जरा ।
असतां तु पुनः काये नैव चित्ते कदाचन ॥ 177

यच्च मां संसारसागरोत्तरणोपायं पृच्छसि तच्छ्रूयताम् ।
शूद्रो वा यदि वान्योऽपि चण्डालोऽपि जटाधरः ।
दीक्षितः शिवमन्त्रेण न भस्माङ्गी शिवो भवेत् ॥ 178

षडक्षरेण मन्त्रेण पुष्पमेकमपि स्वयम् ।
लिंगस्य मूर्ध्नि यो दद्यान्न स भूयोऽभिजायते ॥ 179

Splitting of Sandlis

च+इदम्+उच्यते अर्थानाम्+अर्जने दुःखम्+आर्जितानाम्+च धिग्+अर्थाः अषाढभूतिः+नाम धूर्तः+ताम्+अर्थमात्राम् इयम्+अर्थमात्रा हर्तव्या+इति तद्+अत्र भित्तिभेदः+न उच्चैस्तरत्वात्+च तद्+एनम् मायावचनै+विश्वास्य कदाचित्+विश्वासम्+एति न+अधिकारो स्यात्+न+आकामी ब्रूयात्+स्फुटवक्ता तस्य+अन्तिकम्+उपगम्य शिवाय+इति सप्रश्रयम्+उवाच संसारः+अयम् तत्+छुत्वा सादरम्+आह धन्य+असि उक्तम्+च न+एव यत्+च तत्+श्रूयताम् वा+अन्यः+अपि चण्डालः+अपि शिवः+भवेत् पुष्पम्+एकम्+अपि दद्यात्+न, भूयः+अभि

Splitting of Compounds

कष्टस्य संश्रयाः कष्टसंश्रयाः T.C. परवित्तस्य अपहारि परवित्ता पहारी T.C. अर्थस्य मात्राम् T.C. भित्तेः भेदः भित्तिभेदः T.C. मायासहितानि वचनानि माया नि K.C. मण्डने प्रियः मण्डनप्रियः T.C. स्फुटं वक्ता स्फुटवक्ता T.C. प्रश्रयेणसह-वर्तते इति सप्रश्रयम् B.C. गिरिनदीवेगेन उपमा यस्य तत् B.C. तृणाग्निना समम् तृणाग्निसमम् T.C. शरदभ्रच्छायया सदृशाः स्वप्नेन सदृशाः T.C. मित्रपुत्र कलत्र भृत्यवर्गानाम् सम्बन्धः T.C. संसारसमुद्रस्य उत्तरणम् T.C. संसारसागरोत्तरणस्य उपायः तं T.C. जटायाः धरः जटाधरः T.C.

Parsing.

उच्यते pass. III S. वच् लक्षयित्वा I.P.P. लक्ष् हर्तव्या I.P.P. हृ स्यात् pot. III S. अस् एति pre. III S. इ ब्रूयात् pot. III S. ब्रू निश्चित्य I.P.P. चि with निस् प्रोच्चार्य I.P.P. चर् with प्र+उद् परिज्ञातम् P.P.P. ज्ञा with परि कुर्वतः pre. P. कृ भवेत् pot III S. भू दद्यात् pot. III S. दा

Meaning.

आर्जन = தேடுதல் आये = வரவிலும் व्यये = செலவிலும் छात्रतां = மாணாக்கனுக अविदग्धः = மடையன் शरदभ्र = சரத்காலமேகம் जटाधर = சடைதரித்தவன் भस्माङ्गी = விபூதிப்பூச்சுடையவன் षडक्षर = பஞ்சாக்ஷரம் ஓம் என்பதையும் சேர்த்து ஷடக்ஷரம் எனக்கூறப்படும்.

तच्छ्रुत्वा आषाढभूतिस्तत्पादौ गृहीत्वा सप्रश्रयमिदमाह—"भगवन्! तर्हि दीक्षया मे अनुग्रहं कुरु"। देवशर्मा आह—"वत्स! अनुग्रहं ते करिष्यामि, परन्तु रात्रौ त्वया मठमध्ये न प्रवेष्टव्यम्। यत्कारणं निःसंगता यतीनां प्रशस्यते तव च ममापि च उक्तञ्च—

दुर्मन्त्रान्नृपतिर्विनश्यति यतिः संगात्सुतो लालनाद्
विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात्।
मैत्री चाप्रणयात्समृद्धिरनयात्स्नेहः प्रवासाश्रयात्
स्त्री गर्वादनवेक्षणादपि कृषीस्त्यागात्प्रमादाद्धनम्॥ 180

तत् त्वया व्रतग्रहणानन्तरं मठद्वारे तृणकुटीकरे शयितव्यमिति"। स आह—"भगवन्! भवदादेशः प्रमाणम्। परन्तु हि तेन मे प्रयोजनम्"। अथ कृतशयनसमयं देवशर्मा अनुग्रहं कृत्वा शास्त्रोक्तविधिना शिष्यतामनयत्। सोऽपि हस्तपादावमर्दनादिपरिचर्य्यया तं परितोषमनयत्। पुनस्तथापि मुनिः कक्षान्तरान्मात्रां न मुञ्चति। अथ एवं गच्छति काले आषाढभूतिश्चिन्तयामास—"अहो! न कथञ्चिदेष मे विश्वासमागच्छति। तत् किं दिवापि शस्त्रेण मारयामि, किं वा विषं प्रयच्छामि, किंवा पशुधर्मेण व्यापादयामि"। इत्येवं चिन्तयतस्तस्य देवशर्मणोऽपि शिष्यपुत्रः कश्चिद्ग्रामादामन्त्रणार्थं समायातः। प्राह च "भगवन् पवित्रारोपणकृते मम गृहमागम्यतामिति"। तच्छ्रुत्वा देवशर्मा आषाढभूतिना सह प्रहृष्टमनाः प्रस्थितः। अथ एवं तस्य गच्छतोऽग्रे काचिन्नदी समायाता। तां दृष्ट्वा मात्रां कक्षान्तरादवतार्य्य कन्थामध्ये सुगुप्तां निधाय स्नात्वा देवार्चनं विधाय तदनन्तरमाषाढभूतिमिदमाह—"भो आषाढभूते! यावदहं पुरीषोत्सर्गं कृत्वा समागच्छामि तावदेषा कन्था योगेश्वरस्य सावधानतया रक्षणीया" इत्युक्तवा गतः। आषाढभूतिरपि तस्मिन्नदर्शनीभूते मात्रामादाय सत्वरं प्रस्थितः। देवशर्मापि छात्रगुणानुरञ्जितमनाः सुविश्वस्तो यावदुपविष्टस्तिष्ठति, तावत्सुवर्णरोमदेहयूथमध्ये द्वुद्वयुद्धमपश्यत्। अथ रोषवशाद्द्वुद्वयुगलस्य दूरमपसरणं कृत्वा भूयोऽपि समुपेत्य ललाटपट्टाभ्यां प्रहरतो भूरि रुधिरं पतति। तच्च जम्बूको जिह्वालौल्येन रंगभूमिं प्रविश्य आस्वादयति। देवशर्मापि तदालोक्य व्यचिन्तयम्—"अहो! मन्दमतिरयं जम्बूकः यदि कथमपि अनयोः संघट्टे पतिष्यति, तन्नूनं मृत्युमवाप्स्यतीति वितर्कयामि"।

Splitting of Sandhis

तत्+श्रुत्वा आषाढभूतिः+तत्पादौ सप्रश्रयम्+इदम्+आह मम+अपि उक्तम्+च = उक्तश्च दुर्मन्त्रात्+नृपतिः + विन सङ्गात्+सुतः+लालन विप्रः+अनध्ययनात् कुतनयात्+शीलम् च+ अप्रणयात् समृद्धिः+अनयात्+स्नेहः गर्वात्+अनवेक्षणात्+अपि कृषिः+त्यागात्+प्रमादात्+धनम् शयितव्यम्+इति शिष्यतात्+ अनयत् सः+अपि परितोषम्+अनयत् पुनः+तथापि कक्षान्तरात्+ मात्राम् आषाढभूतिः+चिन्तया कथञ्चित्+एषः विश्वासम्+ आगच्छति दिवा+अपि = दिवापि इति+एवम् चिन्तयतः+तस्य देवशर्मणः+अपि कश्चित्+ग्रामात्+आमन्त्रणार्थम् गृहम्+आगम्य-ताम्+इति गच्छतः + अग्रे काचिद्+नदी कक्षान्तरात्+अवतार्य तदनन्तरम्+आषाढ़भूतिम्+इदम्+आह तावत्+एषा इति+ उक्त्वा आषाढभूतिः+अपि तस्मिन्+आदर्शनी मात्राम्+आदाय देवशर्मा+अपि यावत्+उपविष्टः+तिष्ठति तावत्+सुवर्ण हुङ्कयुद्धम्+ अपश्यत् रोषवशात्+हुङ्कयुग दूरम्+अपसरणम् भूयः+अपि प्रहरतः+भूरि तद्+च = तच्च तद्+आलोक्य मन्दमतिः+अयम् तत्+नूनम् मृत्युम्+अवाप्स्यति+इति

Splitting of Compounds

तस्य पादौ T.C. मठस्य मध्यम् T.C. दृष्टश्चतत् मन्त्रश्च T.C खलस्य उपासनम् T.C. न अध्ययनम् T.C. न प्रणयम् T.C. न नयम् T.C. प्रवासस्य आश्रयः T.C. न अवेक्षणम् T.C. वृत्तग्रहणस्य अनन्तरम् T.C. मठस्य द्वारम् T.C. भवतः आदेशः T.C. कृतः शयनसमयः यं मन्-तत्-तथा B.C. पशोः धर्मः T.C. शिष्यस्य पुत्रः T.C. प्रहृष्टम्+मनः यस्य सः प्रहृष्टमनाः B.C. कन्थायाः मध्यम् T.C. छात्रगुणैः अनुरञ्जितम् मनः यस्य सः B.C.

Parsing

समुपेत्य I.P.P. उप इ+सम्

Meaning

आषाढभूतिः=name of a person दुर्मन्त्रात् = கெட்ட ஆலோசனையினல் लालनात् = போற்றுவதனல் प्रवासाश्रयात् = வெளி நாட்டில் தங்குவதனல் कुटीरक=குடிசை समय = உடன்பாடு कन्था = பழந்துணிமுடிச்சு हुङ्क = ஆட்டுக்கடா.

क्षणान्तरे च तथैव रक्तास्वादनलौल्यान्मध्ये प्रविशंस्तयोः शिरःसम्पातं पतितो मृतश्च शृगालः । देवशर्मापि तं शोचमानो मात्रामुद्दिश्य शनैः शनैः प्रस्थितो यावदाषाढभूतिं न पश्यति, ततश्च औत्सुक्येन शौचं विधाया यावत् कन्थामालोकयति तावत् मात्रां न पश्यति । ततश्च— "हाहा ! मुषितोऽस्मीति" जल्पन् पृथिवीतले मूर्च्छया निपपात । ततः क्षणात् चेतनां लब्ध्वा भूयोऽपि समुत्थाया फूत्कर्तुमारब्धः— "भो आषाढभूते ! क्व मां वञ्चयित्वा गतोऽसि ? तद्देहि मे प्रतिवचनम्" । एवं बहु विलप्य तस्य पदपद्धतिमन्वेषयञ्छनैः शनैः प्रस्थितः । अथ एव गच्छन् सायन्तनसमये कश्चिद्ग्राममाससाद । अथ तस्माद् ग्रामात्कश्चित्कौलिकः सभार्य्या मद्यपानकृते समीपवर्तिनि नगरे प्रस्थितः । देवशर्मापि तमालोक्य प्रोवाच— "भो भद्र ! वयं सूर्य्योढा अतिथयस्तवान्तिकं प्राप्ता न कमपि अत्र ग्रामे जानामि । तद् गृह्यतामतिथिधर्मः ।

उक्तञ्च—

संप्राप्तो योऽतिथिः सायं सूर्य्योढो गृहमेधिनाम् !
पूजया तस्य देवत्वं प्रयान्ति गृहमेधिनः !! 181

तथा च—

तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता !
सतामेतानि हर्म्येषु नोच्छिद्यन्ते कदाचन !! 182

स्वागतेनाग्नयस्तृप्ता आसनेन शतक्रतुः !
पादशौचेन पितरश्चार्घाच्छम्भुस्तथातिथेः !! 183

कौलिकोऽपि तच्छ्रुत्वा भार्य्यामाह—"प्रिये ! गच्छ त्वमतिथिमादाय गृहं प्रति पादशौचभोजनशयनादिभिः सत्कृत्यत्वं तत्रैव तिष्ठ । अहं तव कृते प्रभूतं मद्यमानेष्यामि" । एवमुक्त्वा प्रस्थितः । सापि भार्य्या पुंश्चली तमादाय प्रहसितवदना देवदत्तं मनसि ध्यायन्ती गृहं प्रति प्रतस्थे । अथवा साधु चेतमुच्यते—

दुर्दिवसे धनतिमिरे दुःसञ्चारासु धनवीथीषु !
पत्युर्विदेशगमने परमसुखं जघनचपलायाः !! 184

Splitting of Sandhis

तथा+एव = तथैव लौल्यात्+मध्ये प्रविशन्+तयोः पतितः+मृत+च देवशर्मा+अपि शोचमानः+मात्राम्+उद्दि यावद्+आषाढभूतिम् ततः+च कन्थाम्+आलोकयति मुषितः+अस्मि+इति भूयः+अपि फूत्कर्तुम्+आरब्धः गतः+असि तद्+देही पद्धतिम्+अन्वेषयन्+शनैः कश्चित्+ग्रामम्+आस ग्रामात्+कश्चित+कौलिकः देवशर्मा+अपि तम्+आलोक्य अतिथयः+तव+अन्तिकं गृह्यताम्+आतिथिधर्मः य+अतिथिः भूमिः+उदकम् न+उच्छिद्यन्ते स्वाग तेन+अग्नयः+तृप्ताः पितरः + च + अर्धात्+शम्भुः+तथा+अतिथेः कौलिकः+अपि तत्+श्रुत्वा भार्याम्+आह त्वम्+अतिथिम्+आदाय तत्र+एव, मद्यम्+आनेष्यामि एवम्+उक्त्वा, सा+अपि तम्+आदाया, च+इदम्+उच्यते पत्युः + विदेशगमने

Splitting of Compounds

अन्यत् क्षणः = क्षणान्तरम् रक्तास्वादने लौल्यम् तस्मात् T. C. पदानाम् पद्धतिः ताम् T C. समीपे वर्तिं तस्मिन् T·C. अतिथीनाम् धर्मः T·C. गृहस्य मेधिनः T·C. पदयोः शौचः तेन T·C. धनेन तिमिरम् तस्मिन् T·C.

Parsing.

प्रविशन् pre. P. विश् with प्र पतितः P·P·P. पत् मृतः P·P·P. मृ शोचमानः pre. P. शुच् उद्दिश्य I. P. P. दिश् with उद् विधाय I·P·P. धा+वि आलोकयति Co.pre. III S. लोक् with आ मुषितः P·P·P. मुष् निपपात R·P. पत् with नि लब्ध्वा I·P·P. लभ् समुत्थाय I·P·P. स्था with सम् and उद् आरब्धः P·P·P. रभ् with आ संप्राप्तः P.P.P. आप् with सम् + प्र प्रयान्ति pre. III P. या with प्र प्रोवाच S. per. III S. वच्+प्र ग्रह्यताम् passive Imperative. III S. ग्रह उच्छिद्यन्ते pre III P. छिद् with उद् तृप्ता P·P·P. तृप् श्रुत्वा I·P·P. श्रु सत्कृत्य I·P·P. कृ with सद् तिष्ठ Imper. II S. आनेष्यामि II nd Future. I S. नी+आ

Meaning

मात्रा = பணமுடிச்சு

तथा च—

पर्य्यङ्केष्वास्तरणं पतिमनुकूलं मनोहरं शयनम् !
तृणमिव लघुमन्यन्ते कामिन्यश्चौर्य्यरतलुब्धाः ॥ 185

तथा च—

केलिं प्रदहति लज्जा शृङ्गारोऽस्थीनि चाटवः कटवः !
बन्धकयाः परितोषो न किञ्चिदिष्टं भवेत्पत्यौ ॥ 186

कुलपतनं जनगर्हां बन्धनमपि जीवितव्यसन्देहम् !
अङ्गीकरोति कुलटा सततं पुरपुरुषसंसक्ता ॥ 187

अथ कौलिकभार्य्या गृहं गत्वा देवशर्मणे गतास्तरणां भग्नाञ्च खट्वां समर्प्य इदमाह—"भगवान् ! यावदहं स्वसखीं ग्रामाद-भ्यागतां सम्भाव्य द्रुतमागच्छामि तावत्त्वया मद्गृहेऽप्रमत्तेन भाव्यम्" । एवमभिदाय शृंगारविधिं विधाय यावद्देवदत्तमुद्दिश्य व्रजति तावत् तद्भर्त्ता सम्मुखो मदविह्वलांगो मुक्तकेशः पदे पदे प्रस्खलन् गृहीतमद्यभाण्डः समभ्येति । तञ्च दृष्ट्वा स द्रुततरं व्याघुट्य स्वागृहं प्रविश्य मुक्तशृङ्गारवेशा यथापूर्वमभवत् । कौलि-कोऽपि तां पलायमानां कृतादभुतशृङ्गारां विलोक्य प्रागेव कर्णपर-म्परया तस्याः श्रुतापवादक्षुभितहृदयः स्वाकारं निगूहमानः सदै-वास्ते । ततश्च तथाविधं चेष्टितमवलोक्य दृष्टप्रत्ययः क्रोधवशागो गृहं प्राविश्य तामुवाच—"आः पापे ! पुंश्चलि ! क्व प्रस्थिताऽसि" । सा प्रोवाच—"अहं त्वत्सकाशादागता न कुत्रचिदपि निर्गता । कथं मद्यपानवशात् अप्रस्तुतं वदसि ? अथवा साधु चेदमुच्यते ।

वैकल्यं धरणीपातमयथोचितजल्पनं !
सन्निपातस्य चिह्नानि मद्ये सर्वाणि दर्शयेत् ॥ 188

करस्पन्दोऽम्बरत्यागस्तेजोहानिः सरागता !
वारुणीसंगजावस्था भानुनाप्यनुभूयते ॥ 189

सोऽपि तच्छ्रुत्वा प्रतिकूलवचनं वेशविपर्ययं च अवलोक्य तामाह—"पुंश्चलि ! चिरकालं श्रुतो मया तव अपवादः । तदद्य स्वयं सञ्जातप्रत्ययः तव यथोचितं निग्रहं करोमि" । इति अभि-धाय लगुडप्रहारैः तां जर्जारितदेहां विधाय स्थूणया सह दृढबन्धेन

Splitting of Sandhis

पर्थङ्गपु+आश्रयणम् पतिम्+अनुकूलम् तृणम्+इव कामिन्थः+चौर्यरत शृङ्गारः+अस्थीनि किञ्चित्+इष्टम् भवेत्+पत्यौ बन्धनम्+अपि भग्नाम्+च इदम्+आह मद्गृहे+अप्रमत्तेन एवम्+अभिधाय यावत्+देवदत्तम्+उद्दि तम्+च = तञ्च यथापूर्वम्+अभवत् कौलिकः+अपि प्राग्+एव सदा + एव + आस्ते ततः+च चिष्टितम्+अवलोक्य ताम्+उवाच प्रस्थिता+असि त्वत्सकाशात्+आगत्य कुत्रचित्+अपि च+इदम्+उच्यते धरणीपातम्+अयथो करस्पन्दः+अम्बर त्यागः+तेजोहानीः भानुना+अपि+अनुभूयते सः+अपि तत्+श्रुत्वा ताम्+आह

Splitting of Compounds.

चौर्यरते लुब्धाः T. C. कुलस्य पतनम् T. C. जीवितव्यस्य सन्देहः T.C. परपुरुषैः संयुक्ता T.C. कौलिकस्य भार्या T.C. गतम् आस्तरणम् यस्या सा B.C. स्वस्य सखी T.C. शृङ्गारस्य विधिः T.C. गृहीतं मद्यभाण्डम् येन सः B.C. मुक्तः शृङ्गारवेशः यया स B.C. कृतः अद्भुतशृङ्गरः यया सा ताम् B.C. दृष्टः प्रत्ययः येन B.C. क्रोधस्य वशगः T.C. तव सकाशात् T.C. मद्यपानस्य वशः T.C. धरण्याम् पातः T. C. अयथोचितञ्चतत् जल्पनञ्च K.C. करस्य स्पन्दः T.C. अम्बरस्य त्यागः T. C. वारुणीसङ्गेत जा T. C. प्रतिकूलञ्च तत् वचनञ्च प्रतिकूलवचनम् K. C. सञ्जातः प्रत्ययः येन सः B. C. दृढञ्च तत् बन्धञ्च K.C.

Parsing

प्रदहति pre. II S. दह् + प्र समर्थ्य I.P.P. अम् with सम् संभाव्य pot. P. भव् with. सम् अभिधाय I.P.P. with अभि उद्दिश्य I.P.P. दिश्+उद् प्रस्खलन् pre. P. स्खल् with प्र निगूहमानः pre. P. गूह् with नि उवाच Sp. III S. वच् दर्शयेत् Co. Po. III S. अभिधाय I.P.P. धा wifh अभि

Meaning

चटवः = காதல்மொழிகள் **कटवः** = கசக்கின்றன **कुलटा** = வேசிப்பெண் **खट्वा** = கட்டில் **मद्यभाण्ड** = கள்பானை **पुंश्चलि** = கற்புக்கெட்டவளே **वैकल्यम** = இடறுப்படுத்தல் **अयथोचित** – தகுதியற்ற **वारुणी** = கள் **स्थूणया** தூணைடு.

बद्ध्वा सोऽपि मदविह्वलो निद्रावशमगमत्। अत्रान्तरे तस्याः सखी नापिति कौलिकं निद्रावशगतं विज्ञाय तां गत्वा इदमाह—"सखि! स देवदत्तः तस्मिन् स्थाने त्वां प्रतीक्षते। तच्छीघ्रमागम्यताम्" इति। सा च आह—"पश्य मम अवस्थाम्। तत्कथं गच्छामि? तद्गत्वा ब्रूहि तं, कामिनं यदस्यां रात्रौ न त्वया सह समागमः"। नापिती प्राह—"सखी! ममैव वद। न अयं कुलटाधर्मः। उक्तञ्च—

विषमस्थस्वादुफलग्रहणव्यवसायनिश्चयो येषाम्।
उष्ट्राणामिव तेषां मन्येऽहं शंसितं जन्म॥ 190

तथा च—

सन्दिग्धे परलोके जनापवादे च जगति बहुचित्रे।
स्वाधीने पररमणे धन्यास्तारुण्यफलभाजः॥ 191
यदि भवति दैवयोगात्पुमान् विरूपोऽपि बन्धकी रहसी।
न तु कृच्छ्रादपि भद्रं निजकान्तं सा भजत्येव॥ 192

सा अब्रवीत्—"यदि एवं तर्हि कथय कथं दृढबन्धबद्धा सती तत्र गच्छामि? सन्निहितश्चायं पापात्मा मत्पतिः"। नापिति प्राह—"सखि मदविह्वलोऽयं सूर्य्यकरस्पृष्टः प्रबोधं यास्यति, तदहं त्वामुन्मोचयामि। मामत्मस्थाने बद्ध्वा द्रुततरं देवदत्तं सम्भाव्य आगच्छ"। सा अब्रवीत्—"एवमस्तु" इति। तदनु सा नापिती तां स्वसखीं बन्धनाद्विभोच्य तस्याः स्थाने यथापूर्वमत्मानं बद्ध्वा तां देवदत्तसकाशे सङ्केतस्थानं प्रेषितवती। तथानुष्ठिते कौलिकः कस्मिंश्चित्क्षणे समुत्थाय किञ्चिद्गतकोपो विमदस्तामाह—"हे परुषवादिनि! यदि अद्यप्रभृति गृहान्निष्क्रमणं न करोषि न च परुषं वदसि ततः त्वामुन्मोचयामि"। नापिति अपि स्वरभेदभयात् यावन्न किञ्चित् ऊचे, तावत् सोऽपि भूयोभूयस्तां तदेव आह। अथ सा यावत् प्रत्युत्तरं किमपि न ददौ तावत् स प्रकुपितस्तीक्ष्णशस्त्रमादाय नासिकामच्छिनत्। आह च "रे पुंश्चलि! तिष्ठ इदानी न त्वं भूयस्तोषयिष्यामि" इति जल्पन् पुनरपि निद्रावशमगमत्। देवशर्मा अपि वित्तनाशात् क्षुत्क्षामकण्ठो नष्टनिद्रस्तत्सर्वं स्त्रीचरितमपश्यत्। सापि कौलिकभार्य्या यथेच्छया देवदत्तेन सह सुरतसुखमनुभूय कस्मिंश्चित् क्षणे स्वगृहमागत्य तां नापितीमिदमाह—"अयि! शिवं भवत्याः? नायं पापात्मा मम गतायाः उत्थितः?"

Splitting of Sandlis

मदविह्वलः+निद्रावशम्+अगात् इदम्+आह तत्+शीघ्रम्+आगम्य मा+मा+एवम् = मामैवम् निश्चयः+येषाम् उष्ट्राणाम्+इव मन्ये+ अहन् धन्याः+तारुण्यफल विरूपः+अपि कृच्छ्रात्+अपि भजति+एवः सन्निहितः+च+अयम् मदविह्वलः+अयम् त्वाम्+ उन्मोचयामि माम्+आत्मस्थाने एवम्+अस्तु बन्धनात्+विमोच्य यथापूर्वम्+आत्मानम् तथा+अनुष्ठिते किञ्चित्+गतगोपः विमदः+ ताम्+आह गृहात्+निष्क्रमणम् त्याम्+उन्मोचयामि यावत् + न सः+अपि भूयः+मूयः+ताम् प्रकुपितः+तीक्ष्णशस्त्रम्+आदाय+नासिकाम्+अ छिनत् भूयः+तोषयिष्यामि नष्टनिद्रः+तत्सर्वम् स्त्रीचरितम्+अपश्यत् सुरतसुखम्+अनुभूय स्वगृहम्+आगत्य नापितीम् + इदम् + आह

Splitting of Compounds

मदेन विह्वलः T.C. कुलटायाः धर्मः T.C. तारुण्यस्य फलभाजः T.C. निजस्य कान्तः तं T.C. दृढबन्धेन बद्धा T.C. पापः आत्मा यस्य B.C मम पतिः T.C. सूर्यकरैः स्पृष्टः T.C. आत्मनः स्थानम् T.C. स्वस्य सखी तां T.C. देवदत्तस्य सकाशः T.C. गतः कोपः यस्मात् B.C. विगतः मदः यस्मात् विमदः B.C. परुषस्य वादिनी T.C. स्वरभेदात् भयात् T C. तीक्ष्णञ्च तत् शस्त्रञ्च तीक्ष्णशस्त्रम् K.C. नष्टा निद्रा यस्मात् B.C. स्त्रियाः चरितम् T.C. सुरतस्य सुखम् T.C.

Parsing

वद्ध्वा I.P.P. बन्धू अगमत् Ao. III S. गम् विज्ञाय I.P.P. ज्ञा + वि प्रतीक्षते pre. ईक्ष् with प्र प्राह pre. III S. ब्रू with प्र परलोके सन्दिग्धे Lo. A. जनापवादे बहुचित्रे Lo A. स्वाधीने परस्मणे Lo. A. भजाति pre. III S. कथय Impe. II S कथ् यास्यति II nd. Future. III S. उन्मोवयामि Co pre. I S मुच् + उद् विमोच्य Co. I.P.P. मुञ्चू with वि प्रेषितवती P.A.P. समुत्थाया I.P.P. स्था with सम्+उद् ददौ R. per. III S.

Meaning.

मदविह्वलः = கள்ளின் மதத்தினால் மயங்கி नापिती = அம்பட்டச்சி कामिनम् = காமநோய் பிடித்தவனை कुलटा = வேசி परस्मण = பிற புருஷன் आत्मस्थान = தனது இடம் स्वरभेदेन = குரல்வித்தியாசத்தினால் तीक्ष्णशस्त्र = கூர்மையான கத்தி नासिका = மூக்கு.

नापिती आह— "शिवं नासिकाया विना शेषस्य शरीरस्य । तद् द्रुतं मां मोचय बन्धनात्, यावन्नायं मां पश्यति येन स्वगृहं गच्छामि" । तथा अनुष्ठिते भूयोऽपि कौलिक उत्थाय तामाह— "पुंश्चलि ! किमद्यापि न वदसि । किं भूयोऽप्यतो दुष्टतरं निग्रहं कर्णच्छेदेन करोमि" । अथ सा सकोपं साधिक्षेपमिदमाह— "धिग् धिग् महामूढ ! को मां महासतीं धर्षयितुं व्यंगयितुं वा समर्थः । ततः शृण्वन्तु सर्वेऽपि लोकपालाः—

आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्चरात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम् ॥ 193

तद्यादि मम सतीत्वमस्ति मनसापि परपुरुषो नाभिलषितः ततो देवा भूयोऽपि मे नासिकां तद्रूपामक्षतां कुर्वन्तु । अथवा यदि मम चित्ते परपुरुषस्य भ्रान्तिरपि भवति मां भस्मसान्नयन्तु" । एवमुक्त्वा भूयोऽपि तमाह—"भो दुरात्मन् ! पश्य मे सतीत्व-प्रभावेण तादृशी एव नासिका संवृत्ता" । अथ असौ उल्मुकमादाय यावत्पश्यति तावत् तद्रूपां नासिकां भूतले रक्तप्रवाहश्च महान्त-मपश्यत् । अथ स विस्मितमनास्तां बन्धनाद्विमुच्य शय्यामारोप्य च चाटुशतैः पर्य्यतोषयत् । देवशर्मापि तं सर्वं वृत्तान्तमवलोक्य विस्मितमना इदमाह—

शंबरस्य च या माया या माया नमुचेरपि ।
बलेः कुम्भीनसेश्चैव सर्वास्ता योषितो विदुः ॥ 194

हसन्त प्रहसन्त्येता रुदन्त प्ररुदन्त्यपि ।
अप्रियं प्रियवाक्यैश्च ग्रहन्ति कालयोगतः ॥ 195

उशना वेद यच्छास्त्रं यश्च वेद बृहस्पतिः ।
स्त्रीबुद्धया न विशिष्येत तस्माद्रक्ष्याः कथं हिताः ॥ 196

अनृतं सत्यमित्याहुः सत्यं चापि तथानृतम् ।
इति यास्ताः कथं धीरैः संरक्ष्याः पुरुषैरिह ॥ 197

Splitting of Sandhis

यावत्+न+अयम् ताम्+आह किम्+अद्यापि भूय+अपि+अतः साधिक्षेपम्+इदम्+आह आदित्यचन्द्रौ+अनिलः+अनलः+च द्यौः+भूमिः+आपः यमः+च अहः+च+रात्रिः+च धर्म+च तत्+यदि सतीत्वम्+अस्ति मनसा+अपि परपुरुषः+न+अभि भूयः+अपि तादृग्+पाम्+अक्षताम् भ्रान्तिः+अपि भस्मसात्+ नयन्तु एवम्+उक्त्वा उल्मुकम्+आदाय रक्तप्रवाहम्+च महान्तम्+अपश्यम् वि प्रतमनाः+ताम् बन्धनात्+विमुच्य शय्याम्+आरोप्य देवशर्मा+अपि वृत्तान्तम्+अवलोक्य इदम्+ आह नमुचेः+अपि कुम्भीनसेः+च+एव सर्वाः+ताः योषितः+ विदुः प्रहसन्ति+एताः प्ररुदन्ति+अपि प्रियवाक्यैः+च यत्+ शास्त्रम् यत्+च तस्माद्+रक्ष्याः सत्यम्+इति+आहुः च+अपि तथा+अनृतम् याः+ताः = यास्ताः पुरुषैः+इह

Splitting of Compounds.

स्वस्य ग्रहम् T.C. कर्णस्य छेदः T C. कोपेन सहवर्तते यस्मिन् कर्मणितत्— अधिक्षेपेण सहवर्तते यस्मिन् तत् तथा— महांश्चासौ मूढश्च K C. महती च सा सती च K.C. आदित्यश्च चन्द्रश्च D.C. परश्चा सौ पुरुषश्च K.C. दुष्टः आत्मा यस्य B.C. रक्तस्य प्रवाहः T.C. विस्मित मनः यस्य B.C. चाटूनां शतम् तैः T.C. प्रियाणि च तानि वाक्यानि च प्रियवाक्यानि तैः K.C.

Parsing

मोचय Co. Imper. II S. उत्थाय I.P.P. स्था with उद् धर्षयितुम् Infinitive. धृष् शृण्वन्तु Imper. IIId P. श्रु जानाति pre. III S. ज्ञा अभिलषितः P.P.P. लष् with अभि विमुच्य I.P.P. मुच् with वि आरोप्य I.P.P. रुह् with आ विदुः present. III P. विद् हसन्तम् pre. P. हस् present II S. संरक्ष्याः pot. P. रक्ष् with सम्

Meaning

पुंश्चलि = ஒ கற்புக்கெட்டவளே साधिक्षेपम् = அசட்டையாக व्यंगयितुम् = அங்கீனம் செய்ய अनिल = காற்று अनल = நெருப்பு वृत्तम् = நடத்தை भस्मसात् = சாம்பலாக उलमुखम् – நெருப்புக் கொள்ளி शंबर = அசுரன் (ஓர்) नमुचि = அசுரன், ஓர் उशनाः = சுக்கிராசாரியர் कुम्भीनस = கள்வன்.

अन्यत्रपि उक्तम्—

नातिप्रसंगः प्रमदासु कार्य्यो नेच्छेद्बलं स्त्रीषु विवर्द्धमानम् !
अतिप्रसक्तैः पुरुषैर्युतास्ताः क्रीडन्ति काकैरिव लूनपक्षैः !! 198

सुमुखेन वदन्ति वल्गुना प्रहरन्त्येव शितेन चेतसा !
मधु तिष्ठति वाचि योषितां हृदये हालहलं महद्विषम् !! 199

अत एव निपीयतेऽधरो हृदयं मुष्टिभिरेव ताड्यते !
पुरुषैः सुखलेशवञ्चितैर्मधुलुब्धैः कमलं यथालिभि !! 200

अपि च—

आवर्तः संशयानामविनयभवनं पत्तनं साहसानां
दोषाणां सन्निधानं कपटशतगृहं क्षेत्रमप्रत्ययानाम् !
दुर्ग्राह्यं यन्महद्भिर्नखरवृषभैः सर्वमायाकरण्डं
स्त्रीयन्तं केन लोके विषममृतयुतं धर्मनाशाय सृष्टम् !! 201

कार्कश्यं स्तनयोर्दशोस्तरलताऽलीकं मुखे दृश्यते
कौटिल्यं कचसञ्चये प्रवचने मान्द्यन्त्रिके स्थूलता !
भीरुत्वं हृदये सदैव कथितं मायाप्रयोगः प्रिये
यासां दोषगणो गुणा मृगदृशां ताः किं नराणां प्रियाः !! 202

एताहसन्ति च रुदन्ति च कार्य्यहेतोर्विश्वासयन्ति च
परं न च विश्वसन्ति !
तस्मान्नरेण कुलशीलवता सदैव नार्य्यः श्मशानवटका
इव वर्जनीयाः !! 203

व्याकीर्णकेशरकरालमुखा मृगेन्द्रा नागाश्च
भूरिमदराजिविराजमानाः !
मेधाविनश्च पुरुषाः समरेषु शूराः स्त्रीसन्निधौ
परमकापुरुषा भवन्ति !! 204

कुर्वन्ति तावत्प्रथमं प्रियाणि यावन्न जानन्ति नरं
प्रसक्तम् !
ज्ञात्वा च तं मन्मथपाशबद्धं ग्रस्तामिषं
मीनमिवोज्झन्ति !! 205

Splitting of Sandhis

अन्यत्र+अपि न+अतिप्रसङ्गः न+इच्छेत्+बलम् पुरुषैः+युता+ताः काकैः+इव प्रहरन्ति+एव महत्+विषम् निपीयते + अधरः मुष्टिभिः+एव सुखलेशवञ्चितैः+मधु यथा+अलिभिः संशयनाम्+ अविनयभवन क्षेत्रम् + अप्रत्ययानाम् यत् + महाद्भिः + नरवर विषम्+अमृतयुतम् स्तनयोः+दशोः+तरलता+अलीकम् सदा+एव दोषगुणः+गुणाः एताः+दसन्ति कार्यहेतोः+विश्वास तस्मात् + नरेण श्मशानवटकाः+इव नागाः+च मेधाविनः+च परमकापुरुषाः+भवन्ति यावत्+न= यावन्न मीनम्+इव + उद्धरन्ति

Splitting of Compounds.

लूनौ पक्षौ यस्य B.C. सुखलेशेन वञ्चिताः तैः T.C. मधुनि लब्धाः तैः T.C. अविनयानाम् भवनम् T.C. कपटशतानाम् गृहम् T.C. न प्रत्ययानि तेषाम् N. T. C. नखराः वृषभा इव तैः K.C. सर्वमायानाम् करण्डम् T. C. स्त्रीषु रत्नम् स्त्रीरत्नम् T. C. अमृतेन युतम् अमृतयुतम् T.C. धर्मस्य नाशाः तस्मै T.C. मायानाम् प्रयोगः T.C. मृगस्येव दृग् यासां तासाम् B.C. कार्यस्य हेतुः तस्य T.C. श्मशाने वटकाः T.C. भूरिमदराजिन् विराजमानः T.C. स्त्रीणाम् सन्निधौ T.C. परमश्चासौ कापुरुषाश्च K.C. मन्मथपाशेन बद्धः तम् T.C.

Parsing

विवर्धमानम् pre. P. वर्ध् with वि निपीयते passive. pre. III S. पा with नि दश्यते pssive. III S. दृश् विश्वासयन्ति Co. pre. III P. श्वस् with वि विश्वसन्ति pre. III P. श्वस् with वि वर्जनीयाः pot. P. वर्ज् उद्धरन्ति pre. III P. हृ with उद्.

Meaning

प्रमादासु=பெண்களிடம் लूनपक्ष=செட்டைமுறிந்த वल्गुना= அழகான अधर = கீழ்உதடு अलि = வண்டு आवर्तः—சுழி करण्डम्=கடகம் कार्कश्यम्=கடினத்தன்மை तरलता=விருளி श्मशानवटका = மயான ஆலமரம்आमिष = இறைச்சி.

समुद्रवीचीव चलस्वभावाः सन्ध्याभ्ररेखेव मुहूर्तरागाः ।
स्त्रियः कृतार्थाः पुरुषं निरर्थं निष्पीडितालक्तकवत्यजन्ति ॥ 206

अनृतं साहसं माया मूर्खत्वमतिलोभता ।
अशौचं निर्दयत्वञ्च स्त्रीणां दोषाः स्वभावजाः ॥ 207

सम्मोहयन्ति मदयन्ति विडम्बयन्ति
निर्भर्त्सयन्ति रमयन्ति विषादयन्ति ।
एताः प्रविश्य सरलं हृदयं नराणां
किं वा न वामनयना न समाचरन्ति ॥ 208

अन्तर्विषमया ह्येता बहिश्चैव मनोरमाः ।
गुञ्जाफलसमाकारा योषितः केन निर्मिताः ॥ 209

एवं चिन्तयतस्तस्य परिव्राजकस्य सा निशा महता कृच्छ्रेण अतिचक्राम । सा च दूतिका छिन्ननासिका स्वगृहं गत्वा चिन्तयामास ।—"किमिदानीं कर्तव्यम् । कथमेतत् महच्छिद्रं स्थगयितव्यम्" । अथ तस्या एवं विचिन्तयन्त्या भर्त्ता कार्यवशाद्राजकुले पर्युषितः । प्रत्यूषे च स्वगृहमभ्युपेत्य द्वारदेशस्थो विविधपौरकृत्यौत्सुकतया तामाह— "भद्रे शीघ्रमानीयतां क्षुरभाण्डं येन क्षौरकर्मकरणाय गच्छामि । सापि छिन्ननासिका गृहमध्यस्तितैव कार्य्यकरणापेक्षया क्षुरभाण्डात्क्षुरमेकं समाकृष्य तस्य अभिमुखं प्रेषयामास । नापितोऽपि उत्सुकतया तमेकं क्षुरमवलोक्य कोपाविष्टः सन् तदाभिमुखमेव तं क्षुरं प्राहिणोत् । एतस्मिन्नन्तरे सा दुष्टा ऊर्ध्वबाहू विधाय फूत्कर्तुमना गृहात् निश्चक्राम— "अहो ! पश्यत पापेन अनेन मम सदाचारवर्तिन्याः नासिकाच्छेदो विहितः । तत्परित्रायतां परित्रायताम्" । अत्र अन्तरे राजपुरुषाः समभ्येत्य तं नापितं लगुडप्रहारैर्जर्जरीकृत्य दृढबन्धनैर्बद्ध्वा तया छिन्ननासिकया सह धर्माधिकरणस्थानं नीत्वा सभ्यान् ऊचुः— "शृण्वन्तु भवन्तः सभासदः । अनेन नापितेन अपराधं विना स्त्रीरत्नमेतद्वचङ्कितं तदस्य यत् युज्यते तत् क्रियताम्" ।

Splitting of Sandhis

समुद्रवीची+इव सन्ध्या भ्ररेखा+इव अलक्तवत्+त्यजन्ति निर्दयत्वम्+च हि+एताः मूर्खत्वम्+अतिलोभना अन्तः+विषमयाः बहिः+च+एव चिन्तयतः+तस्य किम्+इदानीम् कथम्+एतत् महत्+छिद्रम् विचिन्तयन्त्याः+भर्ता कार्यवशात्+राजकुले स्वग्रहम्+अभ्युपेत्य ताम्+आह शीघ्रम्+आनीयताम् सा+अपि= सापि ग्रहमध्यस्थिता + एव क्षुरभाण्डात् + क्षुरम् + एकम् नापितः+अपि तम्+एकम् क्षुरम्+अवलोक्य तदभिमुखम्+एव एतस्मिन्+अन्तरे फूत्कर्तुमनाः+ग्रहात् लगुडप्रहारैः+जर्जरी दृढबन्धनैः+बध्वा स्त्रीरत्नम्+एतत्+व्यङ्गितम्

Splitting of Compounds

समुद्रस्य वीची T·C· चलन स्वभावः यासां ताः B·C· मुहूर्तं रागः यासां B·C. कृतः अर्थः यासां B.C· निष्पीडितश्च तत् आलक्तकश्च K·C· नि....आलक्तकमिव वामे नयने यासां ताः B.C· गुञ्जफलेन समः आकारः यासां ताः B·C· छिन्ना नासिका यस्या सा B·C· राज्ञः कुलम् T·C· द्वारदेशे स्थः T·C· विविधपौरकृत्येषु उत्सुकता तया T·C· क्षुरस्य भाण्डम् T·C· क्षौरकर्मणः+करणम् T·C· छिन्ना नासिका यस्याः सा छिन्ना-सिका B·C· ग्रहमध्ये स्थिता T·C· कार्यकरणस्य अपेक्षा T·C कोपेन आविष्टः T·C· ऊर्ध्वम् बाहू यस्याः सा ऊर्ध्वबाहू B·C· नासिकायाः छेदः T·C· लगुडैः प्रहारः T·C. विगतानि अङ्गानि यस्य तत् B·C·

Parsing

मदयन्ति Di· N· pre· III P· विडम्बयन्ति Di. N· pre. III P. विषादयन्ति Di· N· pre· III P. चिन्तयतः pre· P· चिन्तया-मास per· P. III S· पर्युषितः P·P·P· वस् with परि अभ्युपेत्य I·P·P· इ to go with अभि+उप प्रेषयामास per· perfect· III S. इष् with प्र प्राहिणोत् Imperfect· III S· हि with प्र निश्चक्राम R· per· III S· क्रम् with निस्

Meaning

सन्ध्याभ्ररेखा = சாயங்கால மேளிபொருந்திய மேசம் **गुञ्जाफल** = குந்துமணி **परिव्राजक** = துறவி **स्थगयितव्य** = மறைக்கப்படவேண்டும் **प्रत्यूष** = விடியற்காலம் **क्षुरम्** = கத்தி **लगुड** = தடி **सभ्यान्**= சபையோர்கள் **व्यङ्गित** – அங்கஹீனம்.

इति अभिहिते सभ्या ऊचुः—"रे नापित! किमर्थं त्वया भार्य्या व्यंगिता। किमनया परपुरुषोऽभिलषितः उतस्वित् प्राण-द्रोहः कृतः, किंवा चौर्य्यकर्म आचरितम्। तत् कथ्यतामस्या अपराधः?"। नापितोऽपि प्रहारपीडिततनुर्वक्तुं न शशाक। अथ तं तूष्णींभूतं दृष्ट्वा पुनः सभ्या ऊचुः—"अहो! सत्यमेतत् राजपुरुषाणां वचः। पापात्मा अयम्। अनेन इयं निर्दोषा वराकी दूषिता। उक्तञ्च—

भिन्नस्वरमुखवर्णः शङ्कितदृष्टिः समुत्पततेजाः।
भवति हि पापं कृत्वा स्वकर्मसन्त्रासितः पुरुषः॥ 210

तथा च—

आयाति स्खलितैः पादैर्मुखवैवर्ण्यसंयुतः।
ललाटस्वेदभाग् भूरि गद्गदं भाषते वचः॥ 211

अधोदृष्टिर्भवेत्कृत्वा पापं प्राप्तः सभां नरः।
तस्माद्यत्नात्परिज्ञेयश्चिह्नैरेतैर्विचक्षणैः॥ 212

अन्यच्च—

प्रसन्नवदनो हृष्टः स्पष्टवाक्यः सरोषदृक्।
सभायां वक्ति सामर्षं सावष्टंभो नरः शुचिः॥ 213

तवेष दुष्टचरित्रलक्षणो दृश्यते। स्त्रीधर्षणात् वध्य इति। तच्छूलमारोप्यताम्" इति। अथ वध्यस्थाने नीयमानं तमवलोक्य देवशर्मा तान् धर्माधिकृतान् गत्वा प्रोवाच—"भो भो! अन्यायेन एष वराको वध्यते। नापितः साधुसमाचार एषः। तत् श्रूयतां मे वाक्यम्। "जम्बुको हुडयुद्धेन" इति। अथ ते सभ्याः ऊचुः—"भो भगवन्! कथमेतत्?" "ततो देवशर्मा तेषां त्रयाणमपि वृत्तान्तं विस्तरेण अकथयत्। तदाकर्ण्य सुविस्मितमनसस्ते नापितं विमोच्य मिथः प्रोचुः—"अहो!—

अवध्यो ब्राह्मणो बालः स्त्री तपस्वी च रोगभाक्।
विहिता व्यंगिता तेषामपराधे महत्यपि॥ 214

Splitting of Sandhis

सभ्या+ऊचुः किम्+अनया परपुरुषः+अभिलषितः कथ्यताम्+अस्याः नापितः+अपि पीडिततनुः+वक्तुम् सत्यम्+एतत् उक्तम्+च पादैः+मुखवैवर्ण्य अधोदृष्टिः+भवेत्+कृत्वा तस्मात्+यत्नात्+परिज्ञेयः+चिह्नैः+एतैः+विचक्षणैः प्रसन्नवदनः+दृष्टः तद्+एषः लक्षण+दृश्यते वध्यः+इति तत्+शूलम्+आरोप्यताम् तम्+अवलोक्य जम्बुकः+हुडुयुद्धेन त्रयाणाम्+अपि तद्+आकर्ण्य सुविस्मितमनसः+ते अवध्यः+ब्राह्मणः+बाल तेषाम्+अपराधे महति+अपि

Splitting of Compounds

परश्चासौ पुरुषश्च K.C. प्राणस्य द्रोहः K.C. चौर्यञ्च तत् कर्मच K.C. प्रहारैः पीडितः तनुः यस्य सः B.C. राज्ञः पुरुषाः तेषाम् T.C. भिन्नौ खरमुखवर्णौ यस्य सः B.C. शङ्किता दृष्टिः यस्य सः B.C. समुत्पतितम् तेजः यस्य सः B.C. स्वकर्मणा सन्त्रासितः T.C. मुखवैवर्ण्येन संयुतः T.C. ललाटे स्वेदभाक् T.C. अधः दृष्टिः यस्य सः B.C. प्रसन्नम् वदनम् यस्य सः B.C. स्पष्टम् वाक्यं यस्य सः B.C. सरोषा दृग् यस्य सः B.C. दुष्टचरित्रस्य लक्षणः T.C. स्त्रियः धर्षणम् तस्मात् C.C. साधु समाचारः यस्य सः B.C. हुडुनाम् युद्धम् तेन T.C. सुविस्मितम् मनः यस्य तस्य B.C.

Parsing

अभिहिते P.P.P. धा with अभि अभिलषितः P.P.P. लष् with अभि कथ्यताम् Imper. III S. त्रासितः Co. P.P.P. त्रस् नीयमानम् passi. pr. P. प्रोवाच S. per. III S. वच् with प्र श्रूयताम् Imper. III S. श्रु विमोच्य Co. I.P.P. मुच्चू with वि विहिता P.P.P. धा with वि

Meaning

नापितः=அம்பட்டன் उतस्वित् = அல்லது स्खलित = இடறுப்படுதல் ललाट = நெற்றி विचक्षणैः =அறிவாளிகளால் सामर्षम्-கோபத்துடன் धर्ष = அவமதித்தல் हुडुयुद्ध = விடாச்சண்டை मिथः = இரகசியமாக वध्यस्थान = கொலைக்களம் धर्मधिकृत = தர்மாதிகாரிகள் व्यंगित = அங்கஹீனம் वि+अङ्कित —·

तदस्या नासिधाच्छेदः स्वकर्मणा हि संवृत्तः । ततो राजनिग्रहस्तु कर्णच्छेदः कार्य" । तथानुष्ठिते देवशर्मापि वित्तनाशसमुद्भूतशोकरहितः पुनरपि स्वकीयं मठायतनं जगाम । अतोऽहं ब्रवीमि—"जम्बुको हुडुयुद्धेन" इति ।

करटक आह—"एवंविधे व्यतिकरे किं कर्तव्यमावयोः" । दमनकोऽब्रवीत्—"एवंविधेऽपि समये मम बुद्धिस्फुरणं भविष्यति, येन सञ्जीवकं प्रभोर्विश्लेषयिष्यामि ।

उक्तञ्च—

एकं हन्यान्न वा हन्यादिषुर्मुक्तो मनुष्मता ।
बुद्धिर्बुद्धिमतः सृष्टा हन्ति राष्ट्रं सनायकम् ॥ 215

तदहं मायाप्रपञ्चेन गुप्तमाश्रित्य तं स्फोटयिष्यामि"। करटक आह—"भद्र ! यदि कथमपि तव मायाप्रवेशं पिंगलको ज्ञास्यति सञ्जीवको वा तदा नूनं विघात एव" । सोऽब्रवीत्— "तात ! नैवं वद । गूढबुद्धिभिरापत्काले विधुरेऽपि दैवेबुद्धिः प्रयोक्तव्या । नोद्यमस्त्याज्यः । कदाचित् घुणाक्षरन्यायेन बुद्धेः साम्राज्यं भवति ।

उक्तञ्च—

त्याज्यं न धैर्यं विधुरेऽपि दैवे धैर्यात्कदाचिस्थितिमाप्नुयात्सः ।
याते समुद्रेऽपि हि पोतभंगे सांयात्रिको वाञ्छति कम एव ॥ 216

तथा च—

उद्योगिनं सततमत्र समेति लक्ष्मीर्दैवं हि दैवमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः ॥ 217

तथैव ज्ञात्वा सुगूढबुद्धिप्रभावेण यथा तौ द्वौ अपि न ज्ञास्यतः तथा मिथो वियोजयिष्यामि ।

उक्तञ्च—

सुगुप्तस्यापि दम्भस्य ब्रह्माऽप्यन्तं न गच्छति ।
कौलिको विष्णुरूपेण राजकन्यां निषेवते ॥ 218

Splitting of Sandlis

तद्+अस्य॰ ततः+राजनिग्रह॰+तु तथा+अनुष्ठिते देवशर्मा+अपि अतः+अहम् जम्बुक॰+हुडु कर्तव्यम्+आवयोः दमनकः+अब्रवीत् एवंविधे+अपि प्रभोः+विश्लेषयामि हन्यात्+न हन्यात्+इषुः+मुक्तः बुद्धि+बुद्धिमतः तद्+अहम् गुप्तम्+आश्रित्य संजीवकः+वा विधातः+एव सः+अब्रवीत् न+एवम् गूढबुद्धिभिः+आपत् विधुरे+अपि न+उद्यम॰+त्याज्यः धैर्यात्+कदाचित्+स्थितिम्+आप्नुयात्+सः+समुद्रे+अपि सततम्+अत्र लक्ष्मीः+दैवं दैवम्+इति पौरुषम्+आत्मशक्त्या कः+अत्र तथा+एव सुगुप्तस्य+अपि ब्रह्मा+अपि+अन्तम्

Splitting of Compounds

नासिकायाः छेदः नासिकाच्छेदः T·C· स्वस्य कर्म तेन स्वकर्मणा T·C· राज्ञाम् निग्रहः राजनिग्रहः T·C· चित्त त्रासमुद्भूतशोकेन रहितः T·C· हुडूनाम् युद्धम् तेन T·C· बुद्धेः+स्फुरणम् बुद्धि स्फुरणम् T·C· मायानाम् प्रपञ्चम् तेन T·C· पायायाम् प्रवेशः तम् T·C· घुणाक्षरस्य न्यायः तेन T·C· कुत्सिताश्चते पुरुषाश्च कापुरुषाः K·C· आत्मनः शक्तिः तया T·C· सुगूढबुद्धेः प्रभावः तेन T·C· विष्णोः रूपम् तेन T·C· राज्ञः कन्या ताम् T·C·

Parsing

संवृत्त P·P·P· वृत् with सम् जगाम R·per· III S· कर्तव्यम् pot) P. कृ आह pre· III S· ब्रू भविष्यति II nd· Future· III S· भू विश्लेषयिष्यामि II nd· Future· श्लिष् with वि हन्यात् pot· IIId· S· हन् to kill· मुक्तः P·P·P· मुच् हन्ति pre· III S· हन् गुप्तम् P·P·P· गुप् ज्ञास्यति II nd· Future· III S· ज्ञा to know· प्रयोक्तव्या pot· P· युज् with प्र वाञ्छाति pre· III S· वाञ्छ् to wish· समेति pre· III S, इ+सम् वियोजयिष्यामि Co. II nd· Future· S· युज्+वि निषेवते pre· III S· सेव् with नि

Meaning.

राष्ट्रम்=இராஜ்யத்தை मायाप्रपञ्च=மாயைவேலைகள் स्फोटयिष्यामि=கொல்லுவேன் घुणाक्षर=கிளிர்சில்பூச்சியின் எழுத்து विधुरे=கெடுதல்செய்யக்கூடியதாக पोत=கப்பல் सांयात्रिक=பிரயாணி.

करटक आह— "कथमेतत्" । सोऽब्रवीत् —

कथा 5

कस्मिंश्चिधदिष्ठाने कौलिकरथकारौ मित्रे प्रतिवसतः स्म । तत्र च तौ बाल्यात् प्रभृति सहचारिणौ, परस्परमतीव स्नेहपरौ सदा एकस्थानविहारिणौ कालं नयतः । अथ कदाचित् तत्राधिष्ठाने कस्मिंश्चिद्देवायतने यात्रामहोत्सवः संवृत्तः । तत्र च नटनर्त्तकचारणसंकुले नानादेशागतजनावृते तौ सहचारौ भ्रमन्तौ काश्चिद्राजां कन्यां करेणुकारूढां सर्वलक्षणसनाथं कञ्चुकिवर्षवरपरिवारितदेवतादर्शनार्थं समायातां दृष्टवन्तौ । अथासौ कौलिकस्तां दृष्ट्वा विषादित इव दृष्टग्रहगृहीत इव कामशरैः हन्यामानः सहसा भूतले निपपात । अथ तं तदवस्थमवलोक्य रथकारः तद्दुःखदुःखित आप्तपुरुषैस्तं समुत्क्षिप्य स्वगृहमानाययत् । तत्र च विविधैः शीतोपचारैः चिकित्सकोपदिष्टैः मन्त्रवादिभिश्चर्य्यमाणश्चिरात्कथञ्चित्सचेतनो बभूव । ततो रथकारेण पृष्टः— "भो मित्र! किमेवं त्वमकस्मात् — विचेतनः सञ्जातः । तत्कथ्यतामात्मस्वरूपम्" स आह— "वयस्य ! यदि एवं तच्छृणु मे रहस्यं येन सर्वामात्मवेदनां ते वदामि । यदि त्वं मां सुहृदं मन्यसे तत काष्ठप्रदानेन प्रसादः क्रियतां, क्षम्यतां यद्वा किंचित्प्रणयातिरेकादयुक्तं तव मयाऽनुष्ठितम्" । सोऽपि तदाकर्ण्य बाष्पपिहितनयनः सगद्गदमुवाच— "वयस्य ! यत्किंचिद्दुःखकारणं तद्वद येन प्रतिकारः क्रियते यदि शक्यते कर्तुम् ।

उक्तञ्च—

औषधार्थसुमन्त्राणां बुद्धेश्चैव महात्मनाम् !
असाध्यं नास्ति लोकेऽत्र यद्ब्रह्माण्डस्य मध्यगम् !! 219

तदेषां चतुर्णां यदि साध्यं भविष्यति तदा अहं साधयिष्यामि" । कौलिक आह— "वयस्य ! एतेषामन्येषामपि सहस्राणामुपायानामसाध्यं तत् मे दुःखम् । तस्मान्मम मरणे मा कालक्षेपं कुरु" । रथकार आह— मित्र! यद्यपि असाध्यं तथापि निवेदय । येनाहमपि तदसाध्यं मत्वा त्वया सह वह्नौ प्रविशामि । न क्षणमपि त्वद्वियोगं सहिष्ये । एष मे निश्चयः" ।

Splitting of Sandhis

करटकः+आह कथम्+एतत् सः+अब्रवीत्

कथा 5:— कस्मिंश्चित्+अधिष्ठाने परस्परम्+अतीव तत्र+अधिष्ठाने कस्मिंश्चित्+देवायतने काञ्चित्+राजकन्याम् अथ+असौ कौलिकः+ताम् तदवस्थम्+अवलोक्य आप्तपुरुषैः+तम् स्वगृहम्+आनयत् मन्त्रवादिभिः+उपचर्यमाणः+चिरात्+कथञ्चित्+सचेतनः किम्+एवम् त्वम्+अकस्मात् तत्+कथ्यताम्+आत्म तत्+शृणु सर्वम्+आत्मवेदनाम् प्रणयतिरेकात्+अयुक्तम् मया+अनुष्ठितम् सः+अपि तद्+आकर्ण्य सगद्गदम्+उवाच तद्+वद उक्तम्+च बुद्धेः+च+एव न+अस्ति लोकः+अत्र तद्+एषाम् एतेषाम्+अन्येषाम्+अपि+सहस्राणाम्+उपायानाम्+असाध्यम् तस्मात् मम येन+अहम्+अपि तद्+असाध्यम्

Splitting of Compounds

कौलिकश्च रथकारश्च कौलिकरथकारौ D·C· एकस्थाने+विहारिणौ देवस्य आयतने T·C· नटनर्तकचारणैः संकुले T·C· नानादेशागतैः जनैः आवृते T·C· देवतायाः दर्शनार्थम् तदुःखेन दुःखितः T·C· आप्ताश्चते पुरुषाश्च आप्तपुरुषाः तैः K·C· शोतस्य उपचाराः T·C· चिकित्सकैः उपदिष्टानि तैः चिकित्सकोपदिष्टैः T·C· बाष्पपिहिते नयने यस्य सः बाष्पपिहितनयनः B·C· न साध्यम् असाध्यम् T·C· तव वियोगः तम् T·C·

Parsing.

संवृत्तः P·P·P· वृ with सम्···· भ्रमन्तौ pre· P· भ्रम् दुष्टवन्तौ P.A·P· दृश् हन्यमानः passi· pre· P· निपपात R. per· III S. पत् with नि अवलोक्य I·P·P· लोक् with अव समुत्क्षिप्य I·P·P· क्षिप् with सम् and उद् आनाययत् Imperf. III S· नय् with आ शृणु Imper· II S· श्रु उवाच S· perfect· III S· क्रियते passive· III S· कृ भविष्यति IInd· Future· III S· कुरु Imper. II S· सहिष्ये IInd· Future· Ist· person· S· निवेदय Imper· IInd· S·

Meaning

अधिष्ठाने = பட்டிணத்தில் करेणुक = பெண்யானை पिहित = மறைக்கப்பட்ட सगद्गदम् = தழுதழுத்த குரலில்

कौलिक आह—"वयस्य या असौ राजअन्या करेणुकारूढा तत्र उत्सवे दृष्टा तस्या दर्शनान्तरं मकरध्वजेन ममेयमवस्था विहिता। तत् न शक्नोमि तद्वेदनां सोढुम्।

तथा च उक्तम्—

मत्तेभकुम्भपरिणाहिनि कुंकुमार्द्रे तस्याः पयोधरयुगे
रतखेदखिन्नः।
वक्षो निधाय भुजपञ्जरमध्यवर्ती स्वप्स्ये कदा क्षणहवाप्य
तदीयसंगम्॥ 220

तथा च—

रागी बिम्बाधरोऽसौ स्तनकलशयुगं यौवनारूढगर्वं
नीचा नाभिः प्रकृत्या कुटिलकमलकं स्वल्पकञ्चापि मध्यम्।
कुर्वन्त्येतानि नाम प्रसभमिह मनश्चिन्तितान्याशु खेदं
यन्मां तस्याः कपोलौ दहत इति मुहुः स्वच्छकौ तन्न युक्तम्॥
221

रथकारोपि एवं सकामं तद्वचनमाकर्ण्य सस्मितमिदमाह — वयस्य! यदि एवं तर्हि दिष्ट्या सिद्धं नः प्रयोजनम्। तदद्यैव तया सह समागमः क्रियताम्" इति। कौलिक आह—"वयस्य! यत्र कन्यान्तः पुरे वायुं मुक्त्वा न अन्यस्य प्रवेशोऽस्ति। तत्र रक्षापुरुषाधिष्ठिते तथं मम तया सह समागमः। तत् किं माम् असत्यवचनेन विडम्बयसि?"। रथकार आह—"मित्र! पश्य मे बुद्धिबलम्"। एवमभिधाय तत्क्षणात् कीलसञ्चारिणं बाहुयुगलं वायुजवृक्षदारुणा शंखचक्रगदापद्मान्वितं सकिरीटकौस्तुभमघटयत्। ततः तस्मिन् कौलिकं समारोप्य विष्णुचिह्नितं कृत्वा कीलसञ्चरणविज्ञानञ्च दर्शयित्वा प्रोवाच—"वयस्य! अनेन विष्णुरूपेण गत्वा कन्यान्तःपुरे निशीथेत राजकन्यामेकाकिनीं सप्रभूमिकप्रसादमान्तगतां मग्धस्वभावां त्वां वासुदेवं मन्यमानां स्वकीयामिथ्यावक्रोक्तिभिः रञ्जयित्वा वात्स्यायनोक्तविधिना भज"। कौलिकोऽपि तदाकर्ण्य तथारूपः तत्रः गत्वा तामाह—"राजपुत्रि! सुप्ता किं वा जागर्षि? अहं तव कृते समुद्रात् सानुरागो लक्ष्मीं विहाय एव आगतः। तत् क्रियताम् मया सह समागमः" इति।

Splitting of Sandhis

मम+इयम्+अवस्था वक्षः+विधाय क्षणम्+अवाप्य बिम्बाधरः+असौ खल्वकम्+च+अपि कुर्वन्तु+एतानि प्रसभम्+इह मनः+चिन्तितानि+आशु तत्+न+युक्तम् रथकारः+अपि तद्वचनम्+आकर्ण्य सस्मितम्+इदम्+आह तद्+अद्य+एव प्रवेश+अस्ति एवम्+अभिधाय सकिरीटकौस्तुभम्+अघटयम् विज्ञानम्+च राजकन्याम्+एकाकिनीम् कोलिकः+अपि तद्+आकार्ण्य ताम्+आह सानुरागः+लक्ष्मीम्

Splitting of Compounds

राज्ञ+कन्या T·C· करेणुकायाम् आरूढा T,C· मकरः ध्वजे यस्य B·C. कुंकुमैः आर्द्रे T·C· पयोधरयोः युगम् T·C· बिम्बमिव अधरः K·C· स्तनकलशयोः युगम् T·C· यौवनारूढः गवः यस्य B·C· कुटिलश्च तत् कमलकञ्च K·C· कामेन सह वर्तते इहि इति सकामम् B·C· तस्य वचनम् तद्वचनम् T·C· रक्षापुरुषैः अधिष्ठिते T·C· असत्यञ्च तत् वचनञ्च तेन K·C· बुद्धेः बलम् T·C· कीले सञ्चारिणम् कीलसञ्चारिणम् T·C· शंखचक्रगदापद्मै अन्वितम् T·C· किरीटकौस्तुभाभ्याम् सहितः तम् T·C· कीलसञ्चारणस्य विज्ञानम् T·C· कन्यायाः अन्तःपुरम् तस्मिन् T·C· सप्तभूमिकाप्रसादप्रान्तम् गता ताम् T·C· वात्स्यायनोक्तेन विधाना T.C. अनुरागेण सह वर्तते इति सानुरागः B·C·

Parsing

विहिता P·P·P· धा+वि सोदुम् Infi· सह खल्स्ये Future IInd· Ist· S· from· स्वप् आह present· III S. ब्रू अभिधाय I·P·P· धा with अभि अघटयत् Imperf· III S. घट् समारोप्य I·P·P· Co· रुह् with सम्+आ रञ्जयित्वा I·P·P· रञ्जू भज Imperature· II S· विहाय I·P·P. धा with वि

Meaning

करेणुका=பெண்யானை **मकरध्वज** = மன்மதன், மீனக்கொடியோன் **परिणाहिनि** = உருண்டு இருக்கின்ற **पयोधर**=கொங்கை **बिम्ब**=கொவ்வைப்பழம் **रञ्जयित्वा**=மகிழ்வித்து **वात्स्यायन**=காமசாஸ்திரத்தை இயற்றியவர் **वायुजवृक्षरु**=பாரமில்லாத மெள்ளமரம் **कीलसञ्चारिणम्** = மரகருடனில் சுஞ்சரிப்பவனுக·

सापि गरुडारूढं चतुर्भुजं सायुधं कौस्तुभोपेतमवलोक्य सविस्मया शयनादुत्थाय प्रोवाच—"भगवन्! अहं मानुषी कीटिका-ऽशुचिः भवान् त्रैलोक्यपावनो वन्दनीयश्च। तत्कथमेतत् युज्यते?" कौलिक आह—सुभगे! सत्यमभिहितं भवत्या। किंतु राधा नाम मे या भार्य्या गोपकुलप्रसूता प्रथममासीत् सा त्वमत्र अवतीर्णा। तेन अहमत्र आयातः"। इति उक्ता सा प्राह—"भगवन्! यदि एवं तत् मे तातं प्रार्थय। सोऽपि अविकल्पं मां तुभ्यं प्रयच्छति"। कौलिक आह—"सुभगे! न अहं दर्शनपथं मानुषाणां गच्छामि। किं पुनरालापकरणम्, त्वं गान्धर्वेण विवाहेन आत्मानं प्रयच्छ। नो चेत् शापं दत्वा सान्त्वयं ते पितरं भस्मसात् करिष्यामि" इति। एवमभिधाय गरुडादवतीर्य्य सव्ये पाणौ गृहीत्वा तां सभयां सलज्जां वेपमानां शय्यायामनयत् ततश्च रात्रिशेषं यावद् वात्स्यायनोक्तविधिना निषेव्य प्रत्यूषे स्वगृहमलक्षितो जगाम। एवं तस्य तां नित्यं सेवमानस्य कालो याति। अथ कदाचित् कंचुकिनः तस्या अधरोष्ठप्रवालखण्डनं दृष्ट्वा मिथः प्रोचुः—"अहो-पश्यत अस्या राजकन्यायाः पुरुषोपभुक्तायाः इव शरीरावयवा विभाव्यन्ते। तत् कथमयं सुरक्षितेऽपि अस्मिन् गृहे एवंविधो व्यवहारः। तत् राज्ञे निवेदयामः"। एवं निश्चित्य सर्वे समेत्य राजानं प्रोचुः—"देव! वयं न विद्यः। परं सुरक्षितेऽपि कन्या-न्तःपुरे कश्चित् प्रविशति। तद्देवः प्रमाणम्" इति। तच्छ्रुत्वा राजा अतीव व्याकुलितचित्तो व्यचिन्तयत्।

पुत्रीति जाता महतीह चिन्ता कस्मै प्रदेयेति
महान्वितर्कः।
दत्वा सुखं प्राप्स्यति वा न वेति कन्यापितृत्वं खलु
नाम कष्टम्॥ 222

नद्यश्च नार्य्यश्च सहक्लमभावास्तुल्यानि कूलानि
कुलानि तासाम्।
तोयैश्च दोषैश्च निपातयन्ति नद्यो हि कूलानि
कुलानि नार्य्यः॥ 223

जननीमनो हरति जातवति परिवर्द्धते सह शुचा
सुहृदाम्।
परसात्कृतापि कुरुते मलिनं दुरतिक्रमा दुहितरो
विपदः॥ 224

Splitting of Sandhis

सा+अपि = सापि कौस्तुभोपेतम्+अवलोक्य शयनात्+उत्थाय कीटिका+अशुचिः पावनः+वन्दनीयः+च तत्+कथम्+एतत् सत्यम्+अभिहितम् प्रथमम्+आसीत् त्वम्+अत्र अहम्+अत्र पुनः+आलापकारणम् एवम्+अभिधाय गरुडात्+अवतीर्य शय्यायाम्+अनयत् स्वगृहम्+अलक्षितः कालः+याति अस्याः+ राजकन्यायाः कथम्+अयम् सुररक्षिते+अपि तत्+श्रुत्वा व्याकुलितचित्तः+व्यचि पुत्री+इति प्रदेया+इति महान्+वितर्कः नद्यः+च नार्य+च सदुकूप्रभावाः+तुल्यानि तोयैः+च+दोषैः+च नद्यः+हि जननीमनः+हरति दुहितरः+विपदः

Splitting of Compounds

गरुडे आरूढः गरुडारूढः तम् T·C· कौस्तुभेन उपेतः तम् T.C· न शुचिः अशुचिः N·T·C. त्रैलोक्ये पावन. त्रैलोक्यपावनः T·C· गोपकुले प्रसूता T·C· आलापस्य कारणम् T·C· लज्जया सह वर्तते इति सलज्जा B·C. रात्रेः शेषः तम् रात्रिशेषम् T,C· वात्स्यायनोक्तश्चासौ विधिश्च K·C· न लक्षितः अलक्षितः N·T.C. अधररोष्ठप्रवालस्य खण्डनम् T·C· राज्ञः कन्या तस्याः T·C. पुरुषेण उपभुक्ता तस्याः T·C· शरीरस्य अवयवाः T·C. व्याकुलितम् चित्तम् यस्य सः T·C·

Parsing

अवलोक्य I·P·P· लोक् with अव उत्थाया I·P·P· स्था with उद् मोवाच S· per· III S· वच् with प्र आयातः P·P·P, या+आ प्राह pre· III S· ब्रू+प्र अलक्षितः P·P·P· लक्ष् समेत्य I·P·P· इ+सम् सुरक्षिते कन्यान्तःपुरे L·Ab· प्रदेया pot P· दा+प्र प्राप्स्यति IInd· Future. आप्+प्र दत्वा I·P·P· दा

Meaning

कौस्तुभ = விஷ்ணு அணிந்துகொள்ளும் மணி कीटिका=சிறுபூச்சி गोपकुल=இடையர்குலம் अविकल्पम=இன்று நாளை என்று சொல்லாது कन्यापितृत्वम्=ஓர் பெண்ணின் தந்தையாயிருக்கும் நிலை कूल=ஆற்றங்கரை कुल=வம்சம்·

एवं बहुविधं विचिन्त्य देवीं रहःस्थां प्रोवाच—"देवि! श्रूयतां किमेते कञ्चुकिनो वदन्ति। तस्य कृतान्तः कुपितो येन एतदेवं क्रियते"। देवि अपि तदाकर्ण्य व्याकुलीभूता सत्वरं कन्यान्तःपुरे गत्वा तां खण्डिताधरां नखविलिखितशरीरावयवां दुहितरमपश्यत्। आह च —"आः पापे! कुलकलङ्ककारिणि! किमेवं शीलखण्डनं कृतम्। कोऽयं कृतान्तावलोकितः त्वात्सकाशमभ्येति। तत्कथ्यतां ममाग्रे सत्यम्"। इति कोपाटोपविशङ्कटं वदन्त्यां मातरि राजपुत्री भयलज्जानतानना प्रोवाच—"अम्ब! साक्षान्नारायणः प्रत्यहं गरुडारूढो निशि समायाति। चेदसत्यं मम वाक्यम्। तत् स्व चक्षुषा विलोकयतु निगूढतरा निशीथे भगवन्तं रमाकान्तम्"। तत् श्रुत्वा सा अपि प्रहसितवदना पुलकाङ्कितसर्वाङ्गी सत्वरं गत्वा राजानमूचे—"देव! दिष्ट्या वर्द्धसे। नित्यमेव निशीथे भगवान् नारायण, कन्यकापार्श्वेऽभ्येति। तेन गन्धर्वविवाहेन सा विवाहिता। तदद्य त्वया मया च रात्रौ वातायनगताभ्यां निशीथे द्रष्टव्यो यतो न स मानुषैः सह आलापं करोति"। तच्छ्रुत्वा हर्षितस्य राज्ञस्तद्दिनं वर्षशतप्रायमिव कथञ्चित् जगाम। ततस्तु रात्रौ निभृतोभूत्वा राज्ञीसहितो राजा वातायनस्थो गगनासक्तदृष्टिः यावत्तिष्ठति तावत्तस्मिन् समये गरुडारूढं तं शङ्खचक्रगदापद्महस्तं यथोक्तचिह्नाङ्कितं व्योम्नोऽवतरन्तं नारायणमपश्यत्। ततः सुधापूरप्लावितमिव आत्मानं मन्यमानः तामुवाच—"प्रिये! नास्ति अन्यो धन्यतरो लोके मत्तस्त्वत्तश्च· यत्प्रसूतिं नारायणो भजते। तत्सिद्धाः सर्वेऽस्माकम् मनोरथाः। अधुना जामातृप्रभावेण सकलामपि वसुमतीं वश्यां करिष्यामि"। एवं निश्चित्य सर्वैः सीमाधिपैः सह मर्य्यादाव्यतिक्रममकरोत्। ते च ते मर्य्यादा व्यतिक्रमेण वर्त्तमानमालोक्य सर्वे समेत्य तेन सह विग्रहं चक्रुः। अत्रान्तरे स राजा देवीमुखेन तां दुहितामुवाच —"पुत्रि! त्वायि दुहितरि वर्त्तमानायां नारायणे भगवति जामातरि स्थिते तत् किमेवं युज्यते तत् सर्वे पार्थिवा मया सह विग्रहं कुर्वन्ति। तत् सम्बोधोऽत्र त्वया निजभर्ता यथा मम शत्रून् व्यापादयति।"

Splitting of Sandhis

किम्+एते एतत्+एवम् तद्+आकर्ण्य दुहितरम्+अपश्यत् कः+आयम्=कोऽयम् त्वत्सकाशम्+अभ्येति तत्+कथ्यताम् मम+अग्रे राज्ञात्+नारायणः वेद्+असत्यम् राजानम्+ऊचे नित्यम्+एव पार्श्वे+अभ्येति तद्+अद्य तत्+श्रुत्वा राज्ञः+तद्दिनम् प्रायम्+इव ततः+तु=ततस्तु वातायनस्थः+गगन यावत्+तिष्ठति व्योम्नः+अवतरन्तम् नारायणम्+अपश्यत् सुधापूरप्लावितम्+इव ताम्+उवाच मत्तः+त्वत्तः+च तत्+सिद्धाः+सर्वे+अस्माकम् सकलम्+अपि व्यतिक्रमम्+अकरोत् वर्तमानम्+अवलोक्य दुहितरम्+उवाच संबोध्यः+अद्य

Splitting of Compounds.

कन्यानाम् अन्तः पुरम् तस्मिन T·C· खण्डितः अधरः यस्याः सा B·C· नखविलिखिताः शरीरावयवाः यस्याः सा नख सवयवाम् B·C· कुलकलङ्कस्य कारिणीतस्याः संबुद्धिः कु णि T·C शीलस्य खण्डनम् T·C· कृतान्तेन अवलोकितः T·C· तव सकाशम् त्वत्सकाशम् T·C· कोपाटोपेन विशङ्कटम् T·C· भयलज्जाभ्याम् आनतम् आननम् यस्या सा भ तानानाम् B·C· गरुढे आरूढः T·C· रमायाः+कान्तम T·C· प्रहसितं वदनम यस्याः सा B·C· पुलकाङ्कितानि सर्वाङ्गाणि यस्याः स B· C· कन्यकायाः पार्श्वम् तस्मिन् T·C· राज्या सहितः राज्ञीसहितः T·C· गगनासक्ता दृष्टिः यया सा शङ्खचक्र गदा पद्मैः अङ्किताः हस्ताः यस्य तम् B·C· जामातः+प्रभावः तेन T·C· मर्यादायाः व्यतिक्रमः तम् T·C·

Parsing

अभ्येति pre III· S· इ+अभि समायातिpre. III S·या with सम्+आ जगम R· per· III· S· करिष्यामि II nd· Future· I st S· उवाच S· pre· III· S· वच्

Meaning.

कञ्चिकु=சேவகன் विलिखित=கிழிக்கட்ப்பட கृतान्त=யமன் रमा=இலக்குமி पुलक=மயிர்க்கூச்சல் सुधापूर=அமிர்தப்பெரு க்கு वसुमती=பூமி सीमाधिपैः=அரசர்·

ततः तया स कौलिको रात्रौ सविनयमभिहितः—"भगवन्! त्वयि जामातरि स्थिते मम तातो यच्छत्रुभिः परिभूयते तन्न युक्तम्। तत्प्रसादं कृत्वा सर्वान् तान् शत्रून् व्यापादय"। कौलिक आह—"सुभगे! कियन्मात्रास्तु एते तव पितुः शत्रवः। तद्विश्वस्ता भव। क्षणेनापि सुदर्शनचक्रेण सर्वान् तिलशः खण्डयिष्यामि"! अथ गच्छता कालेन सर्वदेशं शत्रुभिः उद्वास्य स राजा प्राकारशेषः कृतः। तथापि वासुदेवरूपधरं कौलिकमजानन् राजा नित्यमेव विशेषतः कर्पूरागुरुकस्तूरिकादिपरिमलविशेषान् नानाप्रकारवस्त्रपुष्पभक्ष्यपेयांश्च प्रेषयन् दुहितृमुखेन तमूचे— "भगवन् प्रभाते नूनं स्थानभङ्गो भविष्यति, यतो यवसेन्धनक्षयः सञ्जातः। तथा सर्वोऽपि जनः प्रहारैर्जर्जरितदेहः संवृत्तो योद्धुमक्षमः प्रचुरो मृतश्च। तदेवं ज्ञात्वा अत्र काले यदुचितं भवति तद्विधेयम्" इति। तच्छ्रुत्वा कौलिकोऽपि अचिन्तयत्— "यत् स्थानभङ्गे जाते मम अनया सह वियोगो भविष्यति। तस्मात् गरुडमारुह्य सायुधमात्मानमाकाशे दर्शयामि। कदाचित् मां वासुदेवं मन्यमानास्ते साशङ्का राज्ञो योद्धृभिः हन्यन्ते।

उक्तञ्च—

निर्विषेणापि सर्पेण कर्तव्या महती फणा।
विषं भवतु मा भूयात्फणाटोपो भयङ्करः॥ 225

अथ यदि मम स्थानार्थमुद्यतस्यः भविष्यति तदपि सुन्दरतरम्।

उक्तञ्च—

गवामर्थे ब्राह्मणार्थे स्वाम्यर्थे स्त्रीकृतेऽथवा।
स्थानार्थे यस्त्यजेत्प्राणांस्तस्य लोकाः सनातनाः॥ 226

चन्द्रे मण्डलसंस्थे विग्रह्यते राहुणा दिनाधीशः।
शरणागतेन सार्द्धं विपदपि तेजस्विनां श्लाघ्या॥ 227

एवं निश्चित्य प्रत्यूषे दत्तधावनं कृत्वा तां प्रोवाच—"सुभगे! समस्तैः शत्रुभिर्हतैरन्नं पानं च आस्वादयिष्यामि। किं बहुना त्वयापि सह सङ्गमं ततः करिष्यामि।

Splitting of Sandhis

कौलिकः+राज्ञौ सविनयम्+अभिहितः यत्+शत्रुभिः तत्+न कियन्मात्राः+तु क्षणेन+अपि कौलिकम्+अजानन् नित्यम्+एव भक्ष्योपेतान्+च तम्+ऊचे सर्वैः+अपि प्रहारैः+जर्जरित योद्धुम्+अक्षमः प्रभुरः+मृतः+च तद्+एवम् यद्+उचितम् गरुडम्+आरुह्य सायुधम्+आत्मानम्+आकाशे मन्यमानाः+ते राज्ञः+योद्धृभिः निर्विषेण+अपि भयात्+पटाटोपः स्थानार्थम्+ उद्यत गवाम्+अर्थे स्वीकृते+अथवा यः+त्यजेत्+प्राणान्+तस्य शत्रुभिः+हतैः+अन्नम् त्वया+अपि

Splitting of Compounds.

विनयेन सह वर्तते यस्मिन् कर्मणि तत् तथा भवति तथा. तस्य प्रसादः तम् तत्प्रसादम् T·C· सुदर्शनश्च तत् चक्रञ्च तेन K·C· प्राकारे शेषः T·C. वासुदेवरूपस्य धरम् T·C· स्थानस्य भङ्गः T·C· यवसेन्धनानाम् क्षयः T·C· अयुधेन सह वर्तते इति सायुधः तम् B·C· आशङ्कया सह वर्तन्ते इति साशङ्काः B·C· फणस्य आटोपः T·C· दिनस्य अधीशः T·C· शरणाय आगतः T·C· दन्तानाम् धावनम् T·C·

Parsing.

अभिहितः P.P·P· धा with अभि त्वयि जामतरि Lo· Ab· व्यापादय Imper· II S· पद् with णि+आ खण्डयिष्यामि]Ind· Future· खण्ड् Ist· S. प्रेषयन् p.r· P· इष् with प्र ऊचे S· perf· III S· वच् दर्शयामि pre· Co· Ist· S· दर्श् हन्यन्ते pass· pr· III P· हन् श्लाघ्या pot· P. श्लाघ्

Meaning

ज्ञातम्—மருமகன் तिलशः—பொடியாக जर्जरित=சிதரும்பின फल=படம் (பாம்பின்) प्रत्यूषे=விடியற்காலையில் दिनाधीशः=சூரியன் तेजस्वी=வீரன்

परं वाच्यस्त्वया आत्मपिता यत् प्रभाते प्रभूतेन सैन्येन सह नगरात् निष्क्रम्य योद्धव्यम्, अहं च आकाशस्थित एव सर्वान् तान् निस्तेजसः करिष्यामि। पश्चात्सुखेन भवता हन्तव्याः। यदि पुनरहं तान् स्वयमेव सूदयामि तत्तेषां पापात्मनां वैकुण्ठीया गतिः स्यात्। तस्मात्ते तथा कर्तव्या यथा पालयन्तो हन्यमानाः स्वर्गं न गच्छन्ति"।

सापि तदाकर्ण्य पितुः समीपं गत्वा सर्वं वृत्तान्तं न्यवेदयत्। राजापि तस्या वाक्यं श्रद्दधानः प्रत्यूषे समुत्थाय सुसन्नद्धसैन्यो युद्धार्थं निश्चक्राम। कौलिकोऽपि मरणे कृतनिश्चयश्चापपाणिर्गगनगतिर्गरुडारूढो युद्धाय प्रस्थितः। अत्रान्तरे भगवता नारायणेन अतीतानागतवर्तमानवेदिना स्मृतमात्रो वैनतेयः सम्प्राप्तो विहस्य प्रोक्तः— "भो गरुत्मन्! जानासि त्वं यन्मम रूपेण कौलिको दारुमयगरुडे समारूढो राजकन्यां कामयते?" सोऽब्रवीत्— "देव! सर्वं ज्ञायते तच्चेष्टितम्। तत् किं कुर्मः साम्प्रतम्?" श्री भगवानाह— "अद्य कौलिको मरणे कृतनिश्चयो विहितनियमो युद्धार्थं विनिर्गतः। स नूनं प्रधानक्षत्रियशराहतो निधनमेष्यति। तस्मिन् हते सर्वो जनो वदिष्यति यत्प्रभूतक्षत्रियैर्मिलित्वा वासुदेवो गरुडश्च निपातितः। ततः परं लोकोऽयमावयोः पूजां न करिष्यति। ततस्त्वं द्रुततरं तत्र दारुमयगरुडे संक्रमणं कुरु। अहमपि कौलिकशरीरे प्रवेशं करिष्यामि। येन स शत्रून् व्यापादयति। ततश्च शत्रुवधात् आवयोर्माहात्म्यवृद्धिः स्यात्"।

अथ गरुडे तथेति प्रतिपन्ने श्रीभगवान् नारायणस्तच्छरीरे संक्रमणमकरोत् ततो भगवन्माहात्म्येन गगनस्थः स कौलिकः शङ्खचक्रगदाचापाद्यङ्कितः करादेव लीलयैव समस्तानपि प्रधानक्षत्रियान् निस्तेजसश्चकार। ततस्तेन राज्ञा स्वसैन्यपरिवृतेन संग्रामे जिता निहताश्च लोकमध्ये प्रवादो यथा— "अनेन विष्णुजामातृप्रभावेण सर्वे शत्रवो निहताः" इति। कौलिकोऽपि तान् हतान् दृष्ट्वा प्रमुदितमना गगनादवतीर्णः सन् यावद्राजामात्यपौरलोकास्तं नगरवास्तव्यं कौलिकं पश्यन्ति ततः पृष्टः किमेतदिति।

Splitting of Sandhis

वाच्यः+त्वयः तस्मात्+ते तद्+आकर्ण्य राजा+अपि कोलिकः+अपि कृतनिश्चयः+चापपाणिः+गगनगतिः+गरुढ स्मृतमात्रः+वैनतेयः यत्+मम सः+अब्रवीत् तत्+चेष्टितम् श्रीभगवान्+आह निश्चयः+विहितनियमः+युद्धार्थे आहूतः+निधनम्+एष्यति प्रभूतक्षत्रियैः+मिलित्वा गरुडुः+च लोकः+अयम्+आवयोः ततः+त्वम् अहम्+अपि ततः+च आवयोः+माहात्म्य तथा+इति नारायणाः+तच्छरीरे संक्रमणम्+अकरोत् लीलया+एव समस्तान्+अपि निस्तेजसः+चकार ततः+तेन निहताः+च सर्वे+अपि जातः+च प्रवादः+यथा, शत्रवः+निहताः यावत्+राजामात्यपौरलोकाः+तम् किम्+एतत्+इति

Splitting of Compounds

आत्मनः पिता आत्मपिता T·C· निर्गतम् तेजः येषाम् ते B.C.
पापः आत्मा येषां ते तेषाम् B·C· सुसन्नद्धं सैन्यं यस्य सः B·C
कृतः निश्चयः येन सः B·C· चापः पाणौ यस्य सः B·C·
गगने गतिः यस्य सः B.C· गरुढे आरूढः गरुढारूढः T·C·
अतीतागतवर्तमानानाम् वेदी तेन T·C· राज्ञः कन्या ताम् T·C·
विहितः नियमः मन सः B·C. प्रधानक्षत्रियशरेण हतः T·C·
प्रभूताश्च ते क्षत्रियाश्च तैः K·C· दारुमयश्चासौ गरुढश्च K.C.
कौलिकस्य शरीरे T.C· माहात्म्यस्य वृद्धिः T·C·
प्रमुदितम् मनः यस्य सः B·C·

Parsing

वाच्यः pot· P· वच् निष्क्रम्य I·P·P· क्रम् with निस् योद्धव्यम् pot· P· युध् निश्चक्राम R. perf· III S· क्रम् with नि समारूढ P.P.P· रुह् with सम्+आ वदिष्यति IInd. Future· III S· वद् पलायन्तः pre. P· अया+परा प्रतिपन्ने P,P·P· पद् with प्रति निहताः P.P·P· धा with नि

Meaning

वैनतेयः=கருடன் निधनम्=மரணம் माहात्म्य=மகிமை गदा=விஷ்ணுவின் ஆயுதம் संक्रमणम्=புகுந்துகொள்தல்.

ततः सोऽपि मूलादारभ्य सर्वं प्राग्वृत्तान्तं न्यवेदयत्। ततश्च कौलिकसाहसानुरञ्जितमनसा शत्रुवधात् अवाप्ततेजसा राज्ञा सा राजकन्या सकलजनप्रत्यक्षं विवाहविधिना तस्मै समर्पिता देशश्च प्रदत्तः। कौलिकोऽपि तया सार्द्धं पञ्चप्रकारं जीवलोकसारं विषयसुखमनुभवन् कालं निनाय। अतस्तूच्यते "सुप्रयुक्तस्य दम्भस्य" इति।

तच्छ्रुत्वा करटक आह—"भद्र! अस्ति एवम्। परं तथापि महन्मे भयम्। यतो बुद्धिमान् सञ्जिवको रौद्रश्च सिंहः। यद्यपि ते बुद्धिप्रागल्भ्यं तथापि त्वं पिंगलकात् तं वियोजयितुमसमर्थ एव"। दमनक आह—"भ्रातः! समर्थ एव। उक्तञ्च—

उपायेन हि यत्कुर्यात्तन्न शक्यं पराक्रमैः।
काक्या कनकसूत्रेण कृष्णसर्पो नीपातितः॥ 228

करटक आह—"कथमेतत्" सोऽब्रवीत्—

कथा 6

अस्ति कस्मिंश्चित्प्रदेशे महान् न्यग्रोधपादपः। तत्र वायसदम्पती प्रतिवसतः स्म। अथ तयोः प्रसवकाले वृक्षविवरात् निष्क्रम्य कृष्णसर्पः सदैव तदपत्यानि भक्षयति। ततस्तौ निर्वेदात् अन्यवृक्षमूलनिवासिनं प्रियसुहृदं शृगालं गत्वा ऊचतुः—"भद्र! किमेवंविधे सञ्जाते आवयोः कर्तव्यं भवति। एवं तावत् दुष्टात्मा कृष्णसर्पो वृक्षविवरात् निर्गत्य आवयोर्बालकान् भक्षयति। तत् कथ्यतां तद्रक्षायै कश्चिदुपायः।

यस्य क्षेत्रं नदीतीरे भार्या च परसंगता।
ससर्पे च गृहे वासः कथं स्यात्तस्य निर्वृतिः॥ 229

अन्यच्च—

सर्पयुक्ते गृहे वासो मृत्युरेव न संशयः।
यद्वा भान्ते वसेत्सर्पस्तस्य स्यात्प्राणसंशयः॥ 230

अस्माकमपि तत्र स्थितानां प्रतिदिनं प्राणसंशयः"। स आह—"न अत्र विषये स्वल्पोऽपि विषादः कार्यः। नूनं स लुब्धो न उपायमन्तरेण वध्यः स्यात्।

Splitting of Sandhis

सः+अपि=सोऽपि ततः+च ततश्च देशः+च=देशश्च कोलिकः+अपि विषयसुखम्+अनुभवन् अतः+तु+उच्यते तत्+श्रुत्वा महत्+मे रौद्रः+च वियोजयितुम्+असमर्थः +एव उक्तम्+च यत्+कुर्यात्+तत्+न कृष्णसर्पः+निपातितः कथम्+एतत् सः+अब्रवीत् कस्मिंश्चित् प्रदेशे सदा+एव ततः+तौ कृष्णसर्पः+वृक्षविवरात् आवयोः+बालकान् कश्चित्+ उपायः स्यात्+तस्य अन्यत्+च वासः+मृत्युः+एव वसेत्+सर्पः +तस्य+स्यात्+प्राणसंशयः अस्माकम्+अपि स्वल्पः+अपि उपायम्+अन्तरेण।

Splitting of Compounds

कोलिकसाहसेन अनुरञ्जितं मनः यस्य B.C. शत्रोः वधः तस्मात् T.C अवाप्तम् तेजः यस्य तेन B C. राज्ञः कन्यका राजकन्यका T.C. सकलजननां प्रत्यक्षम् T. C. पञ्चप्राकाराः यस्मिन् तम् T. C. बुद्धेः प्रागल्भ्यम् T.C. कनकमञ्च तत् सूत्रञ्च तेन K.C. कृष्णश्चासौ सर्पश्च कृष्णसर्पः K. C. वायसयोः दम्पती=वायसदम्पती T.C. प्रसवस्य कालः तस्मिन T.C. वृक्षस्य विवरः वृक्षविवरः तस्मात् T.C तयोः अपत्यनि—तदपत्यानि T.C. अन्यवृक्षमूले निवासिनम् T.C. प्रियश्चासौ सुहृद्च तम् K. C तेषां रक्षा तद्रक्षा तस्यै T. C. नद्याः तीरे T.C. प्राणस्य संशयः प्राणसंशयः T.C.

Parsing.

आरभ्य I.P.P. रभ्+आ न्यवेदयम् Impert. III S. विद् with नि प्रदत्तः P.P.P. दा+प्र निनास R. perfect. III S. उच्यते passive. III. S. वच् वियोजयितुम् Infinitiwe युज् with वि Co. निष्क्रम्य I.P.P. क्रम् with नि ऊचतुः S. Perfect III. P. वच् कथ्य ताम् pass. Imp III. S. स्यात् pot. III. S. अस् वसेत् pot. III S. वस् वध्यः pot. P. हन्.

Meaning

मूलादारभ्य = அடிமுதல் सार्धम् = கூட बुद्धिप्रागल्भ्यम् = புத்தித் திறமை अपत्यानि = குர்சுகளை विषादः வருத்தம் लुब्धः = துவ்டன் or உலோபி परसंगता வியபிசாரி.

उपायेन जयो-यादृग् रिपोस्तादृग् न हेतिभिः !
उपायज्ञोऽल्पकायोऽपि न शूरैः परिभूयते !! 231

तथा च—

भक्षयित्वा बहून्मत्स्यानुत्तमाधममध्यमान् !
अतिलौल्याद्बकः कश्चिन्मृतः कर्कटकग्रहात् !! 232

तावूचतुः—"कथमेतत्"। सोऽब्रवीत्—

कथा 7

अस्ति कस्मिंश्चिद्वनप्रदेशे नानाजलचरसनाथं महत् सरः। तत्र च कृताश्रयो बक एको वृद्धभावमुपगतो मत्स्यान् व्यापादयितुमसमर्थः। ततः च क्षुत्क्षामकण्ठ सरस्तीरे उपविष्टो मुक्ताफलप्रकरसदृशैः अश्रुप्रवाहैश्चरातलमभिषिञ्चन् रुरोद। एकः कुलीरको नानाजलचरसमेतः समेत्य तस्य दुःखेन दुःखितः सादरमिदमूचे—"माम! किमद्य त्वया न आहारवृत्तिः अनुष्ठीयते? केवलमश्रुपूर्णनेत्राभ्यां सनिःश्वासेन स्थीयते"। स आह—"वत्स! सत्यमुपलक्षितं भवता, मया हि मत्स्यादनंप्रति परमवैराग्यतया साम्प्रतं प्रायोपवेशनं कृतं, तेनाहं समीपागतान् अपि मत्स्यान् न भक्षयामि"। कुलीरकः तच्छ्रुत्वा प्राह—"माम! किं तद्वैराग्यकारणम्"। स आह—"वत्स! अहम् अस्मिन् सरसि जातो वृद्धिं गतश्च। तन् मया एतत् श्रुतं यावत् द्वादशवार्षिकी अनावृष्टिः सम्पद्यते लग्ना"। कुलीरक आह—"कस्मात् तच्छ्रुतम्"। बक आह—"दैवज्ञमुखात्। यतः शनैश्चरो हि रोहिणीशकटं भित्त्वा भौमं शुक्रश्च प्रयास्यति।

उक्तश्च वराहमिहिरेण—

यदि भिन्ते सूर्यपुत्रो रोहिण्याः शकटमिह लोके !
द्वादश वर्षाणि तदा न हि वर्षति वासवो भूमौ !! 233

तथा च—

प्राजापत्ये शकटे भिन्ने कृत्वैव पातकं वसुधा !
भस्मास्थिशकलाकीर्णा कापालिकमिव व्रतं धत्ते !! 234

तथा च

रोहिणीशकटमर्कनन्दनश्चेद्भिनत्ति रुधिरोऽथवा शशी !
किं वदामि तदनिष्टसागरे सर्वलोकमुपयाति संक्षये !! 235

Splitting of Sandhis

जयः+यादृग् रिपोः+तादृग् उपायज्ञः+अल्पकायः+अपि बहून्+मत्स्यान्+उत्तम अतिलौल्यात्+बकः कश्चित्+मृतः तौ+ऊचतुः, कथम्+एतत्, सः+अब्रवीत् कस्मिंश्चित्+वनप्रदेशे कृताश्रयः+बकः वृद्धभावम् उपगतः व्यापादयितुम्+असमर्थः अश्रुप्रवाहैः+धरातलम्+अभिषिञ्चन् सादरम्+इदम्+ऊचे किम्+अद्य केवलम्+अश्रुपूर्णनेत्र सत्यम्+उपलक्षितम् तेन+अहम्=तेनाहम् तत्+श्रुत्वा तच्छ्रुत्वा गतः+च=गतश्च तत्+श्रुतम्=तच्छ्रुतम् शुक्रम्+च—शकटम्+इह+लोके वासवः+भूमौ कृत्वा+एव कापालिकम्+इव अर्कनन्दनः+ छेत्+भिनत्ति+रुधिरः+अथवा सर्वलोकम्+उपयाति

Splitting of Compounds

उत्तमाश्च अधमाश्च मध्यमाश्च तान् D·C· कर्कटकस्य ग्रहम् तस्मात् T·C· नानाजलचरैः सनाथम् T·C· क्षुद्रक्षामम् कण्ठम् यस्य सः B·C· मुक्ताफलप्रकरेण सदृशाः तैः T·C· अश्रूणाम् प्रवाहाः नानाजलचरैः समेतः T·C· निः श्वासेन सह वर्तते इति सनिः श्वासः तेन B·C· मत्स्यानाम् अदनम् T·C· समीपम् आगताः तान् T·C· वैराग्यस्य कारणम् वैराग्यकारणम् T·C· दैवज्ञानाम् मुखम् तस्मात् T·C सूर्यस्य पुत्रः सूर्यपुत्रः T·C· रोहिण्याः शकटम् T·C· अनिष्टस्य सागरे T·C·

Parssing

परिभूयते Imper form. from भू with परि ऊचतुः S· Perfect III D· वच् अभिषिञ्चन् pre· P. सिञ्च् with अभि रुरोद R· Perfect. रुद् ऊचे S Perfect· III S· लग्ना P·P·P· लगि भित्वा I·P·P· भिद् प्रयास्यति I st future III S· या with प्र भिन्ते Pre III S· भिद् वर्षति pre· III S· वर्ष् धत्ते Pre· III S· धा उपयाति Pre III S· या with उप

Meaning

हेतिभिः = பாணங்களால் कर्कटक = நண்டு जलचर = நீரில்வாழும் பிராணி सनाथम् = கூடிய दैवज्ञ = சோதிடன் वराहमिहिर = வராகமிகிரன் என்னும் சோதிடகர்த்தா अर्कनन्दनः = சனீசுவரன்.

रोहिणीशकटमध्यसंस्थिते चन्द्रमस्यशरणीकृता जनाः ।
क्वापि यान्ति शिशुपाचिताशनाः सूर्यतप्तमिदुराम्बुपायिनः ॥
236

तदेतत्सरः स्वल्पतोयं वर्तते । शीघ्रं शोषं यास्यति । अस्मिन् शुष्के यैः सह अहं वृद्धिं गतः सदैव क्रीडितश्च ते सर्वे तोयाभावात् नाशं यास्यन्ति । तत् तेषां वियोगं द्रष्टुमहमसमर्थः । तेनैतत् प्रायोपवेशनं कृतम् । साम्प्रतं सर्वेषां स्वल्पजलाशयानां जलचरा गुरुजलाशयेषु स्वस्वजनैर्नीयन्ते । केचिच्च मकरगोधाशिशुमार-जलहस्तिप्रभृतयः स्वयमेव गच्छन्ति । अत्र पुनः सरसि ये जल-चरास्ते निश्चिन्ताः सन्ति । तेनाहं विशेषात् रोदिमि यद्बीजशेष-मात्रमप्यत्र न उद्धरिष्यति" । ततः स तदाकर्ण्य अन्येषामपि जलचराणां तत् तस्य वचनं निवेदयामास । अथ ते सर्वे भयत्रस्तमनसो मत्स्यकच्छपप्रभृतयस्तमुपेत्य पप्रच्छुः— "मामः ! अस्ति कश्चिदुपायो येनास्माकं रक्षा भवति" । बक आह— "अस्ति अस्य जलाशयस्य नातिदूरे प्रभूतजलसनाथं सरः पद्मिनीखण्डमण्डितं तच्चतुर्विंशत्यापि वर्षाणामवृष्ट्या न शोषमेष्यति । तद्यदि मम पृष्ठं कश्चिदारोहति तदहं तं तत्र नयामि" ।

अथ ते तत्र विश्वासमापन्नाः 'तात ! मातुल ! भ्रातः !' इति ब्रुवाणा अहं पूर्वमहं पूर्वमिति समन्तात् परितस्थुः । सोऽपि दुष्टाशयः क्रमेण तान् पृष्ठे आरोप्य जलाशयस्य नातिदूरे शिलां समासाद्य तस्यामाक्षिप्य स्वेच्छया भक्षयित्वा भूयोऽपि जलाशयं समासाद्य जलचराणां मिथ्यावार्त्तासन्देशकैर्मनांसि रञ्जयन्नित्यमिदमाहरवृत्ति-मकरोत् । अन्यस्मिन् दिने च कुलीरकेणोक्तः— "मामः ! मया सह ते प्रथमः स्नेहसम्भाषः सञ्जातः । तत् किं मां परित्यज्य अन्यान्नयसि । तस्मादद्य मे प्राणत्राणं कुरु" ।

तदाकर्ण्य सोऽपि दुष्टाशयश्चिन्तितवान्— "निर्विण्णोऽहं मत्स्यमांसादनेन । तदद्य एनं कुलीरकं व्यञ्जनस्थाने करोमि" । इति विचिन्त्य तं पृष्ठे समारोप्य तां वध्यशिलामुद्दिश्य प्रस्थितः । कुलीरकोऽपि दूरादेवास्थिपर्वतं शिलातलमवलोक्य मत्स्यास्थीनि परिज्ञाय तमपृच्छत्— "मामः ! कियद्दूरे स जलाशयः ? मदीयभारेण अतिश्रान्तस्त्वं तत् कथय" ।

Splitting of Sandhis

चन्द्रमसि+अशरणी तत्+एतत्+सरः सदा+एव क्रीडितः+च द्रष्टुम्+अहम्+असमर्थः तेन+एतत् स्वजनैः+नीयन्ते केचित्+च स्वयम्+एव जलचराः+ते तेन+अहम् बीजशेषमात्रम्+अपि+अत्र तद्+आकर्ण्य अन्येषां+अपि मनसः+मत्स्य प्रभृतयः+तम्+ अभ्यु कश्चित्+उपायः येन+अस्माकम् यत्+चतुर्विंशत्या+अपि वर्षाणाम्+अवृष्ट्या शोषम्+एष्यति तद्+यदि कश्चित्+आरोहति तद्+अहम् विश्वासम्+आपन्नाः पूर्वम्+अहम् पूर्वम्+इति सः+अपि तस्याम्+आक्षिप्य सन्देशकैः+मनांसि रञ्जयन्+नित्यम् इव+आहारवृत्तिम् अकरोत् कुलीरकेण+उक्तः अन्यान्+नयसि तस्मात्+अद्य तद्+आकर्ण्य दुष्टाशयः+चिन्तितवान् निर्विण्णः+ अहम् तद्+अद्य वध्यशिलाम्+उद्दिश्य कुलीरकः+अपि दूरात्+एव+ अस्थि शिलाश्रयम्+अवलोक्य तम्+अपृच्छत् अतिश्रान्तः+त्वम्

Splitting of Compounds

अशरणाः कृताः अशरणीकृताः रोहिणीशकटमध्ये संस्थितः तस्मिन् T·C· तोयानाम् अभावः योयाभावः तस्मात् T·C· जले चराः जलचराः तेषाम् T·C· भयत्रस्तम् मनः येषां ते B·C· प्रभूत-जलेन सनाथम् T·C· मत्स्यमांसस्य अदनेन मत्स्यमांसादनेन T·C· दुष्टः आशयः यस्य सः B·C·

Parsing

यान्ति pre. III P· या यास्यन्ति IInd· Future· III S· नीयन्ते passive. III P· सन्ति pre· III P· अस् रोदिमि pre· I S· रुद् उज्झरिष्यामि उद्+अरिष्यामि II Futu· I S· ह्र निवेदयामास per· perfect· विद् with नि पप्रच्छुः R· perf· III P· आह pre· III S· ब्रू परि-तस्थु R. perf· III P स्थ (तिष्ठ) आरोप्य I.P.P· Co. रुह् with आ समासाद्य I·P·P· सद् with सम् and आ

Meaning

सरः = குளம் भिदुर = சூடான जलाशय = குளம் दुष्टाशय = கெட்டெண்ணமுள்ளவன் निर्विण्णः வெறுப்புற்ற कुलीरकम् = நண்டு वध्यशिला = கறி अस्थिपर्वतम् = எலும்புமலை जलचर = நீர்ப்பிராணி.

सोऽपि मन्दधीर्जलचरोऽयमिति मत्वा स्थलेन प्रभवतीति सस्मितमिदमाह—"कुलीरक! कुतोऽन्यो जलाशयः? मम प्राणयात्रे यम् तस्मात् समर्थ्यतामात्मनोऽभीष्टदेवता। त्वामपि अस्यां शिलायां निक्षिप्य भक्षयिष्यामि"। इत्युक्तवति तस्मिन् स्ववदनदंशद्वयेन मृणालनालधवलायां मृदुग्रीवायां गृहीतो मृतश्च। अथ स तां बकग्रीवां समादाय शनैः शनैः तज्जलाशयमाससाद। ततः सर्वैरेव जलचरैः पृष्टः—"भो कुलीरक! किं निवृत्तस्त्वम्?। स मातुलोऽपि न आयातः? तत् किं चिरयति? वयं सर्वे सोत्सुकाः कृतक्षणास्तिष्ठामः"। एवं तैरभिहिते कुलीरकोऽपि विहस्योवाच—"मूर्खाः! सर्वे जलचरास्तेन मिथ्यावादिना वञ्चयित्वा नातिदूरे शिलातले प्रक्षिप्य भक्षिताः। तन्मया आयुःशेषतया तस्य विश्वासघातकस्य अभिप्रायं ज्ञात्वा ग्रीवेयमानीता। तदलं सम्भ्रमेण। अधुना सर्वजलचरणां क्षेमं भविष्यति"। अतोऽहं ब्रवीमि—"भक्षयित्वा बहून् मत्स्यान्" इति॥

वायस आह—"भद्र! तत्कथय, कथं स दुष्टसर्पो वधमुपैष्यति"। शृगाल आह—"गच्छतु भवान् कञ्चिन्नगरं राजाधिष्ठानम्। तत्र कस्यापि धनिनो राजामात्यादेः प्रमादिनः कनकसूत्रं हारं वा गृहीत्वा तत् कोटरे प्रक्षिप। येन सर्पस्तद्ग्रहणेन वध्यते"। अथ तत्क्षणात् काकः काकी च तदाकर्ण्य आत्मेच्छयोत्पतितौ। ततश्च काकी किञ्चित्सरः प्राप्या यावत् पश्यति तावत् तन्मध्ये कस्यचिद्राज्ञो ऽन्तःपुरं जलासन्नं न्यस्तकनकसूत्रं मुक्ताहारवस्त्राभरणं जलक्रीडां कुरुते। अथ सा वायसी कनकसूत्रमेकमादाय स्वगृहाभिमुखं प्रतस्थे। ततश्च कंचुकिनो वर्षधराश्च तं नीयमानमुपलक्ष्य गृहीतलगुडाः सत्वरमनुययुः। काकी अपि सर्पकोटरे तत् कनकसूत्रं प्रक्षिप्य सुदूरमवस्थिता। अथ यावद्राजपुरुषास्तं वृक्षमारुह्य तत् कोटरमवलोकयन्ति तावत्कृष्णसर्पः प्रसारितभोगस्तिष्ठति। ततस्तं लगुडप्रहारेण हत्वा कनकसूत्रमादाय यथाभिलषितं स्थानं गताः। वायसदम्पती अपि ततः परं सुखेन वसतः। अतोऽहं ब्रवीमि—"उपायेन हि यत् कुर्यात्" इति। तन्न किंचिदिह बुद्धिमतामसाध्यमस्ति॥

Splitting of Sandhis

मन्दधीः+जलचरः+अयम्+इति प्रभवति+इति सस्मितम्+इदम् कुतः+अन्यः प्राणायात्रा+इयम् स्वर्यताम्+आत्मनः+अभीष्टदेवता इति+उक्तवति गृहीतः+मृतः+च तज्जलाशयम्+आससाद सर्वैः+एव निवृत्तः+त्वम् मातुलः+अपि कृतक्षणाः+तिष्ठामः तैः+अभिहिते कुलीरकः+अपि विहस्य+उवाच जलचराः+तेन ग्रीवा+इयम्+आनीता तद्+अलम् अतः+अहम् दुष्टसर्पः+वधम्+ उपैष्यति सर्पः+तद्ग्रहणेन तद्+आकर्ण्य आत्मेच्छया+उत्पतितौ ततः+च किञ्चित्+सरः कस्यचित्+राज्ञः+अन्तःपुरम् कनकसूत्रम्+एकम्+आदाय

वर्षवराः+च नीयमानम्+उपलक्ष्य सत्वरम्+अनुययुः यावत्+ राजपुरुषाः+तम् वृक्षम्+आरुह्य कोटरम्+अवलोकयति प्रसारि-तभोगः+तिष्ठति कनकसूत्रम्+आदाय यथा+अभिलषितम् तत्+ न=तन्न बुद्धिमताम्+असाध्यम्+अस्ति

Splitting of Compounds.

मन्दा धीः यस्य सः मन्द धीः B. C. अभीष्टा च सा देवता च अभिष्टदेवता K.C. स्ववदनस्य दंशद्वयम् तेन T.C. बकस्य ग्रीवा बकग्रीवा ताम् T.C. आयुषः शेषः आयुः शेषः तया T C. विश्वासस्य घातकः तस्य T.C. सर्वे च ते जलचराश्च K.C. दुष्टश्चासौ सर्पश्च दुष्टसर्पः K.C. राज्ञाम् अधिष्ठानम् राजाधिष्ठानम् T. C. न्यस्तानि कनकसूत्राणि येन तत् B.C. स्वगृहस्य अभिमुखम् स्वगृहाभिमु-खम् T.C. गृहीताः लगुडाः यैः ते B.C.

Parsing

तस्मिन् उक्तवति L.o. Ac. आ-ससाद R. perfect III S. आ-नीता P.P.P. नी प्रक्षिप Imperative II nd. S. क्षिप्र+प्र प्राप्य I.P.P. आप्+प्र आदाय I.P.P. दा+आ कुर्यात् pot III. S. वध्यते passive वध् to kill

Meaning

कुलीरक = நண்டு जलाशय = குளம் जलचर = நீர்ப்பிராணி ग्रीवा = கழுத்து कनकसूत्रम् = பொன்சங்கிலி भोग = படம் प्रसारितभोगः = படத்தை விரித்துக்கொண்டு.

उक्तञ्च—

यस्य बुद्धिर्बलं तस्य निर्बुद्धेस्तु कुतो बलम् !
वने सिंहो मदोन्मत्तः शशकेन निपातितः !! 237

करटक आह—"कथमेतत्"? स आह—

कथा 8

कस्मिंश्चिद्वने भासुरको नाम सिंहः प्रतिवसति स्म । अथासौ वीर्य्यातिरेकान्नित्यमेवानेकान् मृगशशकादिन् व्यापादयन्न उपरराम । अथान्येद्युस्तद्वनजाः सर्वे सारङ्गवराहमहिषशशकादयस्तमभ्युपेत्य प्रोचुः—"स्वामिन्! किमनेन सकलमृगवधेन नित्यमेव? यतस्तव एकेनापि मृगेण तृप्तिर्भवति । तत् क्रियतामस्माभिः सह समयधर्मः । अद्यप्रभृति तव अत्रोपविष्टस्य जातिक्रमेण प्रतिदिनमेको मृगो भक्षणार्थं समेष्यति । एवं कृते तव तावत्प्राणयात्रा क्लेशं विना अपि भविष्यति अस्माकञ्च पुनः सर्वोच्छेदनं न स्यात् । तदेष राजधर्मोऽनुष्ठीयताम् ।

उक्तञ्च—

शनैः शनैश्च यो राज्यमुपभुङ्क्ते यथाबलम् !
रसायनमिव प्राज्ञः स पुष्टिं परमां व्रजेत् !! 238

विधिना मन्त्रयुक्तेन रूक्षापि मथितापि च !
प्रयच्छति फलं भूमिररणीव हुताशनम् !! 239

प्रजानां पालनं शस्यं स्वर्गकोशस्य वर्द्धनम् !
पीडनं धर्मनाशाय पापायायशसे स्थितम् !! 240

गोपालेन प्रजाधेनोर्वित्तदुग्धं शनैः शनैः !
पालनात्पोषणाद्ग्राह्यं न्याय्यां वृत्तिं समाचरेत् ! 241

अजामिव प्रजां मोहाद्यो हन्यात्पृथिवीपतिः !
तस्यैका जायते तृप्तिर्न द्वितीया कथञ्चन !! 242

फलार्थी नृपतिर्लोकान्पालयेद्यत्नमास्थितः !
दानमानादितोयेन मालाकारोऽङ्कुरानिव !! 243

Splitting of Sandhis

बुद्धिः+बलम् निर्बुद्धेः+तु कुतः+बलम् कथम्+एतत् कस्मिंश्चित्+वने अथ+असौ वीर्यातिरेकात्+नित्यम्+एव+अनेकान् व्यापादयन्+न अथ+अन्येद्युः+तद्वत् नजाः शशकादयः+तम्+अभ्येत्य किम्+अनेन नित्यम्+एव यतः+तव एकेन+अपि तृप्तिः+भवति क्रियताम्+अस्माभिः अत्र+उपविष्टस्य प्रतिदिनम्+एकः+मूगः तावत्+प्राणयात्रा अस्माकम्+च राजधर्मः+अनुष्ठीयतां शनैः+च राज्यम्+उपभुङ्क्ते रसायनम्+इव रूक्षा+अपि मथिता+अपि भूमिः+अरणी+इव पापाय+अयशसे प्रजाधेनोः+वित्तम् अजाम्+इव पालनात्+पोषणात् मोहात्+यः हन्यात्+पृथिवीपतिः तस्य+एका तृप्तिः+न नृपतिः+लोकान्+पालयेत्+यत्नम्+अस्थितः मालाकारः+अङ्कुरान्+इव

Splitting of Compounds.

मदेन उन्मत्तः मदोन्मत्तः T·C· वीर्यस्य अतिरेकः तस्मात् T·C· मृगशशकौ आदिः येषां तान् B·C· सकलमृगाणाम् वधम् तेन T·C· सर्वेषाम् उच्छेदनम् सर्वोच्छेदनम् T·C· मन्त्रेण युक्तः तेन मन्त्रयुक्तेन T·C· हुतानां अशनः तम् हुताशनम् T·C· धर्मस्य नाशः तस्मै T·C· न यशः अयशसे T·C· प्रजा एव धेनुः तस्याः B·C· वित्तमेव दुग्धम् वित्तदुग्धम् K·C·

Parsing.

निपातितः Co·P·P·P· पत् आह pre· III S· ब्रू व्यापादयन् pre· P· पद् with वि+आ Co· उप-रराम R· per· III S· रम् अभ्युपेत्य I·P·P· इ to go with अभि+उप प्रोचुः S·P· वच्+प्र क्रियताम् passive· Imper· III S· समेष्यति Future· IInd· III·S· इ with सम्+आ भविष्यति IInd. Future· III S· उपभुङ्क्ते pre· III S. भुज् व्रजेत् pot· III S. व्रज् सम् आ चरेत् pot· III S· जयते pre· III S· जा

Meaning

शशकेन = முயலினால் उपरराम = ஒய்ந்தது समयधर्मः = உடன் பாடு प्राणयात्रा = வாழ்க்கை or போஜனம் प्रजाधेनोः = பிரஜை களாகிய பசு वित्तदुग्धम् = பணமாகிய பால் मालाकारः = மாலை கட்டி.

नृपदीपो धनस्नेहं प्रजाभ्यः संहरन्नपि ।
अन्तरस्थैर्गुणैः शुभ्रैर्लक्ष्यते नैव केनचित् ॥ 244

यथा गौर्दुह्यते काले पाल्यते च तथा प्रजा ।
सिच्यते चीयते चैव लता पुष्पफलप्रदा ॥ 245

यथा बीजांकुरः सूक्ष्मः प्रयत्नेनाभिरक्षितः ।
फलप्रदो भवेत्काले तद्वल्लोकः सुरक्षितः ॥ 246

हिरण्यधान्यरत्नानि यानानि विविधानि च ।
तथान्यदपि यत्किञ्चित्प्रजाभ्यः स्यान्महीपतेः ॥ 247

लोकानुग्रहकर्तारः प्रवर्द्धन्ते नरेश्वराः ।
लोकानां संक्षयाच्चैव क्षयं यान्ति न संशयः ॥ 248

अथ तेषां तद्वचनमाकर्ण्य भासुरक आह—"अहो! सत्यमभिहितं भवद्भिः । परं यदि ममोपविष्टस्यात्र नित्यमेव नैकः श्वापदः समागमिष्यति, तन्नूनं सर्वानपि भक्षयिष्यामि" । अथ ते तथैव प्रतिज्ञाय निर्वृतिभाजः तत्रैव वने निर्भयाः पर्यटन्ति । एकश्च प्रतिदिनं क्रमेण याति वृद्धो वा, वैराग्ययुक्तो वा, शोकग्रस्तो वा पुत्रकलत्रनाशभीतो वा तेषां मध्यात्तस्य भोजनार्थं मध्याह्नसमये उपतिष्ठते । अथ कदाचित् जातिक्रमाच्छशकस्य अवसरः समायातः । समस्तमृगैः प्रेरितोऽनिच्छन्नपि मन्दं मन्दं गत्वा तस्य वधोपाय चिन्तयन् वेलातिक्रमं कृत्वा व्याकुलितहृदयः यावद्गच्छति तावत् मार्गे गच्छता कूपः संदृष्टः । यावत्कूपोपरि याति तावत्कूपमध्ये आत्मनः प्रतिबिम्बं ददर्श । दृष्ट्वाच तेन हृदये चिन्तितम्—"यद्भव्य उपायोऽस्ति । अहं भासुरकं प्रकोप्य स्वबुद्धया अस्मिन् कूपे पातयिष्यामि ॥

अथासौ दिनशेषे भासुरकसमीपं प्राप्तः । सिंहोऽपि वेलातिक्रमेण क्षुत्क्षामकण्ठः कोपाविष्टः सृक्किणी परिलेलिहन् व्यचिन्तयत्—"अहो प्रतराहाराय निःसत्वं वनं मया कर्तव्यम्" ।

Splitting of Sandhis

संहरन्+अपि अन्तरस्थैः+गुणैः शुभ्रैः+लक्ष्यते न+एव गौः+दुह्यते च+एव प्रयत्नेन+अभिरक्षितः भवेत्+काले तद्वत्+लोकः तथा+अन्यत्+अपि स्यात्+महीपतेः संक्षयात्+च+एव तद्वचनम्+आकर्ण्य सत्यम्+अभिहितम् मम+उपविष्टस्य+अत्र नित्यम्+एत न+एकः तत्+नूनम् सर्वान्+अपि तथा+एव तत्र+एव एकः+च मध्यात्+तस्य जातिक्रमात्+शशक प्रेरितः+अनिच्छन्+अपि यावत्+गच्छति तावत्+कूपमध्ये तत्+भव्यः+उपायः अथ+असौ प्रातः+आहाराय

Splitting of Compounds

नृप एव दीपः नृपदीपः K.C. पुष्पफलानाम् प्रदा T.C. बीजात् अङ्कुरः बीजाङ्कुरः T.C. हिरण्यञ्च धान्यञ्च रत्नानि च D.C. लोकानुग्रहस्य कर्तारः लोकानुग्रहकर्तारः T.C. निर्वृतीनाम् भाजः निर्वृतिभाजः T.C. वैराग्येण युक्तः वैराग्ययुक्तः T.C. शोकेन ग्रस्तः शोकग्रस्तः T.C. पुत्रकलत्रनाशात् भीतः T.C वधस्य उपायः वधोपायः तम् T.C बेलायाः अतिक्रमः वेलातिक्रमः तम् T.C. व्याकुलितम् हृदयम् यस्य सः B.C. कूपस्य मध्यम् तस्मिन् स्वस्य बुद्धिः स्वबुद्धिः तया T.C. कोपेन आविष्टः कोपाविष्टः T.C.

Parsing.

संहरन् pre P. हृ+सम् लक्ष्यते passi. III S. लक्ष् दुह्यते pass. दुह् पाल्यते passi. III S पाल् सिच्यते pasei. III S. सिच् यान्ति pres. III P या आकर्ण्य I.P.P. कर्ण+आ अभिहितम् P.P.P. धा+अभि सम्भागमिष्यति IInd. future. III S. गम्+सम्+आ प्रतिज्ञाय I.P.P. ज्ञा with प्रति पर्यटन्ति pre. III P. अट् with परि चिन्तयन् pre. P. चिन्त् संदष्ट P.P.P. दश्+सम् प्रकोप्य Co. I.P.P. कुप् पातयिष्यामि IInd. future. Co. पत् व्यचिन्तयत् Imper. III S. चिन्त+वि

Meaning

हिरण्य = பொன் श्वापदः = பிராணி दिनशेषे = சாயங்காலத்தில் क्षुत्क्षाम = பசிப்பிணி सृक्किणी = உதடுகளை.

एवं चिन्तयतस्तस्य शशको मन्दं मन्दं गत्वा प्रणम्य तस्याग्रे स्थितः। अथ तं प्रज्वलितात्मा भासुरको भर्त्सयन्नाह—"रे शशकाधम! एकतस्तावत् त्वं लघुः प्राप्तोऽपरतो वेलातिक्रमेण। तदस्मादपराधात् त्वां निपात्य प्रातः सकलान्यपि मृगकुलानि उच्छेदयिष्यामि"।

अथ शशकः सविनयं प्रोवाच—"स्वामिन्! नापराधो मम न च सत्वानाम्। तत् श्रूयतां कारणम्"। सिंह आह—"सत्वरं निवेदय यावन्मम दंष्ट्रान्तर्गतो न भवान् भविष्यति" इति। शशक आह—"स्वामिन्! समस्तमृगैरद्य ज्ञातिक्रमेण मम लघुतरस्य प्रस्तावं विज्ञाय ततोऽहं पञ्चशशकैः समं प्रेषितः। ततश्च अहमागच्छन्नन्तराले महता केनचिदपरेण सिंहेन विवरान्निर्गत्याभिहित—"अरे! क्व प्रस्थिता यूयम्?। अभीष्टदेवतां स्मरत"। ततो मयाऽभिहितम्—"वयं स्वामिनो भासुरकसिंहस्य सकाशे आहारार्थं समयधर्मेण गच्छामः"। ततः तेनाभिहितम्—"यद्येवं तर्हि मदीयमेतद्वनम्। मया सह समयधर्मेणसमस्तैरपि श्वापदैर्वर्त्तितव्यम्। चौररूपी स भासुरकः। अथ यदि सोऽत्र राजा ततो विश्वासस्थाने चतुरः शशकानत्र धृत्वा तमाहूय द्रुततरमागच्छ। येन यः कश्चिदावयोर्मध्यात् पराक्रमेण राजा भविष्यति स सर्वानेतान् भक्षयिष्यति" इति।

ततोऽहं तेनादिष्टः स्वामिसकाशमभ्यागतः। एतद्वेलाव्यतिक्रमकारणम्। तदत्र स्वामी प्रमाणम्"। तच्छ्रुत्वा भासुरक आह—"भद्र! यदि एवं तत् सत्वरं दर्शय मे तं चौरसिंहम्। येन अहं मृगकोपं तस्य उपरि क्षिप्त्वा स्वस्थो भवामि

उक्तञ्च—

भूमिर्मित्रं हिरण्यञ्च विग्रहस्य फलत्रयम्!
नास्त्येकमपि यद्येषां न तं कुर्यात्कथञ्चन॥ 249

यत्र न स्यात्फलं भूरि यत्र च स्यात्पराभवः!
न तत्र मतिमान् युद्धं समुत्पाद्य समाचरेत्॥ 250

Splitting of Sandhis

चिन्तयतः+तस्य तस्य+अग्रे भासुरकः+भर्त्सयन्+आह एकतः+तावत् प्राप्तः+अपरतः तद्+अस्मात्+अपरा सकलानि+अपि न+अपराधः+मम यावत्+मम समस्तमृगैः+अद्य ततः+अहम् ततः+च अहम्+आगच्छन्+अन्तराले केनचित्+अपरेण विवरात्+निर्गत्य+अभिहितः ततः+मया+अभिहितम् तेन+अभिहितम् यदि+एवम् मदीयम्+एतत्+वनम् समस्तैः+अपि श्वापदैः+वर्तितव्यम् सः+अत्र शशकान+अत्र तम्+आहूय द्रुततरम्+आगच्छ कश्चित्+आवयोः+मध्यात् सर्वान्+एतान् ततः+अहम्+तेन+आ स्वामिसकाशम्+अभ्यागं एतत्+वेलाव्यतिक्रम तद्+अत्र तत्+त्वाशु स्वस्थः+भवामि भूमिः मित्रम्+हिरण्यम् न+अस्ति+एकमपि यदि+चेषाम् स्यात्+फलम् स्यात्+पराभवः

Splitting of Compounds

प्रज्वलितः आत्मा यस्य B·C· शशकेषु अधमः तस्य संबुद्धिः T·C· मृगाणाम् कुलानि T· C· दंष्ट्राणाम् अन्तर्गतः दंष्ट्रान्तर्गतः T·C· समस्ताश्च ते मृगश्च समस्तमृगाः तैः K·C· जातेः क्रमः जातिक्रमः T·C पञ्च च ते शशकाश्च पञ्चशशकाः K· C समयस्य धर्मः तेन समयधर्मेण T· C· स्वामिनः सकाशः स्वामिसकाशः तम् T· C· वेलाव्यतिक्रमस्य कारणम् T·C· चौर श्चासौ सिंहश्च चौरसिंहः K·C मृगस्य कोपः तम् T·C· फलानाम् त्रयम् फलत्रयम् T·C·

Parsing

चिन्तयतः pre P· चिन्त आह present III S· ब्रू निपात्य Co· I·P·P· पत्+नि उच्छेदयिष्यामि II nd. Futur I st S· छिद् with उद् श्रूयताम् Imper (passive III· d· S· श्रु निवेदय Imperativ II nd S· वर्तितव्यम् pot P· वर्त् भक्षयिष्यति II nd Future· IIS· S· भक्षू दर्शय Co· Imperative II S· कुर्यात् Pot III S· कृ स्यात् pot III S· अस् समाचरेत् pot III S· चर् with सम eand आ

Meaning

वेलातिक्रमेण - வேளை தவறி विवरात् = பொந்திலிருந்து, குகையிலிருந்து स्वस्थः = ஆறுதல் பெற்றவனாக विग्रहस्य = சண்டைக்கு सत्वानाम् = பிராணிகளின்,

शशक आह— "स्वामिन्! सत्यमिदम्। स्वभूमिहेतोः परिभवाच्चः युद्यन्ते क्षत्रियाः। परं स दुर्गाश्रयः। दुर्गान्निष्क्रम्य वयं तेन विष्कम्पिताः। ततो दुर्गस्थो दुःसाध्यो भवति रिपुः।

उक्तञ्च—

न गजानां सहस्रेण न च लक्षेण वाजिनाम्।
यत्कृत्यं साध्यते राज्ञा दुर्गेणैकेन सिध्यति॥ 251

शतमेकोऽपि सन्धत्ते प्राकारस्थो धनुर्धरः।
तस्माद् दुर्गं प्रशंसन्ति नीतिशास्त्रविचक्षणाः॥ 252

पुरा गुरोः समादेशाद्धिरण्यकशिपोर्भयात्॥
शक्रेण विहितं दुर्गं प्रभावाद्विश्वकर्मणः॥ 253

तेनापि च वरो दत्तो यस्य दुर्गं स भूपतिः।
विजयी स्यात्ततो भूमौ दुर्गाणि स्युः सहस्रशः॥ 254

दंष्ट्राविरहितो नागो मदहीनो यथा गजः।
सर्वेषां जायते वश्यो दुर्गहीनस्तथा नृपः॥ 255

तच्छ्रुत्वा भासुरक आह— "भद्र! दुर्गस्थमपि दर्शय तं चौरसिंहं येन व्यापादयामि"।

उक्तञ्च—

जातमात्रं न यः शत्रुं रोगञ्च प्रशमं नयेत्।
महाबलोऽपि तेनैव वृद्धिं प्राप्य स हन्यते॥ 256

तथा च—

उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता।
समौ हि शिष्टराम्नातौ वर्त्स्यन्तावामयः स च॥ 257

उपेक्षितः क्षीणबलोऽपि शत्रुः प्रमाददोषात्पुरुषैर्मदान्धैः।
साध्योऽपि भूत्वा प्रथमं ततोऽसौ असाध्यतां
व्याधिरिव प्रयाति॥ 258

Spitting of Sandhis

सत्यम्+इदम् परिभवात्+च दुर्गत्+निष्क्रम्य दुर्गस्थः+दुःसाध्य ऊक्तम्+च दुर्गेण+एकेन शतम्+एकः+अपि समादेशात्+ हिरण्यकशिपोः+भयात् प्रभावात्+विश्वकर्मणः तेन+अपि स्यात्+ततः दंष्ट्राविरहितः+नागः दुर्गहीनः+तथा तत्+श्रुत्वा दुर्गस्थम्+अपि रोगम्+च महाबलः+अपि तेन+एव उत्तिष्ठ-मानः+तु न+उपेक्ष्यः+पथ्यम्+इच्छता शिष्टैः+आम्नातौ वत्स्यन्तौ+ आमयः क्षीणबलः+अपि प्रमाददोषात्+पुरुषैः+मदान्धैः+साध्यः+ अपि ततः+असौ व्याधिः+इव

Splitting of Compounds

स्वभूमिरेव हेतुः K.C. दुर्गः आश्रयः यस्य सः B.C. दुर्गे स्थः T.C. प्राकारे स्थः प्राकारस्थः T.C. नीतिशास्त्रेषु विचक्षणाः T.C. दंष्ट्राभिः विरहितः T.C. दुर्गेण हीनः दुर्गहीनः महत् बलम् यस्य सः B.C. क्षीणम् बलम् यस्य सः B.C. प्रमाद एव दोषः तस्मात् K.C. मदेन अन्धाः तैः T.C.

Parsing

युध्यन्ते passive III P. present. युध् निःक्रम्य I P.P. क्रम् with निस् विःकम्पिताः P.P.P. कम्प् with वि साध्यते passive. pre. III S. साध् प्रशंसन्ति present. IIId. P. शंस्+प्र विहितम् P.P.P. धा with वि स्यात् pot. III S. अस् स्युः pot. P. S. अस् आहे present. III S. ब्रू व्या-पादयामि present. I S. पद्+वि+आ दर्शय Imperatiue II S. दृश् to see. नयेत् pot. III S. नय् प्राप्य I.P.P. आप+प्र हन्यते passive. present. III S. हन् उपेक्ष्यः pot. P. ईक्ष्+ उप वत्स्यन्तौ Future. partiape. वध् उपेक्षितः P.P.P. ईक्ष् with उप प्रयाति pre. III S.

Meaning.

परिभव = அவமானம் दुःसाध्यः = வெல்லமுடியாதவன் वाजि = குதிரை विश्वकर्मन् = தேவசிற்பி आम्नातौ = கூறப்படுகின்றன आमयः = பிணி.

तथा च—

आत्मनः शक्तिमुद्दिश्य मानोत्साहश्च यो व्रजेत्।
बहून् हन्ति स एकोऽपि क्षत्रियान्भार्गवो यथा !!

शशक आह — "अस्त्येतत् तथापि बलवान् स मया दृष्टः तत् न युज्यते स्वामिनस्तस्य सामर्थ्यमविदित्वा गन्तुम्।

उक्तञ्च—

अविदित्वात्मनः शक्तिं परस्य चं समुत्सुकः।
गच्छन्नभिमुखो नाशं याति वह्नौ पतङ्गवत्॥ 260

यो बलात्प्रोन्नतं याति निहन्तुं सबलोऽप्यरिम्।
विमदः स निवर्तेत शीर्णदन्तो गजो यथा !! 261

भासुरक आह—"भोः! किं तव अनेन व्यापारेण! दर्शय मे तं दुर्गस्थमपि"। अथ शशक आह—"यद्येवं तर्हि आगच्छतु स्वामी"। एवमुक्त्वा अग्रे व्यवस्थितः। ततश्च तेन आगच्छता यः कूपो दृष्टोऽभूत् तमेव कूपमासाद्य भासुरकमाह — "स्वामिन्! कस्ते प्रतापं सोढुं समर्थः। त्वां दृष्ट्वा दूरतोऽपि चौरसिंहः प्रविष्टः स्व दुर्गम्। तदागच्छ येन दर्शयामि" इति। भासुरक आह — "दर्शय मे दुर्गम्"। तदनु दर्शितस्तेन कूपः। ततः सोऽपि मूर्खः सिंहः कूपमध्ये आत्मप्रतिबिम्बं जलमध्यगतं दृष्ट्वा सिंहनादं मुमोच। ततः प्रतिशब्देन कूपमध्याद् द्विगुणतरो नादः समुत्थितः। अथ तेन तं शत्रुं मत्वा आत्मानं तस्य उपरि प्रक्षिप्य प्राणाः परित्यक्ताः। शशकोऽपि हृष्टमनाः सर्वमृगान् आनन्द्य तैः सह प्रशस्यमानो यथासुखं तत्र वने निवसति स्म। अतोऽहं ब्रवीमि—"यस्य बुद्धिर्बलं तस्य" इति।

तद्यदि भवान् कथयति, तत्तत्रैव गत्वा तयोः स्वबुद्धिप्रभावेण मैत्रीमेदं करोमि"। करटक आह—"भद्र! यदि एवं तर्हि गच्छ। शिवास्ते पन्थानः सन्तु। यथाभिप्रेतमनुष्ठीयताम्"॥

Splitting of Sandhis

शक्तिस्+उद्वीक्ष्य मानोत्साहम्+च यः+व्रजेत् क्षत्रियान्+भार्गव अस्ति+एतत्+तथा स्वामिनः+तस्य सामर्थ्यम्+अविदित्वा अविदित्वा+आत्मन, गच्छन्+अभिमुखः बलात्+प्रीयतम् सबलः+अपि+अरिम् शीर्णदन्तः+गजः दुर्गस्थम्+अपि यदि+एवम् एवम्+उक्ता तत·+च दृष्टः+अभूत् तम्+एव कूपम्+आसाद्य भासुरकम्+आह कः+ते=कस्ते दूरतः+अपि तद्+आगच्छ दर्शितः+तेन सः+आपि द्विगुणतरः+नादः शशकः+अपि प्रशस्यमान·+अहम् बुद्धिः+बलम् तत्+तत्र+एक शिवाः+ते यथाभिप्रेतम्+अनु

Splitting of Compounds

शीर्णाः दन्ताः यस्य सः B· C. दुर्गेस्थः तम् दुर्गस्थम् T· C· चौर श्चासौ सिंहश्च चौरसिंहः K C. आत्मनः प्रतिबिम्बम् आत्मप्रतिबिम्बम् T C· जलमध्ये गतम् तत् जलमध्यगतम् T·C· कूपस्य मध्यम् कूपमध्यम् T·C· दुष्टम् मनः यस्य सः दुष्टमनाः B·C स्वबुद्धेः प्रभावः तेन स्वबुद्धिप्रभावेण T·C· मैत्र्याः भेदः मैत्री भेदः तम T·C·

Parsing

उद्वीक्ष्य I·P·P· ईक्ष्+उद् व्रजेत् pot III S· व्रज् हन्ति pre· III S, हन् दुष्टः P·P·P· दृश् युज्यते Passive युज् गच्छन् Pre· P. गम् याति pre· III S· या निहन्तुम् Infinitve हन् with नि निवर्तेत dot III S· वृत् with नि दर्शय Imperative II S· आगच्छतु Imperative गम् with आ अभूत् Aorist III S. भू आसाद्य I P·P· सद्+आ सोढुम् Infinitive सह् मुमोच R. perfect III S· मुच् समुत्थित P·PP· स्था with सम्+उद् मत्वा I. P·P· मन् प्रक्षिप्य I·P·P. क्षिप्+परित्यक्ताः P·P P. त्यज् with परि आनन्द्य I·P·P· with आ प्रशस्यमानः passive present P· शंस्+प्र सन्तु Imperative III P· अस्

Meaning

पतङ्गवन् = வட்டிப்பூச்சி दुर्ग = அகழ் व्यवस्थितः = முன்னல் நடந்துசென்று

अथ दमनकः सञ्जीवकवियुक्तं पिंगलकमवलोक्य तत्रान्तरे प्रणम्याग्रे समुपविष्टः। पिंगलकोऽपि तमाह—"भद्र किं चिरात् दृष्टः?"। दमनक आह—न "किञ्चिद्देवपादानामस्माभिः प्रयोजनम्, तेन अहं नागच्छामि। तथापि राजप्रयोजनविनाशमवलोक्य सन्दिह्यमानहृदयो व्याकुलतया स्वयमेव अभ्यागतो वक्तुम्।

उक्तञ्च—

प्रियं वा यदि वा द्वेष्यं शुभं वा यदि वाऽशुभम्!
अपृष्टोऽपि हितं वक्ष्येद्यस्य नेच्छेत्पराभवम्॥ 262

अथ तस्य साभिप्रायं वचनमाकर्ण्य पिंगलक आह—"किं वक्तुमना भवान्? तत्कथ्यतां यत्कथनीयमस्ति"। स आह—"देव! सञ्जीवको युष्मत्पादानामुपरि द्रोहबुद्धिरिति। विश्वासगतस्य मम विजने इदमाह—"भो! दमनक! दृष्टा मया अस्य पिंगलकस्य सारासारता। तदहमेनं हत्वा सकलमृगाधिपत्यं त्वात्साचिव्यपदवीसमन्वितं करिष्यामि" इति। पिंगलकोऽपि तद्वज्रसारप्रहारसदृशं दारुणं वचः समाकर्ण्य मोहमुपगतो न किञ्चिदपि उक्तवान्। दमनकोऽपि तस्य तमाकारमवलोक्य चिन्तितवान्—"अयं तावत्सञ्जीवकनिबद्धरागः तन्नूनमनेन मन्त्रिणा राजा विनाशमवाप्स्यतीति।

उक्तञ्च—

एकं भूमिपतिः करोति सचिवं राज्ये प्रमाणं यदा
तं मोहाच्छ्रियते मदः स च मदास्त्रेयेन निर्बिद्यते!
निर्विण्णस्य पदं करोति हृदये तस्य स्वतन्त्रस्पृहा
स्वातन्त्र्यस्पृहया ततः स नृपतेः प्राणेष्वपि द्रुह्यते॥ 263

तत् किमत्र युक्तम्" इति। पिंगलकोऽपि चेतनां समासाद्य कथमपि तमाह—"दमनक! सञ्जीवकस्तावत् प्राणसमो भृत्यः। स कथं ममोपरि द्रोहबुद्धिं करोति?" दमनक—आह—"देव! भृत्यो भृत्य इति अनैकान्तिकमेतत्।

Splitting of Sandhis

पिङ्गलकम्+अवलोक्य प्रणम्य+अग्रे पिङ्गलकः+अपि तम्+आह किञ्चित्+देवपादानाम्+अस्माभिः न+आगच्छामि विनाशम्+अवलोक्य स्वयम्+एव अभ्यागतः+वक्तुम् उक्तम्+च वा+अशुभम् अपृष्टः+अपि वक्ष्येत्+यस्य न+इच्छेत्+पराभवम् वचनम्+आकर्ण्य यत्+कथनीयम्+अस्ति सञ्जीवकः+युष्मत्पादानाम्+उपरि द्रोहबुद्धिः+इति इदम्+आह तद्+अहम्+एनम् पिङ्गलकः+अपि मोहम्+उपगतः दमनकः+अपि तम्+आकारम्+अवलोक्य तावत्+सञ्जीवकः तत्+नूनम्+अनेन विनाशम्+अवाप्स्यति +इति मोहात्+अयते मदात्+दास्येन प्राणेषु+अपि किम्+अत्र पिङ्गलकः+अपि तम्+आह=सञ्जीवकः+तावत् मम+उपरि अनैकान्तिकम्+एतत् भृत्यः+अभृत्यः

Splitting of Compounds

सञ्जीवकेन वियुक्तम् T. C. राजप्रयोजनस्य विनाशः तम् T. C. सन्दिह्यमानम् हृदयम् यस्य B. C. वक्तुम् मनः यस्य सः B. C. विश्वासम् गतः तस्य T. C. सकलमृगाणाम् आधिपत्यम् T. C. त्वात्साचिव्यपदव्या समन्वितम् T.C. तद्वज्रसारप्रहारेण सदृशम् T.C सञ्जीवके निबद्धः रागः यस्य B. C. भूम्याः पतिः भूमिपतिः T. C. स्वतन्त्रे स्पृहा T.C. स्वातन्त्र्यस्य स्पृहा तथा T.C.

Parssing

अवलोक्य I.P.P. लोक् with अव प्रणाम्य I.P.P. नम्+प्र समुपविष्टः P.P.P. विश् with सम् and उप वक्तुम् Infinitive वच् वक्ष्येत् pot III S. वच् इच्छेत् pot III S. इच्छ् कथ्यताम् passive Imperative III S. कथ् कथनीयम् pot P. कथ् करिष्यामि II future I st S वृचिन्तितवान् P.A.P. चिन्त् उक्तवान् P.A.P. वच् अवाप्स्यति II nd future III S. आप् with अव अयते passive III S. श्री द्रुह्येत् pot III S. द्रुह्

Meaning

पराभवम्=அவமானம் साचिव्यपदवी=மந்திரிபதவி वज्रसारप्रहार=இடி आकारम=உருவம் अनैकान्तिक=நிச்சயமில்லாதது.

उक्तञ्च—

न सोऽस्ति पुरुषो राज्ञां यो न कामयते श्रियम् ।
अशक्ता एव सर्वत्र नरेन्द्र पर्य्युपासते ॥ 264

पिङ्गलक आह—"भद्र ! तथापि मम तस्योपरि चित्तवृत्तिर्न विकृतिं याति। अथवा साधु चेदमुच्यते।—

अनेकदोषदुष्टोऽपि कायः कस्य न वल्लभः ।
कुर्वन्नपि व्यलीकानि यः प्रियः प्रिय एव सः ॥ 265

दमनक आह—"अत एव अयं दोषः। उक्तञ्च—

यस्मिन्नेवाधिकं चक्षुरारोपयति पार्थिवः ।
अकुलीनः कुलीनो वा स श्रियो भाजनं नरः ॥ 266

अपरं च केन गुणविशेषेणस्वामी सञ्जीवकं निर्गुणकमपि निकटे धारयति? अथ देव! यदि एवं चिन्तयसि महाकायोऽयमनेन रिपून् व्यापादयिष्यामि। तदस्मात् न सिध्यति। यतोऽयं शष्पभोजी। देवपादानां पुनः शत्रवो मांसाशिनः। तत् रिपुसाधनमस्य साहाय्येन न भवति। तस्मादेनं दूषयित्वा हन्यताम्" इति।
पिंगलक आह—

"उक्तो भवति यः पूर्वं गुणवानिति संसदि ।
तस्य दोषो न वक्तव्यः प्रतिज्ञाभंगभीरुणा ॥ 267

अन्यच्च—मया अस्य तव वचनेन अभयप्रदानं दत्तम्। तत्कथं स्वयमेव व्यापादयामि। सर्वथा सञ्जीवकोऽयं सुहृदस्माकं न तं प्रति कश्चित् मन्युरिति।

उक्तञ्च—

इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम् ।
विषवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुमसाम्प्रतम् ॥ 268

Splitting of Sandhis

उक्तम्+च सः+अस्ति तस्य+उपरि चित्तवृत्तिः+न च+इदम्+ उच्यते दुष्टः+अपि कुर्वन्+अपि यस्मिन्+एव+अधिकम् चक्षुः+ आरोपयति निर्गुणकम्+अपि महाकायः+अयम्+अनेन तद्+अस्मात् यतः+अयम् तस्मात्+एनम् गुणवान्+इति दोषः+न अन्यत्+च स्वयम्+एव सञ्जीवकः+अयम् सुहृद्+अस्माकम् मन्युः+इति प्राप्तश्रीः+न+इतः+एव+अर्हति विषवृक्षः+अपि छेत्तुम्+असांप्रत

Splitting of Compounds.

चित्तस्य वृत्तिः चित्तवृत्तिः T·C· अनेकदोषैः दुष्टः T·C· महान् कायः यस्य सः B·C· शष्पाणाम् भोजी T·C· मांसस्य अशिनः मांसाशिनः T·C· प्रतिज्ञाभङ्गस्य भीरुः तेन T·C· अभयस्य प्रदानम् अभयप्रदानम् T·C· प्राप्ता श्रीः यस्य सः T·C· न साम्प्रतम् असाम्प्रतम् T·C·

Parsing.

कामयते pres· III S· काम् पर्युपासते prese III P· आस्+ परि+उप याति pers III S· या उच्यते passive· वच् कुर्वन् pres P· कृ आरोपयति Co· pres III S· रुह+आ धारयति pres III S. धृ· चिन्तयसि pres II S· चिन्त् व्यामादयिष्यामि II nd Future पद् with वि+आ सिध्यति pres III S· सिध् दूषयित्वा I·P·P दूष् हन्यताम् Passive Imperative III S· हन् वक्तव्यः pot P· वच् दत्तम् P·P·P· दा अर्हति Pre III S· अर्ह संवर्ध्य I·P:P· वर्ध् with सम् छेत्तुम् Infinitive छिद् to cut

Meaning

कुलीनः=நற்குலத்துதித்தவன் भाजनम्=பாத்திரம் शष्पभोजी = புல் தின்பவன் संसदि=சபையில் प्राप्तश्रीः=செல்வத்தைப்பெற்ற வன் असांप्रतम्=தகுதியற்றது,

आदौ न वा प्रणयिना प्रणयो विधेयो
दत्तोऽथवा प्रतिदिनं परिशोषणीयः ।
उत्क्षिप्य यत्क्षिपति तत्करोति लज्जां
भूमौ स्थितस्य पतनाद्भयमेव नास्ति ॥ 269

उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ।
अपकारिषु यः साधुः स साधुः सद्भिरुच्यते ॥ 270

तद्द्रोहबुद्धेरपि मया अस्य न विरुद्धमाचरणीयम् । दमनक आह— "स्वामिन् ! नैष राजधर्मो यद्द्रोहबुद्धेरपि क्षम्यते ।

उक्तञ्च—

तुल्यार्थं तुल्यसामर्थ्यं मर्मज्ञं व्यवसायिनम् ।
अर्द्धराज्यहरं भृत्यं यो न हन्यात्स हन्यते ॥ 271

अपरं त्वया अस्य सखित्वात् सर्वोऽपि राज्यधर्मः परित्यक्तः । राजधर्माभावात् सर्वोऽपि परिजनो विरक्तिं गतः । यतः सञ्जीवकः शब्पभोजी भवान् मांसादः तव प्रकृतयश्च । यच्च अवध्यव्यवसायबाह्यं कुतस्तासां मांसाशनम् । यद्रहितास्ताः त्वां त्यक्त्वा यास्यन्ति । ततोऽपि त्वं विनष्ट एव । अस्य सङ्गत्या पुनस्ते न कदाचित् आखेटके मतिर्भविष्यति ।

उक्तञ्च—

यादृशः सेव्यते भृत्यैर्यादृशांश्चोपसेवते ।
कदाचिन्नात्र सन्देहस्तादृग्भवति पूरुषः ॥ 272

तथा च—

सन्तप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते?
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते ।
स्वातौ सागरशुक्तिकुक्षिपतितं तज्जायते मौक्तिकं
प्रायेणाधममध्यमोत्तमगुणः संवासतो जायते ॥ 273

तथा च

असतां संगदोषेण साधवो यान्ति विक्रियाम् ।
दुर्योधनप्रसंगेन भीष्मो गोहरणे गतः ॥ 274

Splitting of Sandhis

प्रणयः+विधेयः दत्तः+अथवा यत्+क्षिपति तत्+लज्जाम् पतनात्+भयम्+एव सद्भिः+उच्यते तत्+द्रोहबुद्धेः+अपि विरुद्धम्+आचरणीयम् न+एषः+राजधर्मः यत्+द्रोबुद्धेः+अपि हन्यात्+सः+हन्यते सर्वः+अपि प्रकृतयः+च यत्+तव कुतः+तासाम्—यद्रहिताः+वाः ततः+अपि पुनः+ते मतिः+ भविष्यति भृत्यैः+यादशान्+च+उपसेवते कदाचित्+न+अत्र सन्देहः+तादृग्+भवति पयसः+नाम+अपि तद्+एव तत्+जायते प्रायेण+अधम संवासतः+जायते साधवः+यान्ति भीष्मः+गोहरणे

Splitting of Compounds.

द्रोहः बुद्धौ यस्य तस्य B·C· राज्ञाम् धर्मः राजधर्मः T·C· तुल्यं सामर्थ्यम् यस्य B·C· अर्धराज्यस्य हरम् T·C· शल्पाणाम् भोजी शल्पभोजी T·C· मांसस्य अशनम् मांसाशनम् T·C· येन रहिताः यद्रहिताः T·C· सन्तप्तश्चतत् अयश्च तस्मिन् नलिनीपत्रेस्थितम् T·C सागरशुक्तिकुक्षौ पतितम् T·C· अधममध्यमोत्तमानाम् गुणः T·C.

Parsing

उत्क्षिप्य I·P·P· क्षिप् with उद् उच्यते passive. III S· वच् आचरणीयम् pot P· चर् with आ क्षम्यते pres III S· उक्तम् P·P·P. वच् हन्यात् pot III S· हन्यते passive III S· परित्यक्तः P·P.P· त्यज् with परि यास्यन्ति future II nd III P· या भविष्यति II nd futnre III S· भव् सेव्यते passive III S· सेव् उपसेवते pre III S· सेव् with उप ज्ञायते passive III S· ज्ञा राजते Preset III S·राज् जायते present III S· जा

Meaning

मर्मज्ञ=இரகசியத்தை உணர்ந்தவன் सखित्वात्=நட்பினால்
आखेटके=வேட்டையில் सन्तप्तायसि=சூடாக்கப்பட்ட இரும்பில்
स्वातौ=சுவாதிநக்ஷத்திரத்தில்.

अत एव सन्तो नीचसंगं वर्जयन्ति। उक्तञ्च—

नह्यविज्ञातशीलस्य प्रदातव्यः प्रतिश्रयः।
मत्कुणस्य च दोषेण हता मन्दविसर्पिणी॥ 275

पिंगलक आह—"कथमेतत्?" सो ऽब्रवीत्—

कथा 9

अस्ति कस्यांचिन्महीपतेः कस्मिंश्चित् स्थाने मनोरमं शयनस्थानम्। तत्र शुक्लतरपटयुगलमध्यसंस्थिता मन्दविसर्पिणी नाम श्वेता यूका प्रतिवसति स्म। सा च तस्य महीपतेः रक्तमांसमास्वादयन्ती सुखेन कालं नयमाना तिष्ठति। अन्येद्युश्च तत्र शयने क्वचिद् भ्राम्यन् अग्निमुखो नाम मत्कुणः समायातः। अथ तं दृष्ट्वा सा विषण्णवदना प्रोवाच—"भो अग्निमुख! कुतस्त्वमत्र अनुचितस्थाने समायातः? तद्यावत् न कश्चिद्वेत्ति तावच्छीघ्रं गम्यताम्" इति। स आह—"भगवति! गृहागतस्य असाधोरपि नैतद्युज्यते वक्तुं।—

उक्तञ्च—

एह्यागच्छ समाश्वासनमिदं कस्मांचिरं दृश्यसे
का वार्तान्वति दुर्बलोऽसि कुशलं प्रीतोऽस्मि ते दर्शनात्।
एवं नीचजनेऽपि युज्यति गृहं प्राप्ते सतां सर्वदा
धर्मोऽयं गृहमेधिनां निगदितः स्मार्तैर्लघुः स्वर्गदः॥ 276

अपरं मया अनेकमानुषाणामनेकविधधनि रुधिराणि आस्वादितानि आहारदोषात् कटुतिक्तकषायाम्लरसास्वदानि। न च मया कदाचिन्मधुररक्तं समास्वादितम्। तद्यदि त्वं प्रसादं करोषि तदस्य नृपतेर्विविधव्यञ्जनान्नपानचोष्यलेह्यस्वाद्वाहारवशादस्य शरीरे यत् मिष्टं रक्तं सञ्जातं तदास्वादेन सौख्यं सम्पादयामि जिह्वया इति।

उक्तञ्च—

रङ्कस्य नृपतेर्वापि जिह्वासौख्यं समं स्मृतम्।
तन्मात्रञ्च स्मृतं सारं यदर्थं यतते जनः
यद्येवं न भवेल्लोके कर्म जिह्वाप्रतुष्टिदम्।
तत्र भृत्यो भवेत्कश्चित्कस्यचिद्वशगोऽथवा॥ 278

Splitting of Sandlis

हि+अविज्ञातशीलस्य कथम्+एतत् सः+अब्रवीन् कस्यचित्+महीपतेः अन्येद्युः+च अग्निमुखः+नाम कुतः+त्वम्+अत्र तत्+यावत् कश्चित्+वेत्ति तावत्+शीघ्रम् असाधोः+अपि न+एतत्+युज्यते एहि+आगच्छ कस्मात्+चिरात्+दृश्यसे नु+अतिदुर्बला+असि प्रीतः+आस्मि नीचजने+अपि धर्मः+अयम् स्मातैः+लघुः अनेकमानुषाणाम्+अनेकविधानि कदाचित्+मत्तुर तद्+यदि नृपतेः+विविध आहारवशात्+अस्य उक्तम्+च नृपतेः+वा+अपि तन्मात्रम्+च यदि+एवं भवेत्+लोके चत्+न भवेत्+कश्चित्+कस्यचित्+वशगः+अथवा

Splitting of Compounds

नीचानाम् संगम् नीचसंगम् T·C· शयनस्य स्थानम् शयनस्थानम् T C शुक्लतरपटयुगलस्य मध्यसंस्थिता T·C· विषण्णां वदनम् यस्याः सा B·C. अनुचितश्च तत् स्थानश्च तस्मिन् K·C· गृहम् आगतः तस्य T·C· न साधुः असाधुः वस्य T·C· नीचश्चासौ जनश्च नीचजनः K·C अनेके च ते मानुषाश्च तेषाम् K·C· मधुरश्च तत् रक्तश्च मधुररक्तम् K·C·

Parsing

वर्जयति pre III· P· हता P·P·P. हन् आह pre III S. ब्रू अब्रवीत् Imperfect III S. ब्रू नयमाना pre P· नी (नय्) समायातः P·P·P· या with सम् and आ वेत्ति prefect III S विद् आगच्छ Imperative II nd S· गम् with आ आस्वादितानि P·P·P· स्वाद् with आ संपादयामि pres I st S· पद् with सम्

Meaning

प्रतिश्रयः=தங்குமிடம் मन्दविसर्पिणी=இது ஓர் பேனுக்குப்பெயர் यूका=பேன் मत्कुणः=மூட்டப்பூச்சி अग्निमुखः=இது மூட்டப்பூச்சிக்கு காரணப்பெயர் गृहमेधिनाम्=இல்லறவாழ்வினுள்ளவர்களுக்கு स्मातैः=ஸ்மிருதிகாரரால்कटु=கசப்பு तिक्त=உரைப்பு कषाय=உவர்ப்பு अम्ल=புளிப்பு चोष्य=பொறியல் लेह्य=பாயசம்முதலிய நக்கி சாப்பிடப்படும் பொருட்கள்.

यदसत्यं वदेन्मर्त्यो यदसेव्यञ्च सेवते ।
यद्गच्छति विदेशञ्च तत्सर्वमुदरार्थतः ॥

तत् मया गृहागतेन बुभुक्षया पीड्यमानेन त्वत्सकशाद्भोजनमर्थनीयं तन्न त्वया एकाकिन्या अस्य भूपतेः रक्तभोजनं कर्तुं युज्यते" । तच्छ्रुत्वा मन्दविसर्पिणी प्राह— "भो मत्कुण ! अहमस्य नृपतेर्निद्रावशं गतस्य रक्तमास्वादयामि । पुनस्त्वम् अग्निमुखः चपलश्च, तत् यदि मया सह रक्तपानं करोषि तर्हि इष्टं । अभीष्टतरं रक्तमास्वादय" । सोऽब्रवीत्— "भगवति ! एवं करिष्यामि । यावत्त्वं न आस्वादयसि प्रथमं नृपरक्तं तावत् मम देवगुरुकृतः शपथः स्याद् यदि तत् आस्वादयामि" । एवं तयोः परस्परं वदतोः स राजा तच्छयनमासाद्य प्रसुप्तः । अथ असौ मत्कुणो जिह्वालौल्यप्रकृष्टौत्सुक्यात् जाग्रतमपि तं महीपतिमदशत् । अथ वा साधु चेदमुच्यते—

स्वभावो नोपदेशेन शक्यते कर्तुमन्यथा ।
सुतप्तमपि पानीयं पुनर्गच्छति शीतताम् ॥ 280

यदि स्याच्छीतलो वह्निः शीतांशुर्दहनात्मकः ।
न स्वभावोऽत्र मर्त्यानां शक्यते कर्तुमन्यथा ॥ 281

अथ असौ महीपतिः सूच्यग्रविद्ध इव तच्छयनं त्यक्त्वा तत्क्षणादेव उत्थितः । — "अहो ज्ञायतामत्र प्रच्छादनपटे मत्कुणो यूका वा नूनं तिष्ठति येन अहं दष्टः" इति । अथ ये कञ्चुकिनस्तत्र स्थितास्ते सत्वरं प्रच्छादनपटं गृहीत्वा सूक्ष्मदृष्ट्या वीक्षां चक्रुः । अत्रान्तरे स मत्कुणः चापल्यात् खट्वान्तं प्रविष्टः । सा मन्दविसर्पिणी वराकी वस्त्रसन्ध्यन्तर्गता तैर्दृष्टा व्यापादिता च । अतोऽहं ब्रवीमि— "ह्यविज्ञातशीलस्य" इति । उक्तञ्च—

त्यक्ताश्चाभ्यन्तरा येन बाह्याश्चाभ्यन्तरीकृताः ।
स एव मृत्युमाप्नोति यथा राजा ककुद्द्रुमः ॥ 282

पिंगलक आह— "कथमेतत्" । सोऽब्रवीत्—

Splitting of Sandhis

यत्+असत्यम् वदेत्+मर्त्यः यद्+असेव्यत+च यद्+गच्छति विदेशम्+च तत्+सर्वम् उदरा त्वत्सकाशात्-भोजनम्+अर्थनीयम् क्त+न तत्+श्रुत्वा अहम्+अस्य नृपतेः+निद्रावशम् रक्तम्+ आस्वादयामि पुनः+त्वम् चपलः+च तत्+तिष्ठ रक्तम्+ आस्वादय सः+अब्रवीत् यावत्+त्वम् तत्+शयनम्+आसाद्य जाग्रतम्+अपि महोरगम्+अदशत् च+इदम्+उच्यते न+उपदेशेन कर्तुम्+अन्यथा सुतप्तम्+अपि पुनः+गच्छति स्यात्+शीतलः शीतांशुः+दहना स्वभावः+अत्र कर्तुम्+अन्यथा विद्धः+इव तत्+शयनम् तत्क्षणाद्+एव ज्ञायताम्+अत्र कञ्चुकिनः+तत्र स्थिताः+ते तैः+दृष्टा अतः+अहम् हि+अविज्ञात त्यक्ताः+च+ आभ्यन्त बाह्याः+च+आभ्य मृत्युम्+आप्नोति कथम्+एतत् सः+अब्रवीत्

Splitting of Compounds

तव सकाशः तस्मात् T.C. रक्तमिश्रितम् भोजनम् T.C. नृपस्य रक्तम् T.C. शीताः अंशवः यस्य सः B.C. सूच्यग्रेण विद्धः T.C. प्रच्छादनस्य पटः तम् T.C. अविज्ञातः शीलः यस्य B.C.

Parsing.

वदेत् pot. III S. वद् सेवते prese. III S, सेव् बुभुक्षया De. V.n. पीड्यमानेन pass. pre. P. युज्यते pre. III S. युज् आस्वादयामि pre. Ist. S. स्वाद् with आ तिष्ठ Imperative. IInd. S. करिष्यामि Ist. Future I S. स्यात् pot. III S. अस् अदशत् Imper. III S. दंश् उच्यते passive. III S. वच् उत्थितः P.P.P. स्था with उद् ज्ञायताम् Imperative. IIId S. pass. ज्ञा to know. दृष्टः P.P.P. दृश् चक्रुः R. perfe. III P. व्यापादिता P.P.P. पद् with वि and आ

Meaning

शपथः = ஆணை पानीयम् = நீர் सूच्यग्र = ஊசியின் முனை वराकी = அ ரவி ककुदुमः = ஓர் மன்னனின் பெயர்.

कथा 10

कस्मिंश्चित् वनप्रदेशे चण्डरवो नाम शृगालः प्रतिवसति स्म। स कदाचित् क्षुधाविष्टो जिह्वालौल्यात् नगरान्तरे प्रविष्टः। अथ तं नगरवासिनः सारमेया अवलोक्य सर्वतः शब्दायमानाः परिधाव्य तीक्ष्णदंष्ट्राग्रैर्भक्षितुमाराब्धाः। सोऽपि तैर्भक्ष्यमाणः प्राणभयात् प्रत्यासन्नरजकगृहं प्रविष्टः। तत्र च नीलीरसपरिपूर्णं महाभाण्डं सज्जीकृतमासीत्। तत्र सारमेयैराक्रान्तो भाण्डमध्ये पतितः। अथ यावत् निष्क्रान्तस्तावन्नीलवर्णः सञ्जातः। तत्र अपरे सारमेयास्तं शृगालमजानन्तो यथाभीष्टदिशं जग्मुः। चण्डखोऽपि दूरतरं प्रदेशमासाद्य काननाभिमुखं प्रतस्थे। न च नीलवर्णेन कदाचित् निजरंगस्त्यज्यते उक्तञ्च—

वज्रलेपस्य मूर्खस्य नारीणां कर्कटस्य च।
एको ग्रहस्तु मीनानां नीलीमद्यपयोर्यथा॥ 283

अथ तं हरगलगरलतमालसमप्रभमपूर्वं सत्त्वमवलोक्य सर्वे सिंहव्याघ्रद्वीपीवृकप्रभृतयोऽरण्यनिवासिनो भयव्याकुलितचित्ताः समन्तात् पलायनक्रियां कुर्वन्ति, कथयन्ति च—"न ज्ञायतेऽस्य कीदृग्विचेष्टितं पौरुषञ्च। तद्दूरतरं गच्छामः।

न यस्य चेष्टितं विद्यान्न कुलं न पराक्रमम्।
न तस्य विश्वसेत्प्राज्ञो यदीच्छेच्छ्रियमात्मनः॥ 284

चण्डखोऽपि तान् भयव्याकुलितान् विज्ञाय इदमाह—"भो भोः श्वापदाः! किं यूयं मां दृष्ट्वैव सन्त्रस्ता व्रजव? तन्न मेतव्यम। अहं ब्रह्मणा अद्य स्वयमेव सृष्ट्वाऽभिहितः—"यत् श्वापदानां मध्ये कश्चिद्राजा नास्ति, तत्त्वं मया अद्य सर्वश्वापदप्रभुत्वेऽभिषिक्तः ककुद्द्रुमाभिधस्ततो गत्वा क्षितितले तान् सर्वान् परिपालय" इति। ततोऽहमत्रागतः। "तन्मम छत्रच्छायायां सर्वैरेव श्वापदैर्वर्तितव्यम। अहं ककुद्द्रुमो नाम राजा त्रैलोक्येऽपि सञ्जातः"। तच्छ्रुत्वा सिंहव्याघ्रपुरःसराः श्वापदाः—"स्वामिन्! प्रभो! समादिश" इति वदन्तस्तं परिवव्रुः।

Splitting of Sandhis

तीक्ष्णदंष्ट्रः+भक्षयितुम्+आरब्धः सः+अपि तैः+भक्ष्यमाणः सञ्जीकृतत्+आसीत् सारमेयैः+आक्रान्तः निष्क्रान्तः+तावत्+ नीलवर्णः सारमेयाः+तम् शृगालम्=अजान चण्डरवः+अपि प्रदेशम्+आसाद्य निजरङ्गः+त्यज्यते उक्तम्+च नीलीमद्यपयोः+ यथा समप्रभम्+अपूर्वम् सत्वम्+अवलोक्य प्रभृतयः+अरण्यनि ज्ञायते+अस्य पौरुषम्+च विद्यात्+न विश्वसेत्+प्राज्ञाः यदि+ इच्छेत्+श्रियम्+आत्मनः चण्डरवः+अपि इदम्+आह दृष्ट्वा+ एव सृष्ट्वा+अभिहितः कश्चित्+राजा प्रभुत्वे+अभिषिक्तः अभितः+ततः ततः+अहम्+अत्र+आगतः तत्+मम सर्वैः+एव+ श्वापदैः+तत्+श्रुत्वा वदन्तः+तम् ।

Splitting of Compounds

नगरे वासिनः नगखासिनः T·C तीक्ष्णानि च तानि दंष्ट्राग्राणिच K·C नीलः वर्णः यस्य सः B·C काननम् अभि मुखं यस्य B·C निजस्य रङ्गः निजरङ्गः T·C भयव्याकुलितम् चित्तम् यस्य B·C· भयेन व्याकुलितान् भयव्याकुलितान् T. C. सर्वश्वापदनाम् प्रभुत्वं तस्मिन् T·C· सिंहव्याघ्रो पुरः सरौः येषां B.C·

Parsing.

प्रविष्टः P·P·P विश् with प्र अवलोक्य P·P·P· लोक् with अव पतितः P·P·P· पत् जग्मुः R Perfect III P· त्यज्यते Passive III S· ज्ञायते passive III S· विद्यात् Pot III S· विद् इच्छेत् Pot III S· इच्छ व्रजथ Imperative II nd P· व्रज् to go· परिपालय Imperative II S· पाल् with परि वर्तितव्यम् Pot P· वत् to be समादिश Imperative II nd S· दिश् with सम् आ परिवव्रुः R· perfcet III P· वृ with परि

Meaning

जिह्वालौल्य=நப்பாசை सारमेय=நாய் कर्कट=நண்டு गरल=விஷம் श्वापद=காட்டுமிருகம் मद्यप—கள்குடியன்.

अथ तेन सिंहस्य अमात्यपदवी प्रदत्ता, व्याघ्रस्य शय्यापालकत्वम् द्वीपिनः ताम्बूलाधिकारो, वृकस्य द्वारपालकत्वम्, ये च आत्मीयाः शृगालाः तैः सह आलापमात्रमपि न करोति। शृगालाः सर्वेऽपि अर्द्धचन्द्रं दत्वा निःसारिताः। एवं तस्य राज्यक्रियायां वर्तमानस्य ते सिंहादयो मृगान् व्यापाद्य तत्पुरतः प्रक्षिपन्ति। सोऽपि प्रभुधर्मेण सर्वेषां तान् प्रविभज्य प्रयच्छति। एवं गच्छति काले कदाचित् तेन समागतेन दूरदेशे शब्दायमानस्य शृगालवृन्दस्य कोलाहलोऽश्रावि। तं शब्दं श्रुत्वा पुलकिततनुः आनन्दाश्रुपरिपूर्णनयनः अत्थाय तारस्वरेण विरौतुमारब्धवान्। अथ ते सिंहादयस्तं तारस्वरमाकर्ण्य शृगालो यमिति मत्वा सलज्जमधोमुखाः क्षणमेकं स्थित्वा मिथः प्रोचुः—"भोः! वाहिता वयमनेन क्षुद्रशृगालेन तद्बध्यताम्" इति। सोऽपि तदाकर्ण्य पलायितुमिच्छन् तत्र स्थाने एव सिंहादिभिः खण्डशः कृतो मृतश्च। अतोऽहं ब्रवीमि—"त्यक्ताश्चाभ्यन्तरा येन" इति॥

तदाकर्ण्य पिंगलक आह—"भो दमनक! कः प्रत्ययोऽत्र विषये यत् स ममोपरि दुष्टबुद्धिः"। स आह—यद्यद्य ममाग्रे तेन निश्चयः कृतो यत्प्रभाते पिङ्गलकं वधिष्यामि तदत्रैव प्रत्ययः। प्रभातेऽवसरवेलायाम् आरक्तमुखनयनः स्फुरिताधरो दिशोऽवलोकयन् अनुचितस्थानोपविष्टस्त्वां क्रूरदृष्ट्या विलोकयिष्यति। एवं ज्ञात्वा यदुचितं तत्कर्तव्यम्।" इति कथयित्वा सञ्जीवकसकाशं गतः प्रणम्य उपविष्टः। सञ्जीवकोऽपि सोद्वेगाकारं मन्दगत्या समायान्तं तमुद्वीक्ष्य सादरतरमुवाच—"भो मित्र! स्वागतम्, चिराद् दृष्टोऽसि, अपि शिवं भवतः? तत्कथय येनादेयमपि तुभ्यं गृहागताय प्रयच्छामि।

उक्तञ्च—

ते धान्यास्ते विवेकज्ञास्ते सभ्या इह भूतले।
आगच्छन्ति गृहे येषां कार्यार्थं सुहृदो जनाः॥ 285

दमनक आह—"भोः! कथं शिवं सेवकजनस्य। यतः—

Splitting of Sandhis

आलापमात्रम्+अपि सर्वे-अपि सिंहादयः+मृगान् सः+अपि कोलाहलः+अश्रावि विरौतुम्+आरब्धवान् सिंहादयः+तम् तारस्वरम्+आकर्ण्य शृगालः+अयम्+इति सलज्जम्+अधोमुखाः क्षणम् एकम् वयम्+अनेन तत्+वध्यताम् पलायितुम्+इच्छन् मृतः+च अतः+अहम् त्यक्ताः+च+अभ्य तद्+आकर्ण्य प्रत्ययः+अत्र मम+उपरि मम+अग्रे तत्+अत्र+एव प्रभाते+अवसर दिशः+अवलोक उपविष्टः+त्वाम् तत्+कर्तव्यम् सञ्जीवकः+अपि तम्+उद्दीक्ष्य सादरतरम्+उवाच दृष्टः+असि येन+अदेयम्+अपि धन्याः+ते विषेकन्याः+ते

Splitting of Compounds

अमात्यस्य पदवी अमात्यपदवी T.C. शय्यायाः पालकत्वम् T.C. ताम्रचूलस्य अधिकारः T.C. द्वारस्यपालकत्वम् T.C. राज्यस्य क्रियायाम् T.C. शृगालानाम् वृन्दम् तस्य T.C. पुलकितः तनुः यस्य B.C. अधः मुखम् येषां ते B.C. दुष्टा बुद्धिः यस्य सः B.C. आरक्तेमुखनयने यस्य सः B.C. स्फुरितः अधरः यस्य सः B.C. अनुचितस्थाने उपविष्टः T.C. मन्दा च सा गतिश्च तया K C.

Parsing

प्रदत्ता P.P.P. दा+प्र निः सारिताः P.P.P. सृ with निस् वर्तमानस्य pre P. वर्त् व्यापाद्य I.P.P. पद् with वि and आ प्रविभज्य I.P.P. भजू with प्र and वि अश्रावि Aorist I st श्रु प्रोचुः S. perfect III P. वच् वधिष्यामि II nd Future वधू to kill. अवलोकयन् pre P. लोक् with अव विलोकयिष्यति II nd Future लोक् with वि कथय Imperative II S.

Meaning

पुलकित =மயிர்க்கூச்சலுற்ற विरौतुम्=ஊளை இட वाहिताः= ஆளப்பட்டோம் आभ्यन्तरः=தன் இனத்தவர் शिवम्=க்ஷேமம்

सम्पत्तयः परायत्ताः सदा चित्तमनिर्वृतम् ।
स्वजीवितेऽप्यविश्वासस्तेषां ये राजसेवकाः ॥ 286

तथा च—

सेवया धनमिच्छद्भिः सेवकैः पश्य यत्कृतम् ॥
स्वातन्त्र्यं यच्छरीरस्य मूढैस्तदपि हारितम् ॥ 287

तावज्जन्मातिदुःखाय ततो दुर्गतता सदा ।
तत्रापि सेवया वृत्तिरहो दुःखपरम्परा ॥ 288

जीवन्तोऽपि मृताः पञ्च श्रूयन्ते किल भारते ।
दरिद्रो व्याधितो मूर्खः प्रवासी नित्यसेवकः ॥ 289

नाश्नाति स्वेच्छयोत्सुक्याद्विनिद्रो न प्रबुध्यते ।
न निःशंकं वचो ब्रूते सेवकोऽप्यत्र जीवति ॥ 290

सेवा श्ववृत्तिराख्याता यैस्तैर्भिक्ष्या प्रजल्पितम् ।
स्वच्छन्दं चरति श्वाऽत्र सेवकः परशासनात् ॥ 291

भूशय्या ब्रह्मचर्य्यञ्च कृशत्वं लघुभोजनम् ।
सेवकस्य यतेर्यद्वद्विषयः पापधर्म्मजः ॥ 292

शीतातपादिकष्टानि सहते यानि सेवकः ।
धनाय तानि चाल्पानि यदि धर्मान्न मुच्यते ॥ 293

मृदुनापि सुवृत्तेन सुश्लिष्टेनापि हारिणा ।
मोदकेनापि किं तेन निष्पत्तिर्यस्य सेवया ॥ 294

सञ्जीवक आह—"अथ भवान् किं वक्तुमनाः ?" सोऽब्रवीत्—"मित्र ! सचिवानां मन्त्रभेदं कर्तुं न युज्यते ।

उक्तञ्च—

यो मन्त्रं स्वामिनो भिद्यात्साचिव्ये सन्नियोजितः ।
स हत्वा नृपकार्यं तत्स्वयञ्च नरकं व्रजेत् ॥ 295

Splitting of Sandhis

चित्तम्+अनिर्वृतम् स्वजीविते+अपि+अविश्वासः+तेषाम् धनम्+इच्छद्भिः यत्+शरीरस्य मूढैः+तद्+अपि तावत्+जन्म+अतिवृत्तिः+अहो जीवन्तः+अपि न+अश्नाति स्वेच्छया+औत्सुक्यात्+विनिद्रः सेवकः+अपि+अत्र श्ववृत्तिः+आख्याता यैः+तैः+मित्थ्या श्वा+अत्र ब्रह्मचर्यम्+च यतेः+यद्वत्+विषयः धर्मात्+न मृदुना+अपि सुश्लिष्टेन+अपि मोदकेन+अपि निष्पत्तिः+यस्य सः+अब्रवीत् भिद्यात्+साचिव्ये तत्+स्वयम्+च

Splitting of Compounds.

स्वस्य जीवितम् तस्मिन् T.C. न विश्वासः अविश्वासः T.C. राज्ञाम् सेवकाः राजसेवकाः T.C. दुःखानाम् परम्परा दुःखपरम्परा T.C. शुनः वृत्तिः श्ववृत्तिः T.C परस्य शासनम् तस्मात् T.C भूरेवशय्या भूशय्या K.C. पापधर्मात् जः पापधर्मजः T.C. शीतातपादीनि च तानि कष्टानि च K.C. वक्तुम् मनः यस्य सः वक्तुमनाः B.C. मन्त्राणाम् भेदः तम् T.C. नृपस्य कार्यम् नृपकार्यम् T.C.

Parsing

इच्छद्भिः pre. P. इष् पश्य Imperative. II S. हारितम् Ca. P.P.P. हृ जीवन्तः pre. P. जीव् मृताः P.P.P. मृ श्रूयन्ते passive. III P. श्रु अश्नाति pre. III S. अश् प्रबुध्यते passive III S. present. बुध्+प्र ब्रूते present. III S ब्रू आख्याता P.P.P. चक्ष् to speak with आ प्रजल्पितम् P.P.P. जल्प् with प्र मुच्यते passive. III S. मुच् आह present. III S. ब्रू अब्रवीत् Imperfect. III S. ब्रू भिद्यात् pot. III S. भिद् व्रजेत् pot. III S. व्रज्

Meaning

संपत्तयः = செல்வங்கள் **परायत्ताः** = பிறருக்குக் கட்டுப்பட்டவை **हारितम्** – பறிகொடுக்கப்பட்டுவிட்டது **प्रवासी** – மனைவியைப் பிரிந்து வெளிநாட்டில் வசிப்பவன் **व्याधितः** = பிணிஉள்ளவன் **सचिव** = மந்திரி.

येन यस्य कृतो भेदः सचिवेन महीपतेः ।
तेनाशस्त्रवधस्तस्य कृत इत्याह नारदः ॥ 296

तथापि मया तव स्नेहपाशबद्धेन मन्त्रभेदः कृतः । यतस्त्वं मम वचनेनात्र राजकुले विश्वस्तः प्रविष्टश्च ।

उक्तञ्च—

विश्रम्भाद्यस्य यो मृत्युमवाप्नोति कथञ्चन ।
तस्य हत्या तदुत्था सा प्राहेदं वचनं मनुः ॥ 297

तत् तवोपरि पिङ्गलकोऽयं दुष्टबुद्धिः । कथितं च अद्य अनेन मत्पुरतश्चतुर्कर्णतया—"यत्प्रभाते सञ्जीवकं हत्वा समस्तमृगपरिवारं चिरात् तृप्तिं नेष्याभि" । ततः च मयोक्तः—"स्वामिन् ! न युक्तमिदं यन्मित्रद्रोहेण जीवनं क्रियेत ।

उक्तञ्च—

अपि ब्रह्मवधं कृत्वा प्रायश्चित्तेन शुद्ध्यति ।
तदर्हेण विचीर्णेन न कथञ्चित्सुहृद्द्रुहः ॥ 298

ततस्तेनाहं सामर्षेणोक्तः—"दुष्टबुद्धे ! सञ्जीवकस्तावत् शश्वभोजी, वयं मांसाशिनस्तदस्माकं स्वाभाविकं वैरमिति कथं रिपुरुपेक्ष्यते । तस्मात् सामादिभिरुपायैर्हन्यते । न च हते तस्मिन् दोषः स्यात् ।

उक्तञ्च—

दत्वापि कन्यकां वैरी निहन्तव्यो विपश्चिता ।
अन्योपायैरशक्यो यो हते दोषो न विद्यते ॥ 298

कृत्याकृत्यं न मन्येत क्षत्रियो युधि सम्मतः ।
प्रसुप्तो द्रोणपुत्रेण धृष्टद्युम्नः पुरा हतः ॥ 300

तदहं तस्य निश्चयं ज्ञात्वा त्वत्सकाशमिहागतः । साम्प्रतं मे नास्ति विश्वासघातकदोषः । मया सुगुप्तमन्त्रस्तवः निवेदितः । अथ यत् ते प्रतिभाति तत्कुरुष्व" इति । अथ सञ्जीवकस्त तद्वज्रपा तदारुण वचनं श्रुत्वा मोहमुपागतः । अथ चेतनां लब्ध्वा सवैराग्यमिदमाह—

Splitting of Sandhis

तेन+अशस्त्रवधः+तस्य इति+आह यतः+त्वम् वचनेन+अत्र प्रविष्टः+च उक्तम्+च विश्रम्भात्+यस्य मृत्युम्+अवाप्नोति प्राह+इदम् तव+उपरि पिङ्गलकः+अयम् मत्पुरतः+चतुर्कर्ण मया+उक्तः युक्तम्+इदम् यत्+मित्रद्रोहेण कथञ्चित्+सुहृद् ततः+तेन+अहम् सामर्षेण+उक्तः सञ्जीवकः+तावत् मांसाशिनः+ तद्+अस्माकम् वैरम्+इति रिपुः+उपेक्ष्यते सामादिभिः+उपायैः+ हन्यते उक्तम्+च दत्वा+अपि अन्योपायैः+अशक्यः तद्+अहम् त्वत्सकाशम्+इह+आगतः सुगप्तमन्त्रः+तव सञ्जीवकः+तस्य मोहम्+उपगतः सवैराग्यम्+इदम्+आह. च+इदम्+उच्यते

Splitting of Compounds

स्नेहपाशेन बद्धः तेन T·C· मन्त्राणाम् भेदः मन्त्रभेदः T·C· दुष्टा बुद्धिः यस्य B·C· मम पुरतः मत्पुरतः T·C· समस्तमृगाणाम् परिवारः तम् T·C मित्रस्य+द्रोहः तेन T·C· सुहृद्द्रोहः तेन T·C अमर्षेण सह वर्तते ईति सामर्षः तेन B·C· शष्पाणाम् भोजी शष्पभोजी T·C· मांसस्य अशिनः मांसाशिनः T·C· कृत्यश्च अकृत्यश्च तयोः समाहारः D·C· द्रोणस्य पुत्रः तेन द्रोणपुत्रेण T·C. वज्रपातवत् दारुणम् वज्रपातदारुणम् K·C· वैराग्येण सह वर्तते सवैराग्यम् B·C.

Parsing

अवाप्नोति Pre I1I S. आप् with अव नेष्यामि II nd· F· I st S. शुध्यति Pre III S. शुध् मन्येत Pot III S. मन् प्रसुप्तः P.P.P· स्व+प्र ज्ञात्वा I·P·P ज्ञा निवेदितः P·P·P. विद् with नि लब्ध्वा I·P·P.

Meaning

चतुःकर्णतया = இரகசியமாக विचीर्णेन = விரதம் பிடிப்பதனாலும் द्रोणपुत्रेण = அசுவத்தாமாவினால்.

दुर्जनगम्या नार्य्यः प्रायेणास्नेहवान्भवति राजा !
कृपणानुसारि च धनं मेघोगिरिदुर्गवर्षी च !! 301

अहं हि सम्मतो राज्ञो य एवं मन्यते कुधीः !
बलीवर्दः स विज्ञयो विषाणपरिवर्जितः !! 302

वरं वनं वरं भैक्ष्यं वरं भारोपजीवनम् !
वरं व्याधिनुष्याणां नाधिकारेण सम्पदः !! 303

तदयुक्तं मया कृतं यदनेन सह मैत्री विहिता ।
उक्तञ्च—

ययोरेव समं वित्तं ययोरेव समं कुलम !
तयोर्मैत्री विवाहश्च न तु पुष्टविपुष्टयोः !! 304

तथा च—

मृगा मृगैः सङ्गमनुव्रजन्ति गावश्च गोभिस्तुरगास्तुरङ्गैः !
मूर्खाश्च मूर्खैः सुधियः सुधीभिः समानशीलव्यसनेन
सख्यम् !! 305

तद्यदि गत्वा तं प्रसादयामि तथापि न प्रसादं यास्यति ।
उक्तञ्च—

निमित्तमुद्दिश्य हि यः प्रकुप्यति ध्रुवं स तस्यापगमे
प्रशाम्यति !
अकारणद्वेषपरो हि यो भवेत् कथं नरोसौ
परितोषयिष्यति !! 306

अहो! साधु चेदमुच्यते—

भक्तानामुपकारिणां परहितव्यापारयुक्तात्मनां
सेवासंव्यवहारतत्त्वविदुषां द्रोहच्युतानामपि !
व्यापत्तिः स्खलितान्तरेषु नियता सिद्धिर्भवेद्वा न वा
तस्मादम्बुपतेरिवावनिपतेः सेवा सदा शङ्कनी ! !307

तथा च—

भावस्निग्धैरुपकृतमपि द्वेष्यतां याति लोके
साक्षादन्यैरपकृतमपि प्रीतये चोपयाति !
दुर्ग्राह्यत्वान्नृपतिमनसां नैकभावाश्रयाणां
सेवाधर्म्मः परमगहनो योगिनामप्यगम्यः !! 308

Splitting of Sandhis

प्रायेण+अस्नेहवान् मेधः+गिरिदुर्गवर्षी सम्मतः+राज्ञः विज्ञेयः+व्याधिः+मनुष्याणाम् तत्+अयुक्तम् यत्+अनेन ययोः+-एव ययोः+मैत्री विवाहः+च सङ्गम्+अनुव्रज गावः+च+गोभिः तुरगाः+तुरङ्गैः मूर्खाः+च तत्+यदि निमित्तम्+उद्दिश्य तस्य+अपगेम नरः+तम् च+इदम्+उच्यते भक्तानाम्+उपकारिणाम् द्रोह-च्युतानाम्+अपि सिद्धिः+भवेत्+वा तस्मात्+अम्बुपतेः+इव+अवनिपतेः भावस्निग्धैः+उपकृतम्+अपि च×उपयाति दुर्ग्राह्य-त्वात्+नृप योगिनाम्+अपि+अगम्यः

Splitting of Compounds

दुर्जनैः गम्याः दुर्जनगम्याः T·C· कृपणस्य अनुसारी T·C· गिरिदुर्गेषु वर्षी गिरिदुर्गवर्षी T·C· विषाणाभ्यां परिवर्जितः T·C· पुष्टश्च विपुष्टश्च पुष्टविपुष्टौ D·C· समाने शीलव्यसने यस्य B.C. परहितव्यापारेषु युक्तः आत्मा येषाम् B·C· द्रोहात् च्युता तेषाम् T·C· अवन्याः पतिः अवनिपतिः तस्य T·C· सेवायाः धर्मः सेवाधर्मः T·C.

Parsing

विज्ञेयः pot. P· ज्ञा with वि विहिता P·P·P. धा with वि उक्तम् P·P·P. वच् यास्यति IInd. Future· III S· या to go उद्दिश्य I·P·P· दिश् with उद् भवेत् pot· III S· भू परि-तोषयिष्यति IInd· Future· III S· तोष् with परि उच्यते passive· present· III S वच् उपयाति present. I.I S. या with उप अगम्यः pot. P· गम्

Meaning

कुधीः = கெட்டபுத்திக்காரன் बलीवर्दः = மாடு विषाण = கொம்பு भारोपजीवनम् = மூட்டைதூக்கிப் பிழைப்பது वित्तम् = செல்வம் पुष्टविपुष्टयोः = பணக்காரனுக்கும் ஏழைக்கும் व्यापत्तिः = ஆபத்து अम्बुपतेः = மேகத்தினது अवनिपति = மன்னன் दुर्ग्राह्यत्वात् = அறியமுடியாததனால்

तत्परिज्ञातं मया तत् प्रसादमसहमानैः समीपवर्त्तिभिः एष पिङ्गलकः प्रकोपितः। तेनायं मम अदोषस्यापि एवं वदति।

उक्तञ्च—

प्रभोः प्रसादमन्यस्य न सहन्तीह सेवकाः!
सपत्न्य इव संक्रुद्धाः स्वपत्न्याः सुकृतैरपि !! 309

भवति चैवं यद्गुणवत्सु समीपवर्तिषु गुणहीनानां प्रसादो न भवति!

उक्तञ्च—

गुणवत्तरपात्रेण छाद्यन्ते गुणिनां गुणाः!
रात्रौ दीपशिखाकान्तिर्न भानावुदिते सति !! 310

दमनक आह—"भो मित्र! यद्येवं तन्नास्ति ते भयं प्रकोपितोऽपि स दुर्जनैः तव वचनरचनया प्रसादं यास्यति"। स आह—"भोः! न युक्तमुक्तं भवता लघूनामपि दुर्जनानां मध्ये वस्तुं न शक्यते। उपायान्तरं विधाय ते नूनं घ्नन्ति।

उक्तञ्च—

बहवः पण्डिताः क्षुद्राः सर्वे मायोपजीविनः!
कुर्य्युः कृत्यमकृत्यं वा उष्ट्रे काकादयो यथा !! 311

दमनक आह—"कथमेतत्?" सोऽब्रवीत—

कथा 11

कस्मिंश्चिद्वनोद्देशे मदोत्कटो नाम सिंहः प्रतिवसति स्म। तस्य च अनुचरा अन्ये द्वीपिवायसगोमायवः सन्ति। अथ कदाचित् तैः इतस्ततो भ्रमद्भिः सार्थभ्रष्टः कथनको उष्ट्रो दृष्टः। अथ सिंह आह—"अहो! अपूर्वमिदम् सत्त्वम्। तज्ज्ञातां किमेतदारण्यकं ग्राम्यं वा इति। तच्छ्रुत्वा वायस आह—"भोः स्वामिन्! ग्राम्योऽयमुष्ट्रनामा जीवविशेषस्तव भोज्यः। तत् व्यापाद्यताम्।" सिंहः—"नाहं गृहागतं हन्मि।

गृहे शत्रुमपि प्राप्तं विश्वस्तमकुतो भयम्।
यो हन्यात्तस्य पापं स्याच्छत्रघ्नाह्मणघातजम् !! 312

Splitting of Sandhis

प्रसादम्+असहमानैः तेन+अयम् अदोषस्य+अपि उक्तम्+च प्रसादम्+अन्यस्य सहन्ति+इह सपत्न्यः+इव सुकृतैः+अपि च+एवम् कान्तिः+न भानौ+उदिते यदि+एवम् तत्+न+अस्ति प्रकोपितः+अपि युक्तम्+उक्तम् लघूनाम्+अपि उक्तम्+च कृत्यम्+अकृत्यम् काकादयः+अपि कथम्+एतत् सः+अब्रवीत् कस्मिंश्चित्+वन अपूर्वम्+इदम् तत्+ज्ञायताम् किम्+एतत्+आरण्य तत्+श्रुत्वा ग्राम्यः+अयम्+उष्ट्रनामा जीव विशेषः+तव गृहम्च आगतम् शत्रुम्+अपि विश्वस्तम्+अकुतो स्यात्+शतब्राह्मण

Splitting of Compounds

गुणैः हीनाः तेषाम् T.C. दीपशिखायाः कान्तिः T.C. वचनानाम् रचना तया T.C. मायया उपजीविनः T.C. द्वीपिनश्च वायसाश्च गोमायवश्च D.C. सार्थात् भ्रष्टः सार्थभ्रष्टः T.C. उष्ट्रः इति नाम यस्य सः B.C. शतब्रह्माणानां घातेन जम् T.C.

Parsing.

प्रकोपितः P.P.P. कुप्+प्र उक्तम् P.P.P. वच् सहन्ति pre III P. सह् संक्रुद्धाः P.P.P. क्रुध् with सम् छाद्यन्ते Passive छाद् III P. उदिते P.P.P. वद् सति Pre P. अस् यास्यति II nd future III S. या शक्यते Pre III S. घ्नन्ति Pre III P हन् to kill. भ्रमद्भिः Pre P. भ्रम् दृष्ट P.P.P. दृश् ज्ञायताम् Imperative passive III S. ज्ञा भोज्य pot P. भुज् to eat प्राप्तम् P.P.P. आप् with प्र pot हन्यात् Pot S हन् स्यात् Pot III S. अस्

Meaning

सपत्न्यः = சக்களத்திகள் छाद्यन्ते = மறைக்கப்படுகின்றன भानु = சூரியன் क्षुद्राः = அற்பர்கள் उष्ट्र = ஒட்டகம் गोमायु = நரி सार्थभ्रष्टः = கூட்டத்திலிருந்து தவறிய घात = கொல்லுதல்.

तदभयप्रदानं दत्वा मत्सकाशमानीयतां येन अस्यागमनकारणं पृच्छामि"। अथ असौ सर्वैरपि विश्वास्य अभयप्रदानं दत्वा मदोत्कटसकाशमानीतः प्रणम्योपविष्टश्च। ततस्तस्य पृच्छतस्तेनात्मवृत्तान्तः सार्थभ्रंशसमुद्भवो निवेदितः। ततः सिंहेनोक्तम्—"भो क्रथनक! मा त्वं ग्रामं गत्वा भूयोऽपि भारोद्वहनकष्टभागी भूयाः। तदत्रैव अरण्ये निर्विशङ्को मरकतसदृशानि शष्पाग्राणि भक्षयन् मया सह सदैव वस"। सोऽपि तथेत्युक्त्वा तेषां मध्ये विचरन् न कुतोऽपि भयमिति सुखेन आस्ते

तथान्येद्युर्मदोत्कटस्य महागजेन अरण्यचारिणा सह युद्धमभवत्। ततस्तस्य दन्तमुसलप्रहारैर्व्यथा सञ्जाता। व्यथितः कथमपि प्राणैर्न वियुक्तः। अथ शरीरासामर्थ्यात् न कुत्रचित्पदमपि चलितुं शक्नोति। तेऽपि सर्वे काकादयोऽप्रभुत्वेन क्षुधाविष्टाः परं दुःखं भेजुः। अथ तान् सिंहः प्राहभोः! अन्विष्यतां कुत्रचित् किञ्चित् सत्वं येन अहमेतामपि दशां प्राप्तस्तद्धत्वा युष्मत्प्रीतिं सम्पादयामि"।

अथ ते चत्वारोऽपि भ्रमितुमारब्धा यावन्न किञ्चित् सत्वं पश्यन्ति तावद्धायसशृगालौ परस्परं मन्त्रयतः। शृगाल आह—"भो वायस! किं प्रभूतभ्रान्तेन, अयमस्माकं प्रभोः क्रथनको विश्वस्तस्तिष्ठति। तदेनं हत्वा प्राणयात्रां कुर्मः"। वायस आह—"युक्तमुक्तं भवता, परं स्वामिना तस्य अभयप्रदानं दत्तमास्ते न वध्योऽयम्" इति। शृगाल आह—"भो वायस! अहं स्वामिनं विज्ञाप्य तथा करिष्ये यथा स्वामी वधं करिष्यति। तत्तिष्ठन्तु भवन्तोऽत्रैव यावदहं गृहं गत्वा प्रभोराज्ञां गृहीत्वा च आगच्छामि"।

एवमभिधाय सत्वरं सिंहमुद्दिश्य प्रस्थितः। अथ सिंहमासाद्य इदमाह— "स्वामिन्! समस्तवनं भ्रान्त्वा वयमागताः न किञ्चित्सत्वमासादितम्, तत किं कुर्मो वयम्। सम्प्रति वयं बुभुक्षया पदमेकमपि प्रचलितुं न शक्नुमः। देवोऽपि पथ्याशी वर्तते। तद्यदि देवादेशो भवति तत् क्रथनकपिशितेन अद्य पथ्यक्रियां क्रियेत"॥

Splitting of Sandhis

मत्सकाशम्+आनीयताम् अस्य+आगमन सर्वैः+अपि सकाशम् आनीतः प्रणम्य+उपविष्टः+च ततः+तस्य पृच्छतः+तेन+ आत्मवृत्तान्तः सिंहेन+उक्तम् तत्+अत्र+एव सदा+एव तथा+ इति+उक्त्वा कुतः+अपि त्रयम्+इति तथा+अन्येद्युः+मदोत्कटस्य युद्धम्+अभवत् ततः+तस्य प्रहारैः+व्यथा प्राणैः+न कुत्रचित्+ पदम्+अपि ते+अपि काकादयः+अप्रभु अहम्+एताम्+अपि प्राप्तः+तत्+हत्वा भ्रमितुम्+आरब्धा विश्वस्तः+तिष्ठति युक्तम्+ उक्तम् दत्तम्+आस्ते वध्यः+अयम् तत्+तिष्ठन्तु भवन्त+अत्र+ प्रभोः+आज्ञाम्+एवम्+अभिधाय+सिंहम्+उद्दिश्य सिंहम्+आसाद्य +इदम्+आह वयम्+आगताः किञ्चित्+सत्वम्+आसादितम् पदम्+ एकम्+अपि तत्+यदि

Splitting of Compounds

अभयस्य प्रदानम् T·C· मदोत्कटस्य सकाशम् T·C· आत्मनः वृत्तान्तः T·C· महांश्चासौ गजश्च K·C· अरण्ये चारिणा T·C. वायसश्च शृगालश्च वायसशृगालौ D,C· समस्त श्वतत् वनञ्च K·C. ? वस्य आदेशः T·C· कथनकस्य पिशितम् तेन कथनकपिशितेन T·C· पथ्यस्य क्रिया T·C·

Parsing

दत्वा I·P·P· दा विश्वास्य I·P·P· श्वस् with वि भक्षयन् pre. P· भक्ष् वस Imperative. IInd· S· विचरन् present· P. चर् with वि आस्ते present· III S· आस् to sit. सञ्जात P·P·P· जन् with सम वियुक्त: P·P·P· युज् with वि भेजुः Y· perfect· III P· भज् संपादयामि present· Ist· S· पद् with सम् मन्त्रयतः pre· III D कुर्मः pre· Ist. D. वध्यः pot· P· हन् विज्ञाप्य I.P·P· ज्ञा with वि अभिवाय I·P·P· धा with अभि भ्रान्त्वा I.P·P· भ्रम् प्रचलितुम् Infini· चल् with प्र क्रियेत pot· III S· कृ

Meaning

शष्प = புல் कथनक = கிரதநகன்என்னும் ஓட்டகம் पिशित = இறைச்சி

सिंहस्य तद्दारुणं वचनमाकर्ण्य सकोपमिदमाह—"धिक् पापाधम! यद्येवं भूयोऽपि वदसि, ततः त्वां तत्क्षणमेव वधिष्यामि। यतो मया यस्य अभयं प्रदत्तम्। तत् कथं व्यापादयामि।

उक्तञ्च—

न गोप्रदानं न महीप्रदानं न चान्नदानं हि तथा प्रधानम्।
यथा वदन्तीह बुधाः प्रधानं सर्वप्रदानेष्वभयप्रदानम्॥" 313

तच्छ्रुत्वा शृगाल आह—"स्वामिन्! यदि अभयप्रदानं दत्त्वा वधः क्रियते तदा एष दोषो भवति। पुनर्यदि देवपादानां भक्त्या स आत्मनो जीवितव्यं यच्छति तत्र दोषः। ततो यदि स स्वयमेव आत्मानं वधाय नियोजयति तद्वध्योऽन्यथा अस्माकं मध्या देकतमो वध्य इति, यतो देवपादाः पथ्याशिनः क्षुन्निरोधादन्त्यां दशां यास्यन्ति। तत् किमेतैः प्राणैरस्माकं ये स्वाम्यर्थे न यास्यन्ति। अपरं पश्चादपि अस्माभिर्बहूनि-प्रवेशः कार्यः, यदि स्वामिपादानां किञ्चिदनिष्टं भविष्यति।

उक्तञ्च—

यस्मिन्कुले यः पुरुषः प्रधानः स सर्वयत्नैः परिरक्षणीयः।
तस्मिन्विनष्टे कुलसारभूते न नाभिभंगे ह्यरयो वहन्ति॥ 314

तदाकर्ण्य मदोत्कट आह—"यद्येवं तत् कुरुष्व यद्रोचते"। तच्छ्रुत्वा स सत्वरं गत्वा तान् आह—"भोः! स्वामिनो महती अवस्था वर्तते, तत् किं पर्यटितेन। तेन विना कोऽत्र अस्मान् रक्षयिष्यति। तद्गत्वा तस्य क्षुद्रोगात् परलोकं प्रस्थितस्य आत्मशरीरदानं कुर्मो येन स्वामिप्रसादस्य अनृणतां गच्छामः।

उक्तञ्च—

आपदं प्राप्नुयात्स्वामी यस्य भृत्यस्य पश्यतः।
प्राणेषु विद्यमानेषु स भृत्यो नरकं व्रजेत्॥ 315

तदनन्तरं ते सर्वे बाष्पपूरितदृशो मदोत्कटं घणमस्य उपविष्टाः। तान् दृष्ट्वा मदोत्कट आह—"भोः! प्रातं दृष्टं वा किञ्चित् सत्वम्?"।

Splitting of Sandhis

वचनम्+आकर्ण्य सकोपम्+इदम्+आह यदि+एवम् तत्क्षणम्+एव उक्तम्+च च+अन्नदानम् वदन्ति+इह सर्वप्रदानेषु+अभय तत्+श्रुत्वा पुनः+यदि तत्+न=तन्न स्वयम्+एव तद्बध्यः+अन्यथा मध्यात्+एकतमः क्षुन्निरोधात्+अन्त्याम् · किम्+एतैः प्राणैः+ असाभिः+वह्निप्रवेशः किञ्चिम्+अनिष्टम् यस्मिन्+कुले तस्मिन्+ विनष्टे हि+अरयः तद्+आकर्ण्य यदि+एवम् यद्+रोचते तत्+श्रुत्वा कः+अत्र तत्+गत्वा प्रामुयात्+स्वामी भृत्यः+नरकम्

Splitting of Compounds

कोपेन सह वर्तते इति सकोपम् B.C. गो प्रदानम् गोप्रदानम् T.C. मह्याः प्रदानम् महीप्रदानत् T.C. अन्नस्य दानम् T.C. अभयस्य प्रदानम् अभयप्रदानम् T.C. कुलस्य सारभूतः तस्मिन् T.C. नाभेः भङ्गः नाभिभङ्गः T.C. आत्मशरीरस्य दानम् T.C. स्वामिनः प्रसादः तस्यः T.C. बाष्पैः पूरिता दृग् येषाम् ते B.C.

Parsing

आकर्ण्य I.P.P. कर्ण् with आ आह pre III S. ब्रू वधिष्यामि II nd. future Ist S वध् to kill श्रुत्वा I.P.P. श्रु प्रयच्छति Pre S. यच्छ्+प्र वध्यः pot P. वध् यास्यन्ति II nd. future III P. या भविष्यति II nd future III S. भव् कुरुष्व Imperative II nd S. कृ to do रोचते pre III S. रोच् रक्षयिष्यति II nd future III d. S. रक्ष् प्रापूनुवन्ति pte III d. P. आप्+प्र व्रजेत् pot III S. व्रज् प्रणम्य I.P.P. नम् with प्र दृष्टम् P.P.P. दृश् to se

Meaning

दारुणम्=கொடிய धिक् = அவமதிப்பைக்காட்டும் சொல் दशाम्= நிலையை नाभि = வண்டியின் குடம்.

अथ तेषां मध्यात् काकः प्रोवाच—"स्वामिन्! वयं तावत् सर्वत्र पर्य्यटिताः, परं न किञ्चित्सत्वमासादितं दृष्टं वा। तदद्य मां भक्षयित्वा प्राणान् धारयतु स्वामी, येन देवस्य आश्वासनं भवति मम पुनः स्वर्गप्राप्तिरिति।

उक्तञ्च—

स्वाम्यर्थे यस्त्यजेत्प्राणान्भृत्यो भक्तिसमन्वितः।
परं स पदमाप्नोति जरामरणवर्जितम्॥ 316

तच्छ्रुत्वा शृगाल आह—"भोः! स्वल्पकायो भवान्, तव भक्षणात् स्वामिनस्तावत् प्राणयात्रा न भविष्यतीति, अपरो दोषश्च तावत् समुत्पद्यते।

उक्तञ्च—

काकमांसं शुनोच्छिष्टं स्वल्पं तदपि दुर्लभम्।
भक्षितेनापि किं तेन तृप्तिर्येन न जायते॥ 317

तदर्शिता स्वामिभक्तिर्भवता, गतं च प्रानृण्यं भर्तृपिंडस्य, प्राप्तश्च उभयलोके साधुवादः। तदपसर अग्रतः अहं स्वामिनं विज्ञापयामि"। तथाऽनुष्ठिते शृगाले सादरं प्रणम्य उपविष्टः प्राह—"स्वामिन्! मां भक्षयित्वा अद्य प्राणयात्रां विधाय मम उभयलोकप्राप्तिं कुरु।

उक्तञ्च—

स्वाम्यायत्ताः सदा प्राणा भृत्यानामर्जिता धनैः।
यतस्ततो न दोषोऽस्ति तेषां ग्रहणसम्भवः॥ 318

अथ तच्छ्रुत्वा द्वीपी प्राह—"भोः! साधु उक्तं भवता, पुनः भवानपि स्वल्पकायः स्वजातिश्च, नखायुधत्वात् अभक्ष्य एव।

उक्तञ्च—

नाभक्ष्यं भक्षयेत्प्राज्ञः प्राणैः कण्ठगतैरपि।
विशेषात्तदपि स्तोकं लोकद्वयविनाशकम्॥ 319

तदर्शितं त्वया आत्मनः कौलीन्यम्। अथवा साधु खेद-मुच्यते—

Splitting of Sandhis

किञ्चित्+सत्वम्+आसादितम् तत्+अद्य स्वर्गप्राप्तिः+इति यः+त्यजेत्+प्राणान्+भृत्यः पदम्+आप्नोति तत्+श्रुत्वा स्वामिनः+तावत् भविष्यति+इति दोषः+च भक्षितेन+अपि तृप्तिः+न स्वामिभक्तिः+भवता प्राप्तः+च तत्+अवसर तथा+अनुष्ठिते भृत्यानाम्+अर्जिताः यतः+ततः दोषः+अस्ति भवान्+अपि स्वजातिः+च न+अभक्ष्यम् भक्षयेत्+प्राज्ञः कण्ठगतैः+अपि विशेषात्+तद्+अपि च+इदम्+उच्यते

Splitting of Compounds.

स्वर्गस्य प्राप्तिः स्वर्गप्राप्तिः T.C. भक्त्या समन्वितः भक्तिसमन्वितः T.C. जरामरणाभ्याम् वर्जितः तम् T.C. काकस्य मांसम् T.C. स्वामिनः भक्तिः स्वामिभक्तिः T.C भर्तुः पिण्डम् तस्य T.C. उभयलोकस्य प्राप्तिः तम् T.C. ग्रहणस्य सम्भवः T.C. स्वल्पम् कायः यस्य B.C. कण्ठम् गताः तैः T.C. लोकद्वयस्य विनाशकम् T.C.

Parssing

प्रोवाच S. perfect. III S. वच्+प्र पर्यटिताः P.P.P. अट् with परि भक्षयित्वा I.P.P. भक्ष् to eat. धारयतु Imperative. III S. धार् त्यजेत् pot. III S. त्यज् आप्नोति present. III S. आप् श्रुत्वा I.P.P. श्रु भविष्यति IInd. Future. भव् दर्शिता P.P.P. दृश् प्राप्तः P.P.P. आप् with प्र विज्ञापयामि present. Ist. S. ज्ञा with वि भक्षयेत् pot. III S. उच्यते passive. present. III S. वच्

Meaning.

पर्यटिताः=சுற்றிவரும் सत्वम्=பிராணி धारयतु=காப்பாற்றிக்கொள்ளுங்கள் आश्वासनम्=ஆறுதல் शुनोच्छिष्टम्=நாய் தின்று எஞ்சியது नखायुधत्वात्=நகத்தை ஆயுதமாகக்கொண்டதினால்.

एतदर्थं कुलीनानां नृपाः कुर्वन्ति संग्रहम् ।
आदिमध्यावसानेषु न ये गच्छन्ति विक्रियाम् ॥ 320

तदपसर अग्रतो येनाहं स्वामिनं विज्ञापयामि"। तथानुष्ठिते द्वीपी प्रणम्य मदोत्कटमाह—"स्वामिन्! क्रियताम् अद्य मम प्राणैः प्राणयात्रा दीयतामक्षयो वासः स्वर्गे, मम विस्तार्य्यतां क्षितितले प्रभूततरं यशः। तन्नात्र विकल्पः कार्य्यः। उक्तञ्च—

मृतानां स्वामिनः कार्य्ये भृत्यानामनुवर्तिनाम् ।
भवेत्स्वर्गेऽक्षयो वासः कीर्तिश्च धारणीतले ॥ 321

तच्छ्रुत्वा क्रथनकश्चिन्तयाञ्चास—"एतैः तावत्सवैरपि शोभनानि वाक्यानि प्रोक्तानि। न च एकोऽपि स्वस्वामिना विनाशितः। तदहमपि प्राप्तकालं विज्ञापयामि। येन मम वचनमेते त्रयोऽपि समर्थयन्ति"। इति निश्चित्य प्रोवाच—"भोः! सत्यमुक्तं भवता परं भवानपि नखायुधः। तत् कथं भवन्तं स्वामी भक्षयति।

उक्तञ्च—

मनसापि स्वजात्यानां योऽनिष्टानि प्रचिन्तयेत् ।
भवन्ति तस्य तान्येव इह लोके परत्र च ॥ 322

तदपसर अग्रतो येन अहं स्वामिनं विज्ञापयामि"। तथानुष्ठिते क्रथनकोऽग्रे स्थित्वा प्रणम्योवाच—"स्वामिन्! एते तावदभक्ष्या भवतां तत् मम प्राणैः प्राणयात्रा विधीयतां येन मम उभयलोकप्राप्तिर्भवेत्।

उक्तञ्च—

न यज्वानोऽपि गच्छन्ति तां गतिं नैव योगिनः ।
यां यान्ति प्रो ज्झितप्राणाः स्वाम्यर्थं सेवकोत्तमाः ॥ 323

एवमभिहिते ताभ्यां शृगालचित्रकाभ्यां वितारितोभयकुक्षिः क्रथनकः प्राणान् अत्याक्षीत्। ततश्च तैः क्षुद्रपिण्डतैः सर्वैः भक्षितः। अतोऽहं ब्रवीमि—"बहवः पिण्डताः क्षुद्राः" इति।

Splitting of Sandhis

तद्+अपसर अग्रतः+येन+अहम् तथा+अनुष्ठिते मदोत्कटम्+आह दीयताम्+अक्षयः तत्+न+अत्र+विक उक्तम्+च भृत्यानाम्+अनुवर्ति भवेत्+स्वर्गे+अक्ष कीर्तिः+च तत्+श्रुत्वा कथनकः+चिन्तयामास तावत्+सर्वैः+अपि एकः+अपि तद्+अहम् अपि वचनम्+एते त्रय[3]+अपि सत्यम्+उक्तम् भवान्+अपि मनसा+अपि यः+अनिष्टानि तानि+एव तद्+अपसर अग्रतः+येन तथा+अनुष्ठिते कथनकः+अग्रे प्रणम्य+उवाच तावत्+उभयलोकप्राप्तिः+भवेत् यज्वानः+अपि न+एव एतम्+अभिहिते ततः+च

Splitting of Compounds

अदिश्च मध्यश्च अवसानश्च तेषु D·C. नखम् आयुधम् यस्य सः K·C प्राणस्य यात्रा प्राणयात्रा T C प्रोज्झिताः प्राणाः यैः ते B· C. सेवकेषु उत्तमाः सेवकोत्तमाः T·C. शृगालश्च चिल्लकश्च ताभ्याम् D·C विदारितौ उभयकुक्षी यस्य B·C· क्षुद्राश्च ते पण्डिताश्च K·C·

Parsing

कुर्वन्ति Pre III P. कृ अपसर Imperative II nd· S· सृ with अप विज्ञापयामि Pre I st S· with वि अनुष्ठिते P.P.P स्था wiih अनु प्रणम्य I·P·P· नम्+प्र आह pre III S· ब्रू विस्तार्यताम् Imperative III S·तृ with वि भवेत् pot III· S. भू श्रुत्वा I·P·P· श्रु चिन्तयामास P· perfect III S· चिन्त् प्रोवाच S· perfe. III S· वच् with प्र प्रचिन्तयेत् pot III d· S· चिन्त्+प्र विधीयताम् Imperative III S· धा with वि यान्ति pre III P· या अभिहिते P.P·P· धा with अभि अत्याक्षीत् Aiorist III S त्यज्

Meaning

कुलीन =நல்லகுலத்தில் பிறந்தவன் धरणीतले =பூமியில்

क्षुद्राः =அற்பர்கள்.

तद्भद्र! क्षुद्रपरिवारोऽयं ते राजा मया सम्यग् ज्ञातः सतामसेव्यश्च ।

उक्तञ्च—

अशुद्धप्रकृतौ राज्ञि जनता नानुरज्यते ।
यथा गृध्रसमासन्नः कलहंसः समाचरेत् ॥ 324

तथा च—

गृध्राकरोऽपि सेव्यः स्याद्धंसाकारैः सभासदैः ।
हंसाकारोऽपि सन्त्याज्यो गृध्राकारैः स तैर्नृपः ॥ 325

तन्नूनं ममोपरि केनचित् दुर्जनेन अयं प्रकोपितः । तनैवं वदति । अथवा भवति एतत् ।

उक्तञ्च—

मृदुना सलिलेन खन्यमानान्यवधूत्यन्ति गिरेरपि स्थलानि ।
उपजापविदां च कर्णजापैः किमु चेतांसि मृदूनि मानवानाम् ॥ 326

कर्णविषेण च भग्नः किं किं न करोति बालिशो लोकः ।
क्षपणकतामपि धत्ते पिबति सुरां नरकपालेन ॥ 327

अथवा साधु चेदमुच्यते—

पादहतोऽपि दृढदण्डसमाहतोऽपि
यं दंष्ट्रया स्पृशति तं किल हन्ति सर्पः ।
कोऽप्येष एव पिशुनो ग्रमनुष्यधर्मः
कर्णे परं स्पृशति हन्ति परं समूलम् ॥ 328

अहो खलभुजङ्गस्य विपरीतो वधक्रमः ।
कर्णे लगति चैकस्य प्राणैरन्यो वियुज्यते ॥ 329

तदेवं गतेऽपि किं कर्तव्यमिति अहं त्वं सुहृद्भावात् पृच्छामि" दमनक आह—"तद्देशान्तरगमनं युज्यते न एवंविधस्य कुस्वामिनः। सेवां विधातुं ।

उक्तञ्च—

गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथं प्रतिपन्नस्य परित्यागो विधीयते ॥ 330

Splitting of Sandhis

क्षुद्रपरिवारः+अयम् सताम्+असेव्यम्+च न+अनुरज्यते गृध्राकारः+अपि स्यात्+हंसाकारैः हंसाकारः+अपि सन्+त्याज्यः तैः+नृपैः तत्+नूनम् मम+उपरि तेन+एवम् खन्यमानानि+अवधूय् गिरेः+अपि बालिशः+लोकः क्षपणकताम्+अपि च+इदम्+उच्यते पादाहतः+अपि दृढदण्डसमाहतः+अपि कः+अपि+एषः पिशुनोः+उग्रमनुष्य च+एकस्य प्राणैः+अन्यः तद्+एवम् गते+अपि कर्तव्यम्+इति गुरोः+अपि+अवलिप्तस्य कार्याकार्यम्+अजान परित्यागः+विधी

Splitting of Compounds

क्षुद्रः परिवारः यस्य B.C. पादेन आहतः पादाहतः T.C. दृढदण्डेन समाहतः T.C. पिशुन एव उग्रमनुष्यः तस्य K.C. खल एव भुजङ्गः तस्य K.C. वधस्य क्रमः T.C. कार्यञ्च अकार्यञ्च तयोः समाहारः D.C. उत्पथे प्रतिपन्नः तस्य T.C.

Parsing

ज्ञातः P.P.P. ज्ञा अनुरज्यते pre. III इ रञ्ज् with अनु सन् pre. P. अस् त्याज्यः pot. P. त्यज् प्रकोपितः P.P.P.: कुप् with प्र भग्नः P.P.P. भञ्ज् धत्ते pre. III S. धा पिबति Present. III S. पा (पिब्) उच्यते passive present. III S. वच् हन्ति present. III S. हन् to kill. वियुज्यते passive present. III S. युज् with वि विधातुम् Infinitive. धा with वि

Meaning

परिवार=சேனைகள் जनता ஜனக்கூட்டம் गृध्र=கழுகு बालिशः=விளையாட்டுத்தனமுள்ள क्षपणकता=ஜைனமதசன்னி ந்மை सुराम्=கள்ளை अवलिप्त=கர்வம்கொண்ட.

सञ्जीवक आह—"अस्माकमुपरि स्वामिनि कुपिते गन्तुं न शक्यते। न च अन्यत्र गतानामपि निर्वृतिर्भवति।

उक्तञ्च—

महतां योऽपराध्येत दूरस्थोऽस्मीति नाश्वसेत्!
दीर्घौ बुद्धिमतो बाहू ताभ्यां हिंसति हिंसकम्॥ 331
तद्युद्धं मुक्त्वा मे नान्यदस्ति श्रेयस्करम्।

उक्तञ्च...

न ताम् हि तीर्थैस्तपसा च लोकान् स्वर्गैषिणो दानशतैः सवृत्तैः
क्षणेन यान्यान्ति रणेषु धीराः प्राणान्समुज्झन्ति हि ये सुशीलाः। 332

मृतैः सम्प्राप्यते स्वर्गो जीवद्भिः कीर्तिरुत्तमा!
तदुभावपि शूराणां गुणावेतौ सुदुर्लभौ॥ 333

ललाटदेशे रुधिरं स्रवत्तु शूरस्य यस्य प्रविशेच्च वक्त्रे!
तत्सोमपानेन समं भवेच्च संग्रामयज्ञे विधिवत्प्रदिष्टम्॥ 334

तथा च—

होमार्थैर्विधिवत्प्रदानविधिना सद्विप्रवृन्दार्चनै-
र्यज्ञैर्भूरिसुदक्षिणैः सुविहितैः सम्प्राप्यते यत्फलम्!
सत्तीर्थाश्रमवासहोमनियमै श्चांद्रायणाद्यैः कृतैः
पुम्भिस्तत्फलमाहवे विनिहतैः सम्प्राप्यते तत्क्षणात्॥ 335

तदाकर्ण्य दमनकश्चिन्तयामास—"युद्धाय कृतनिश्चयोऽयं दृश्यते दुरात्मा। तद्यदि कदाचित् तीक्ष्णशृङ्गाभ्यां स्वामिनं प्रहरिष्यति तदा महान् अनर्थः सम्पत्स्यते। तदेनं भूयोऽपि स्ववुद्ध्या प्रबोध्य तथा करोमि यथा देशान्तरगमनं करोति"। आह च—"भो मित्र! सम्यक् अभिहितं भवता, परं कः स्वामिभृत्ययोः संग्रामः।

उक्तञ्च—

बलवन्तं रिपुं दृष्ट्वा किलात्मानं प्रगोपयेत्!
बलवद्भिश्च कर्तव्या शरच्चन्द्रप्रकाशता॥ 336

अन्यच्च—

शत्रोर्विक्रममज्ञात्वा वैरमारभते हि यः!
स पराभवमाप्नोति समुद्रष्टिट्टिभो यथा॥ 337

Splitting of Sandhis

अस्माकम्+उपरि गतानाम्+अपि निर्वृतिः+भवति उक्तम्+च यः+ अपराध्येत दूरस्थः+अस्मि+इति न+आश्वसेत तत्+युद्धम् न+अन्यम्+अस्ति तौर्थैः+तपसः प्राणान्+समुज्झन्ति कीर्तिः+ उत्तमा तत्+उभौ+अपि प्रविशेत्+च भवेत्+च विधिवत्+ प्रदिष्टम् होमार्थैः+विधिवत् अर्चनैः+यज्ञैः+भूरिसुदक्षिणैः नियमैः+ चान्द्रायणैः पुम्भिः+तत्फलम्+आहवे दमनकः+चिन्तयामास कृतनिश्चयः+अयम तत्+यदि किल+आत्मानम् बलवद्भिः+च अन्यत्+च शत्रोः+विक्रमम् अज्ञात्वा वैरम्+आरभते पराभवम्+ अवाप्नोति समुद्रः+टिट्टिभात्+यथा

Splitting of Compounds

ललाटस्य देशः तस्मिन् ललाटदेशे T·C· सोमस्य पानम् तेन सोमपानेन T·C· चान्द्रायणम् आदिः येषाम् B·C· तीक्ष्णौ च तौण्डौ च ताभ्याम् D·C· देशान्तरस्य गमनम् देशान्तरगमनम् T·C

Parsing

आह pre III S· ब्रू शक्यते pre· III S· शक् आश्वसेम् pot· III· S· श्वस् with आ हिंसति pre III S· हिंस् यान्ति pre I.I d. P· समुज्झन्ति pre III P· उज्झ् with सम् संप्राप्यते passive· pres III S· आप् with सम्+प्र विनिहतै P·P·P· हन् with वि+नि चिन्तयामास prei. prefect चिन्त् दृश्यते passive III S· दृश् to ses प्रहरिष्यति II nd· Future· III S· हृ with प्र प्रबोध्य I·P·P· बुध् with प्र अभिहितम् P·P·P· धा+अभि प्रगोपयेत् pot· III S· गुप्+प्र कर्तव्या pot P· कृ

Meaning

निर्वृतिः = ஆறுதல் रणेषु = போரில் ललाटदेशे = நெற்றியில்
वैरम् = விரோதம் टिट्टिभ = குருவி.

सञ्जीवक आह— "कथमेतत्?" सोऽब्रवीत्—

कथा 12

कस्मिंश्चित् समुद्रतीरैकदेशे टिट्टिभदम्पती प्रतिवसतः स्म । ततो गच्छति काले ऋतुसमयमासाद्य टिट्टिभी गर्भमाधत्त। अथ आसन्नप्रसवा सती सा टिट्टिभमूचे— भोः कान्त! मम प्रसवसमयो वर्तते । तद्विचिन्त्यतां किमपि निरुपद्रवं स्थानं येन तत्राहमण्डकविमोक्षणं करोमि" । टिट्टिभः प्राह— "भद्रे! रम्योऽयं समुद्रप्रदेशः । तदत्रैव प्रसवः कार्यः" । सा आह— "अत्र पूर्णिमादिने समुद्रवेला चरति । सा मत्तगजेन्द्रानपि समाकर्षति। तद्दूरमन्यत्र किंचित् स्थानमन्विष्यताम्" । तच्छ्रुत्वा विहस्य टिट्टिभ आह— "भद्रे! युक्तमुक्तम् भवत्या, का मात्रा समुद्रस्य या मम दूषयिष्यति प्रभूतिम् । किंन श्रुतं भवत्या—

बुद्ध्वाम्बरचरमार्गं व्यपगतधूमं सदा महद्धयदम् ।
मन्दमतिः कः प्रविशति हुताशनं स्वेच्छया मनुजः ।। 333

मत्तेभकुम्भविदलनकृतश्रमं सुप्तमन्तकप्रतिमं ।
यमलोकदर्शनेच्छुः सिंहं बोधयति को नाम ।। 339

को गत्वा यमसदनं स्वयमन्तकमादिशत्यजातभयः ।
प्राणानपहर मत्तो यदि शक्तिः काचिदस्ति तव ।। 340

प्रालेयलेशमिश्रे मरुति प्राभातिके च वाति जडे ।
गुणदोषज्ञः पुरुषो जलेन कः शीतमपनयति ।। 341

तस्मात् विश्रब्धा अत्रैव गर्भं मुञ्च ।

उक्तञ्च—

यः पराभवसन्त्रस्तः स्वस्थानं सन्त्यजेन्नरः ।
तेन चेत्पुत्रिणी माता तद्वन्ध्या केन कथ्यते ।। 342

तच्छ्रुत्वा समुद्रश्चिन्तयामास—"अहो! गर्वः पक्षिकीटस्यास्य। अथवा साधु चेदमुच्यते—

Splitting of Sandhis

कथम्+एतत् सः+अब्रवीत् ऋतुसमयम्+आसाद्य गर्भम्+आधन्त टिट्टिभम्+उचे समयः+वर्तते तत्र+अहम्+अण्ड रम्यः+अयम् तत्+अत्र+एव गजेन्द्रान्+अपि दूरम्+अन्यत्र स्थानम्+अन्विष्यताम् तत्+श्रुत्वा सुप्तम्+अन्तक स्वयम्+अन्तकम्+आदिशति+अजात प्राणान्+अपहर काचित्+अस्ति शीघ्रम्+अपनयति अत्र+एव सन्त्यजेत्+नरः चेत्+पुत्रिणी तत्+श्रुत्वा समुद्रः+चिन्तयामास पक्षिकीटकस्य+अस्य च+इदम्+उच्यते

Splitting of Compounds

समुद्रतीरस्य एकदेशे T·C· टिट्टिभयोः दम्पती T·C· आसन्नः प्रसवः यस्याः सा B·C· मत्ताश्चते गजेन्द्राश्च तेषाम् D·C· यमस्य सदनम् T·C· गुणदोषयोः ज्ञः गुणदोषज्ञः T·C· पराभवात् सन्त्रस्तः T·C·

Parsing

अब्रवीत् Imperfect· III S· प्रतिवसतः Pre. III D वस् with प्रति विचिन्त्यताम् Imperative· III S· चिन्त् with वि प्राह present· III S· ब्रू with प्र समाकर्षति present. III S· कर्षु with सम्+आ दूषयिष्यति Dino· दूष् बोधयति present· III S. बोध् अपहर Imperative· IInd· S· हृ with अप वाति present. III S· वा मुञ्च Imperative IInd. S. मुञ्चू सन्त्यजेत् Pot. III S. त्यज् with सम् कथ्यते passive· III S· चिन्तयामास Per· perfect III S. चिन्त् उच्यते passive· III S· वच्

Meaning

प्रसूतिम् = சந்ததியை यमसदनम् = யமனுடைய வீடு प्रालेयलेश = பனித்துளி प्राप्तातिके = காலேற்றத்திலுண்டான पक्षिकीटक = அற்பப்பறவை

उत्क्षिप्य टिट्टिभः पादावास्ते भगभयाद्दिवः ।
स्वचित्तकल्पितो गर्वः कस्य नात्रापि विद्यते ॥ 343

तन्मया अस्य प्रमाणं कुतूहलादपि द्रष्टव्यम् । किं मम एषोऽण्डापहारे कृते करिष्यति" इति चिन्तयित्वा स्थितः । अथ प्रसवानन्तरं प्राणयात्रार्थं गतायाः टिट्टिभ्याः समुद्रो वेलाव्याजेन अण्डानि अपजहार । अथ आयाता सा टिट्टिभमूचे-- "भो मूर्ख ! कथितमासीत् मया ते यत् समुद्रवेलया अण्डानां विनाशो भविष्यति, तद्दूरतरं व्रजावः । परं मूढतया अहंकारमाश्रित्य मम वचनं न करोषि । अथवा साधु चेदमुच्यते—

सुहृदां हितकामानां न करोतीह यो वचः ।
स कूर्म इव दुर्बुद्धिः काष्ठाद्भ्रष्टो विनश्यति ॥

टिट्टिभ आह— "कथमेतत्" सा अब्रवीत्—

Splitting of Sandhis

पादौ+आस्ते भगभयात्+दिवः कल्पितः+गर्वः न+अत्र+अपि तत्+मया कुतूहलात्+अपि एषः+अण्डापहारे समुद्रः+वेला शून्यम्+अवलोक्य टिट्टिभम्+ऊचे अथितम्+आसीत् अहंकारम्+आश्रित्य च+इदम्+उच्यते करोति+इह कथम्+एतत्


Splitting of Compounds

स्वचित्तेन कल्पितः T.C. अण्डानाम् अपहारः तस्मिन् T.C. प्रसवस्य स्थानम् T.C. समुद्रस्य वेला तया T.C.

आस्ते pre III S. अस् उत्क्षिप्य I.P.P. क्षिप् with उद् द्रष्टव्यम् pot P. दृश् to see करिष्यति II nd future III S कृ उपजहार R perfect हृ with उप प्रलपन्ती pre P. लप् with प्र भविष्यति II nd. future III S. भू व्रजामः pre. I S. व्रज् उच्यते passive III S. वच् to speak

Meaning

वेला = கடல்



RTUSAMHARA

&

VALMIKI RAMAYANA

श्रीः

ऋतुसंहारः

प्रथमः सर्गः

ग्रीष्मवर्णनम् प्रथमः सर्ग

प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः
सदावगाह क्षतवारिसञ्चयः !
दिनान्तरम्यो भ्युपशान्तमन्मथः
निदाघकालोयमुपागतः प्रिये !! 1

Splitting of Sandhis

दिनान्तरम्यः+अभ्युपशान्तमन्मथः निदाघकालः+अयम्+उपागतः ।

Meaning

प्रिये	=	ஓ காதலீ!
प्रचण्डसूर्यः	=	பொறுக்கமுடியாத சூரியவெப்பத்தை உடையதும்
स्पृहणीयचन्द्रमाः	=	விரும்பத்தக்க சந்திரனை உடையதும்
सदावगाहक्षत-	=	எப்பொழுதும் ஸ்நானம்செய்வதால் குறைந்த
वारिसञ्चयः	=	நீர்ப்பெருக்கை உடையதும்
दिनान्तरम्यः	=	சாயங்காலத்தில் அழகு பொருந்தியதும்
अभ्युपशान्तन्मथः	=	காமத்தைக்குறைக்கின்றதுமான
अयंनिदाघः	=	இந்தக் கோடைக்காலம்
अपागतः	=	வந்துவிட்டது (பார்)

Splitting of Compounds

प्रचण्डः सूर्यः सस्मिन् B.C. सदावगाहक्षताः वारिसञ्चयाः यस्मिन् B.C
स्पृहणीयः चन्दमाः यस्मिन् B.C. अभ्युपशान्तः मन्मथः यस्मिन् B.C,
उपागतः Past passive participle गम् with उप, आ.

निशाः शशाङ्कक्षतनील राजयः
क्वचिद्विचित्रं जलयन्त्रमन्दिरम् ।
मणिप्रकाराः सरसं च चन्दनं
शुचौ प्रिये यान्ति जनस्य सेव्यताम् ॥ 2

Splitting of Sandhis

क्वचित्+विचित्रम्

Meaning

प्रिये	=	ஓ காதலீ!
शशाङ्कक्षतनीलराजयः–	=	சந்திரனால் அழிக்கப்பட்டகார்– இருளை உடைய
निशाः	=	இரவுகளும்
क्वचित्	=	சில இடங்களில்
विचित्रम्	=	அழகான
जलयन्त्रमन्दिरम्	=	நீர்யந்திரங்களுடன்கூடிய வீடுகளும்
मणिप्रकाराः	=	நவரத்தினக்கற்கள் பொறிக்கப்பட்ட சுவர்களும்
सरसं चन्दनञ्च	=	ஈரமுள்ள சந்தனமும்
शुचौ	=	(இக்)கோடையில்
जनस्य	=	ஜனங்களுக்கு
सेव्यताम् यान्ति	=	சேவிக்கத்தக்க நிலையைப் பெறுகின்றன (அனுபவிக்கத்தக்க)

Splitting of Compounds

शशाङ्कक्षताः नीलराजयः यासु ताः = शशाङ्कक्षतनीलराजयः B. C.
जलयन्त्रैः उपेतम् मन्दिरम् = जलयन्त्रमन्दिरम् T.C. मणीनाम् प्रकाराः = मणिप्रकाराः

यान्ति Present III P. या to go.

सुवासितं हर्म्यतलं मनोहरं
प्रियामुखोच्छ्वासविकम्पितं मधु ।
सुतन्त्रिगीतं मदनस्य दीपनम्
शुचौ निशीथेऽनुभवन्ति कामिनः ॥ 3

Splitting of Sandhis

निशीथे+अनुभवन्ति=निशीथेनुभनन्ति

Meaning

शुचौ	= இக்கோடையில்
निशीथे	= இரவில்
कामिनः	= காதலர்கள்
सुवासितं मनोहरम्	= வாசனையுள்ள அழகிய
हर्म्यतलम्	= மாடிவீடுகளையும்
मदनस्य दीपनम्	= காமத்தை உண்டுபண்ணக்கூடி யதும்
प्रियामुखोच्छावस	= நாயகியின் மூச்சுக்காற்றினால்
विकम्पितम्	= அசைகின்றதுமான
मधु	= பழரசத்தையும் அல்லது கள்ளையும்
सुतन्त्रिगीतम्	= வீணையின் நாதத்தையும்
अनुभवन्ति	= ரசிக்கின்றனர் (பார்)

Splitting of Compounds

प्रियामुखोच्छ्वासितैः विकम्पितम् = प्रिया कम्पितम् T.C.

अनु भवन्ति Present III P. भव् with अनु विकम्पितम् past passive pasticipl कम्प् with वि ।

नितम्बबिम्बैः सदुकूलमेखलैः
स्तनैः सहाराभरणैः सचन्दनैः !
शिरोरुहैः स्नानकषायवासितैः
स्त्रियोनिदाघं शमयन्ति कामिनाम् !! 4

Spitting of Sandhis

स्त्रियः+निदाघम्=स्त्रियो निदाघम्

Meaning.

सदुकूलमेखलैः	= பட்டு, ஒட்டியாணம் இவைகளுடன் கூடிய
नितम्बबिम्बैः	= இடைகளாலும்
सचन्दनैः	= சந்தனத்தோடுகூடியதும்
सहाभरणैः	= முத்துமாலை ஆபரணங்கள் இவைகளுடன் கூடியதுமான
स्तनैः	= கொங்கைகளாலும்
स्नानकषायवासितैः	= ஸ்நானத்தில் சுகந்தப் பொருட்கள் உபயோகித்ததனல் வாசனையுள்ள
शिरोरुहैः	= கூந்தல்களாலும்
स्त्रियः	= பெண்கள்
कामिनाम्	= காமதாகமுள்ளவர்களின்
निदाघम्	= தாபத்தை
शमयन्ति	= தணிக்கின்றனர்.

Splitting of Compounds

दुकूलमेखलाभिः सहिताति सदुकूलमेखलानि तैः B·C· चन्दनेन सह वर्तन्ते इति सचन्दनानि तैः B·C· आभरणैः सह वर्तन्ते इति सहाभरणानि तैः B·C· स्नानकषायेन वासितानि तैः स्नान वासितैः T·C· शिरसि रुहाणि तैः शिरोरुहैः T·C·

शमयन्ति preset III D· P· शम् to cecome calm.

नितान्त लाक्षारस रागलोहितै
र्नितम्बिनीना ञ्चरणैः सनूपुरैः।
पदे पदे हंसरुतानुकारिभि
र्जनस्य चित्तं क्रियते समन्मथम् ॥ 5

Splitting of Sandhis

लोहितैः+नितम्बिनीनाम्+चरणैः रुतानुकारिभिः+जनस्य।

Meaning

नितान्तलाक्षारस-	= கெட்டியான சம்பங்கிக்குழம் பின்-
रागलोहितैः	= பூச்சினுல் சிவந்தவைகளும்
सनूपुरैः	= தண்டைகளுடன்கூடியதுகளும்
पदे पदे	= அடிக்கடி
हंसरुतानुकारिभिः	= அன்னத்தின் சப்தத்தைப் பின் பற்றுகின்றதுமான (அன்னம் போல் சப்தமிடுகின்ற)
नितम्बिनीनाम्	= பெண்களின்
चरणैः	= கால்களால்
जनस्य	= ஜனங்களின்
चित्तम्	= உள்ளம்
समन्मथम् क्रियते	= மன்மத தாபத்தோடு கூடியதாக ச்செய்யப்படுகின்றது.

Splitting of Compounds

नितान्तलाक्षारसस्य रागाः तेन लोहितानि तै T·C· नूपुरैः सह वर्तन्ते इति सनूपुराणि-तैः B·C हंसरुतस्य अनुकारीणि हंसरुतानुकारीणि तै T· C· मन्मथेन सह वर्तते इति समन्मथम् B·C.

क्रि ते Passive present III d· S· कृ to do·

पयोधरा श्चन्दन पङ्कशीतला
स्तुषार गौरार्पित हारशेखराः !
नितम्बदेशाश्च सहेम मेखलाः
प्रकुर्वते कस्य मनो न सोत्सुकम् !! 6

Splitting of Sandhis

पयोधराः + चन्दनपङ्कशीतलाः + तुषार नितम्बदेशाः + च, मनः+न=मनो न ।

Meaning

चन्दनपङ्कशीतलाः	=	சந்தனக்குழம்பினுல் குளிர்ச்சி யான வைகளும்
तुषारगौर-	=	பனிபோல் வெண்மையான
अर्पितहारशेखराः	=	முத்துமாலைகளே மேலேமேலே கொண்டவைகளுமான
पयोधराः	=	கொங்கைகளும்
सहेम मेखलाः	=	தங்க ஒட்டியாணங்களுடன் கூடிய
नितम्बदेशाश्च	=	இடுப்புப்பகுதிகளும்
कस्य मनः	=	யாருடைய உள்ளத்தைத்தான்
सोत्सुकम्	=	கலங்கக்கூடியதாக
न प्रकुर्वते	=	செய்கின்றதுகளில்லை.

Splitting of Compounds

चन्दनपङ्केन शीतलाः=चन्दनपङ्कशीतलाः T.C. तुषारगौरार्पिताः हाराः शेखरे येषाम् ते B.C. हेममेखलाभिः सहवर्तन्ते इति सहेममेखलाः B.C. उत्सुकेन सह वर्तते इति सोत्सुकम् B.C.

प्रकुर्वते Present III d. P. from कृ to do with प्र.

समुद्गतस्वेदचिदाङ्गसन्धयो
विमुच्य वासांसि गुरूणि सांप्रतम् ।
स्तनेषु तन्वंशुकमुन्नतस्तना
निवेशयान्ति प्रमदाः सयौवनाः ॥ 7

Splitting of Sandhis

सन्धयः+विमुच्य, तनु+अंशुकम्+उन्नतस्तनाः

Meaning

सयौवनाः	= யௌவனப் பருவமுள்ளவர்களும்
(अत एव)	= ஆகையினாலேயே
उन्नतस्तनाः	= நிமிர்ந்த கொங்கைகளையுடைய வர்களுமான
प्रमदाः	= பெண்கள்
समुद्गतस्वेद-	= வேர்வையினால்
चिताङ्गसन्धयः सत्यः	= நனைந்த அங்கங்களின் பகுதிகளை உடையவர்களாய்
गुरूणि वासांसि	= தடிப்புள்ள சேலைகளை
विमुच्य	= விட்டுவிட்டு
सांप्रतम्	= இப்பொழுது (இக்கோடையில்)
तनु अंशुकम्	= மெல்லியசேலைகளை
स्तनेषु	= மார்பின்மேல்
निवेशयन्ति	= அணிந்துகொள்கின்றனர்.

Splitting of Compounds

समुद्गतस्वेदचिताः अङ्गसन्धयः यासां ताः स-न्धयः B. C. उन्नतौ स्तनौ यासां ताः उन्नतस्तनाः B. C. यौवनेन सह वर्तन्ते इति सयौवनाः B.C.

निवेशयन्ति Present III P. विश् with नि विमुच्य Ind past मुच्चू with वि ।

सचन्दनाम्बुव्यजनोद्भवानिलैः
सहारयष्टिस्तनमण्डलार्पणैः ।
सवल्लकीकाकलिगीतनिस्वनैः
प्रबुध्यते सुप्तइवाद्य मन्मथः ॥ 8

Splitting of Sandhis

सुप्तः+इव+अद्य=सुप्तइवाद्य ।

Meaning

अद्य	= இப்பொழுது (இக்கோடையில்)
सचन्दनाम्बुव्यजन-	= சந்தனத்தோடுகூடிய விசறியி னின்றும்
उद्भवानिलैः	= உண்டான காற்றினாலும்
सहारयष्टि-	= முத்துமாலைகளுடன் கூடிய
स्तनमण्डलार्पणैः	= கொங்கைகளை (நாயகியின் மார் பில்) வைப்பதனாலும் (அளிப்ப தனாலும்)
सवल्लकीकाकलिगीत-	= வீணையின் ஓசையுடன்கூடிய இ
निः स्वनैः	னியபாட்டின் ஒலியினாலும்
सुप्तः मन्मथः	= தூங்கிய மன்மதன்
प्रबुध्यते इव	= விழிப்பூட்டப்படுகின்றான் போலும்.

Splitting of Compounds

सचन्दनाम्बुव्यजनोद्भवाश्चते अनिलाश्च तैः K.C. सहारयष्टिस्तनम-ण्डलानाम् अर्पणाः तैः T.C. सवल्लकीकाकलिगीतस्य निस्वनाः तैः T.C

प्रबुध्यते Passive present III S. बुध् to 2now with प्र ।

सितेषु हर्म्येषु निशासु योषितां
सुखप्रसुप्तानि मुखानि चन्द्रमाः
विलोक्य नूनं भृशमुत्सुकश्चिरं
निशाक्षये याति ह्रियेव पाण्डुताम् !! 9

Splitting of Sandhis

भृशम्+उत्सुकः+चिरम्, ह्रिया+इव।

Meaning

चन्द्रमाः	= சந்திரன்
निशासु	= இரவுகளில் (கோடைக்கால இரா க்காலங்களில்)
सितेषु हर्म्येषु	= வெண்மையான மேல்மாடிகளில் (வெள்ளைப்பூச்சுகளில்)
सुखप्रसुप्तानि	= நன்கு தூங்குகின்ற (நித்திரை செய்கிற)
योषितां मुखानि	= பெண்களின் முகங்களை
विलोक्य	= பார்த்துவிட்டு
भृशं चिरम् उत्सुकः	= மிகவும் நெடும்காலம் மனம்வரு ந்தி நான் இவ்வளவு அழகுள்ள வனுக இல்லையே என்று எண்ணி வருந்தி
ह्रिया इव	= வெட்கத்தினால்போலும்
निशाक्षये	= விடியற்காலத்தில்
पाण्डुताम् याति	= வெளிறிப்போகின்றன்
नूनम्	= சந்தேகமில்லை (நிச்சயித்துக்கூறு கின்றேன்).

Splitting of Compounds

सुखं प्रसुप्तानि सुखप्रसुप्तानि T·C निशायाः क्षयः तस्मिन् निशाक्षये T·C

विलोक्य I·P·P. लोक् with वि to see· याति Present III S. या to go·

असह्यवातोद्धतरेणुमण्डला
प्रचण्डसूर्यातपतापिता मही !
न शक्यते द्रष्टुमपि प्रवासिभिः
प्रियावियोगानलदग्धमानसैः !! 10

Splitting of Sandhis

द्रष्टुम्+अपि द्रष्टुमपि ।

Meaning

असह्य, वातोद्धत-	= பொறுக்கமுடியாததும், காற்றி னல் கிளப்பப்பட்டதுமான
रेणुमण्डला	= புழுதிக்கூட்டத்தையுடையதும்
प्रचण्डसूर्यातपतापिता-	= கடும்சூரியவெப்பத்தினல் சூடா க்கப்பட்டதுமான
मही	= பூமியானது
प्रियावियोगानलन-	= நாயகியின் பிரிவாகிய நெருப்பி னல்
दग्धमानसैः	= பொசுக்கப்பட்டமனதைஉடைய
प्रवासिभिः	= மனைவியை விட்டுப் பிரிந்திருப்ப வர்களால்
द्रष्टुमपि	= பார்ப்பதற்கும்
न शक्यते	= முடியாததாக உளது.

Splitting of Compounds

असह्यवातोद्धतम् रेणुमण्डलम् यस्याः सा B. C. प्रचण्डसूर्यातपेन तापिता T. C. प्रियावियोगानलेन दग्धं मानसं योषां ते तैः B. C.

शक्यते Passive present IIIS. शक् to be able. द्रष्टुम् Infinit दृश् to see.

मृगाः प्रचण्डातप तापिता भृशम्
तृषा महत्या परिशुष्कतालवः ।
वनान्तरे तोयमिति प्रधाविता
निरीक्ष्य भिन्नाञ्जनसन्निभन्नभः ॥ 11

Splitting of Sandhis

तापिताः+भृशम्, तोयम्+इति+प्रधाविताः भिन्नाञ्जनसन्निभम्+नभः

Meaning

भृशम् = மிகவும்
प्रचण्डातपतापिताः = கடும் வெப்பத்தினல் தாக்குண்டவைகளும்
(अत एव = ஆகையினலேயே)
महत्या तृषा = அதிக தாகத்தினல்
परिशुष्कतालवः = உலர்ந்த உதடுகளே உடையது மான
मृगाः = மான்கள்
भिन्नाञ्जनसंनिभम् = (புதிதாக) சேர்க்கப்பட்டமைக்கு ஒப்பான
नभः निरीक्ष्य = ஆகாயத்தைக் கண்டு (கானல்-நீரைக் கண்டு)
वनान्तरे = காடுகளில்
तोयम् इति प्रधाविताः = நீர் என்று ஓடித் திரிகின்றன.
(மா இடவெளிகளில் காணப்படும் வானம் நீர்போல் இருக்கும்)

Splitting of Compounds

प्रचण्डश्चासौ आतपश्च प्रचण्डातपः तेन तापिताः T.C. परिशुष्का तालवः येषां ते परिशुष्कतालवः B. C. भिन्नाञ्जनेव सन्निभम् भिन्नाञ्जनसन्निभम् T.C.

प्रधाविताः P.P.P. धातू with प्र to run निरीक्ष्य I.P.P. ईक्ष् with नि to see

सविभ्रमैः सस्मितजिह्मवीक्षितै
र्विलासवत्योमनसि प्रवासिनाम् ।
अनङ्गसन्दीपनमाशुकुर्वते
यथा प्रदोषाः शशिचारु भूषणाः ॥ 12

Splitting of Sandhis

वीक्षितैः+विलासवत्यः+मनसि अनङ्गसन्दीपनम्+आशु+कुर्वते

Meaning

शशिचारुभूषणाः	= சந்திரனால் அழகுபொருந்திய
प्रदोषा यथा	= இரவுகள்போல்
विलासवत्यः	= விலைமாதர்கள்
सविभ्रमैः	= குறும்புத்தனத்துடன் கூடிய
सस्मितजिह्मवीक्षितैः	= புன்சிரிப்புடன்கூடியகடைக்கண் பார்வைகளால்
प्रवासिनाम्	= மனைவியை விட்டுப்பிரிந்திருப்பவர்களின்
मनसि	= மனதில்
अनङ्गसन्दीपनम्	= காமஉணர்ச்சியை
आशु कुर्वते	= விரைவில் உண்டுபண்ணுகின்றனர்.

Splitting of Compounds

विभ्रमैः सह वर्तन्ते इति सविभ्रमाणि तैः B. C. सस्मितजिह्मानि च तानि वीक्षितानि च तैः K.C. अनङ्गस्य सन्दीपनम् अनङ्गसन्दीपनम् T.C. शशिचारुणा भूषणाः = शशिचारुभूषणाः T.C

कुर्वते Present III P. कृ to do

रवेर्मयूखैरभितापितो भृशं
विदह्यमानः पथि तप्तपांसुभिः ।
अवाङ्मुखो जिह्मगतिः श्वसन्मुहुः
फणी मयूरस्य तलेनिषीदति ॥ 13

Splitting of Sandhis

रवेः+मयूखैः+अभितापितः अवाङ्मुखः+जिह्मगतिः+श्वसन्+मुहुः

Meaning

रवेः मयूखैः = சூரியனது கிரணங்களால்
मृशम् अभितापितः = மிகவும் வாட்டப்பட்டதும்
पथि = வழியில்
तप्तपांसुभिः = சுடுகின்ற புழுதிகளால் (மண்களால்)
विदह्यानः = பொசுக்கப்படுகின்றதுமான
फणी = சர்ப்பம் (நல்லபாம்பு)
अवाङ्मुखः = படத்தை தொங்கவிட்டுக்கொண்டும்
जिह्मगतिः = வளைந்து ஊர்ந்து செல்கின்றதாயும்
मुहुः श्वसन् = அடிக்கடி பெருமூச்சு விட்டுக் (சீறிக்கொண்டு) கொண்டும்
मूयूरस्य = மயிலினது
तले = அடியில் (மயிலின் கீழே)
निषीदति = (களையாறிக்கொண்டு) படுத்திருக்கின்றது.

(இக்கோடையில் பாம்பும் மயிலும் இயற்கை விரோதத்தை விட்டு வசித்தன என்பது கருத்து)

Splitting of Compounds

तप्ताश्च ते पांसवश्च तप्तपांसवः तै तप्तपांसुभिः K·C. अवाक् मुखम् यस्य सः अवाङ्मुखः B·C. जिह्मा गतिः यस्य सः जिह्मगतिः B·C.

श्वसन् Present part श्वस् to Breathe. निषीदति present III D·S. सीद् with नि।

तृषामहत्या हतविक्रमोद्यमः
श्वसन्मुहुर्दूरविदारिताननः ।
न हन्त्यदूरेऽपिगजान्मृगेश्वरो
विलोलजिह्वश्चलिताग्रकेसरः ॥ 14

Splitting of Sandhis

श्वसन्+मुहुः+दूरविदारिताननः हन्ति+अदूरे+अपि+गजान्+मृगेश्वरः विलोलजिह्वः+चलिताग्रकेसरः ।

Meaning

मृगेन्द्रः	= சிங்கம்
महत्या तृषा	= அதிக தாகத்தினால்
हतविक्रमोद्यमः	= வீரம் குன்றியதாயும்
मुहुः श्वसन्	= அடிக்கடி பெருமூச்சு விடுகின்ற தாயும்
दूरविदारिताननः	= அதிகம் வாயைப் பிளந்துகொண்டதாயும்
विलोलजिह्वः	= நாக்கை அசைத்துக்கொண்டும் (நாக்கைத் தொங்கவிட்டுக் கொண்டும்)
चलिताग्रकेसरः	= துடிக்கும் பிடரி மயிருடையதாயும் (இருந்துகொண்டு)
अदूरेऽपि	= கிட்டடியிலும் (உள்ள)
गजान्	= யானைகளை
न हन्ति	= கொல்லவில்லை.

Splitting of Compounds

हतः विक्रमोद्यमः यस्य सः हतविक्रमोद्यमः B. C. दूरविदारितम् आननम् यस्य सः दूरविदारिताननः B. C. विलोला जिह्वा यस्य सः विलोलजिह्वः B. C. चलितानि अग्रकेसराणि यस्य सः चलिताग्रकेसरः B. C.

श्वसन् Pre P. श्वस् to Breathe हन्ति Present III S. हन् to kill.

विशुङ्ककण्ठाहृत शीकराम्भसो
गभस्तिभिर्भानुमतोभितापिताः ।
प्रवृद्धतृष्णो पहता जलार्थिनो
न दन्तिनः केसरिणोऽपि बिभ्यति ॥ 15

Splitting of Sandhis

गभस्तिभिः+भानुमतः+अभितापिताः, प्रवृद्धतृष्णोपहताः+जलार्थिनः केसरिणः+अपि ।

Meaning

भानुमतः गभस्तिभिः = சூரியகிரணங்களால் ,
अभितातिताः = வாடும்படி செய்யப்பட்டவை களும்
विशुङ्ककण्ठ- = (ஆகையினாலேயே) உலர்ந்த தொண்டையில்
अहृतशीकराम्भसः = ஓர் துளி உமிழ்நீரும் கிடைக்கா தவைகளும்
प्रवृद्धतृष्णोपहताः = அதிக தாகமுற்றவைகளும்
जलार्थिनः = தண்ணீரைத் தேடி அலைகின்ற வைகளுமான
दन्तिनः = யானைகள்
केसरिणोऽपि = சிங்கங்களுக்கும்
न बिभ्यति = பயப்படுகின்றன இல்லை.

Splitting of Compounds

विशुः ककण्ठाहृतं शीकरांभः येषां ते B·C· प्रवृद्धतृष्णया उपहताः प्रवृद्धतृष्णोपहताः T·C· जलस्य अर्थिनः जलार्थिनः T·C·

बिभ्यति Present III P· भी अभितापिताः P· P· P· तप् with अभि to ce hot.

हुताग्निकल्पैः सवितुर्गभस्तिभिः
कलापिनः क्लान्तशरीरचेतसः ।
न भोगिनं घ्नन्ति समीपवर्तिनम्
कलापचक्रेषु निवेशिताननम् ॥ 16

Splitting of Sandhis

सवितुः+गभस्तिभिः ।

Meaning

हुताग्निकल्पैः	=	ஹோமகுண்ட நெருப்புப் போன்ற
सवितुः गभस्तिभिः	=	சூரியனது கிரணங்களால்
क्लान्तशारीरचेतसः	=	வாடிய உடல், மனம் இவைகளை உடைய
कलापिनः	=	மயில்கள்
समीपवर्तिनम्	=	கிட்டடியில் உள்ளதும்
कलापचक्रेषु	=	தோகைகளுள்
निवेशिताननम्	=	முகத்தை புகுத்துக்கொண்டிருக்கின்றதுமான
भोगिनम्	=	பாம்பை
न घ्नन्ति	=	கொல்லுகின்றதுகளில்லை.

Splitting of Compounds

हुताग्निना सदृशाः ताग्निकल्पाः ।
क्लान्यानि शरीराणि चेतांसि येषां ते क्लान्तशरीरचेतसः B.C. समीपे वर्तिनम् समीपवर्तनम् T.C. कलापानाम् चक्रम् कलापचक्रम् तेषुकलापचक्रेषु T.C. निवेशितम् आननम् येन सः तम् B.C.

घ्नन्ति Preset III P. हन् to kill.

सभद्रमुस्तं परिशुष्क कर्दमम्
सरः खनन्नायतपोतृमण्डलैः।
रवेर्मयूखैरभितापितो भृशम्
वराहयूथो विशतीव भूतलम् ॥ 17

Splitting of Sandhis

खनन्+आयतपोतृमण्डलैः रवेः+मयूखैः+अभितापितः+भृशम् विशति+इव।

Meaning

खेः मयूखैः	=	சூரியனது கிரணங்களால்
भृशम् अभितापितः	=	மிகவும் வாட்டப்பட்ட
वराहयूथः	=	பன்றியின் கூட்டம்
आयत पोतृ मण्डलैः	=	நீண்ட முகங்களின் நுனிகளால்
सभद्रमुस्तम्	=	கோரைக்கிழங்குகளுடன் கூடியதும்
परिशुष्ककर्दमम्	=	உலர்ந்த களிமண்ணை உடையதுமான
सरः खनन्	=	குளத்தை கிண்டுகின்றதாய்
भूतलम् विशति इव	=	பூமியினுள் புகுகின்றதுபோல் (காணப்படுகின்றது).

Splitting of Compounds.

भद्रमुस्तैः सह वर्तते इति सभद्रमुस्तम् B·C· परिशुष्काणि कर्दमानि यस्य तत् परिशुष्ककर्दमम् B·C· वराहाणाम् यूथः वराहयूथः T·C·

खनन् Present P· खन् to dig· विशति Pre III d· S· विश् to enter अभितापितः P·P·P· तप् with अभि to be hot

वितस्वता तीव्रतरांशुमालिना
सपङ्कतोयात् सरसोभितापितः ।
उत्प्लुत्य भेकस्तृषितस्य भोगिनः
फणातपत्रस्य तले निषीदति ।! 18

Splitting of Sandhis

सरसः + अभितापितः, भेकः + तृषितस्य ।

Meaning

तीव्रतरांशुमालिना	=	மிகக்கடுமான கிரணங்கள் பொருந்திய
वितस्वता	=	சூரியனால்
अभितापितः	=	வாட்டப்பட்ட
भेकः	=	தவளை
सपङ्कतोयात्	=	கலக்கமுள்ள தண்ணீர் உள்ள
सरसः	=	குளத்திலிருந்து
उत्प्लुत्य	=	பாய்ந்துசென்று
भोगिनः	=	பாம்பினது
फणातपत्रस्य	=	படமாகிய குடையின்
तले निषीदति	=	அடியில் தூங்குகின்றது.

Splitting of Compounds.

तीव्रतराः अंशुमालाः यस्य सः तेन B.C. सपङ्कम् तोयम् यस्य तत् तस्मात् B.C. फणमेव आतपत्रम् तस्य फणातपत्रस्य T.C.

उत्प्लुत्य I.P.P. प्लु with उत् to Jump up. निषीदति Pre III S. सद् with नि to sit.

समुद्धृताशेषमृणालजालकम्
विपन्नमीनं द्रुतभीतसारसम्।
परस्परोत्पीडन संहतैर्गजैः
कृतं सरः सान्द्रविमर्दकर्दमम्॥ 19

Splitting of Sandhis

परस्परोत्पीडनसंहतैः+गजैः।

Meaning

परस्परोत्पीडनसंहतैः	=	ஒன்றுக்கொன்று சண்டையிடக் கூடியவைகளான
गजैः सरः	=	யானைகளால் (குலமானது)
समुद्धृत-	=	பிடுங்கப்பட்ட
अशेषमृणालजालकम्	=	எல்லாத்தாமரைகளின் கூட்டத்தை உடையதாகவும்
विपन्नमीनम्	=	அழிந்தமீன்களை உடையதாகவும்
द्रुतभीतसारसम्	=	பயந்து ஓடிய சாரசப்பறவைகளை உடையதாகவும்
सान्द्र-	=	கெட்டியான (நல்ல)
विमर्दकर्दमम्	=	சேறுகவும்
कृतम्	=	ஆக்கப்பட்டது.

Splitting of Compounds

समुद्धृतानि अशेषमृणालजालकानि यस्मात् तत् B. C. विपन्नाः मीनाः यस्मिन् तत् विपन्नमीनम् B.C. द्रुताः भीताः सारसाः यस्मात् तत् B.C. परस्परोत्पीडनाय संहताः तैः परस्परोत्पीडनसंहतैः B.C

सान्द्रविमर्देन कर्दमः यस्मिन् तत् सान्द्रविमर्दकर्दमम् B.C.
कृतम् P.P.P. कृ to do.

रविप्रभोद्भिन्न शिरोमणिप्रभो
विलोलजिह्वाद्वयलोढमारुतः ।
विषाग्निसूर्यातपतापितः फणी
न हन्ति मण्डूककुलं तृषाकुलः ॥ 20

Splitting of Sandhis

रविप्रभोद्भिन्नशिरोमणिप्रभः + विलोल ।

Meaning

रविप्रभोद्भिन्न-	=	சூரியகிரணங்களால் பிரகாசப்படுத்தப்பட்ட
शिरोमणिप्रभः	=	தலையிலுள்ள இரத்தின ஒளியை உடையதும்
विलोलजिह्वाद्वय-	=	அசைகின்ற இருநாக்குகளால்
लीढमारुतः	=	காற்றை நக்கிச்சாப்பிடுகின்றதும்
विषाग्निसूर्यातपतापितः	=	நெருப்புப் போன்றவிடத்தினாலும் சூரியவெப்பத்தினாலும் வாட்டப்பட்டதுமான
फणी	=	பாம்பு
तृषाकुलः	=	தாகமுற்றதாய்
मण्डूककुलम्	=	தவளையின் கூட்டத்தை
न हन्ति	=	கொல்லவில்லை.

Splitting of Compounds

रवि प्रभोद्भिन्न शिरोमणिप्रभा यस्य सः B. C. विलोलाजिह्वाद्वयेन लीढः मारुतः यस्य सः B.C. विषाग्निसूर्यातपाभ्याम् तापितः T.C मण्डूकानाम् कुलम् मण्डूककुलम् T. C.

हन्ति Present III S. हन् to kill

सफेनलोलायत वक्त्रसम्पुटं
विनिः सृतालोहितजिह्वमुन्मुखम् ।
तृषाकुलं निः सृतमद्रिगह्वरात्
गवेषमाणं महिषीकुलं जलम् ॥ 21

Splitting of Sandhis

विनिः सृतालोहितजिह्वम्+उन्मुखम् निः सृतम्+अद्रिगह्वरम् ।

Meaning

सफेनलोलायत-	=	நுரையுடன்கூடியதும் அசைகின்றதும் நீண்டதுமான
वक्त्रसम्पुटम्	=	வாளிபோல் நீண்ட முகத்தை உடையதும்
विनिः सृतालोहित-	=	வெளியில் தூங்குகின்ற கொஞ்சம் சிவந்த
जिह्वम्	=	நாக்கை உடையதும்
उन्मुखम्	=	நீண்ட முகத்தை உடையதும்
तृषाकुलम्	=	தாகமுற்றதும்
जलं गवेषमाणम्	=	தண்ணீரைத் தேடித் திரிகின்றதுமான
महिषीकुलम्	=	எருமைக்கூட்டம்
अद्रिग ह्वरात्	=	மலையின் குகையிலிருந்து
विनिः सृतम्	=	வெளியில் கிளம்புகின்றது.

Splitting of Compounds

सफेनलोलायितम् वक्त्रसम्पुटम् यस्य तत् B.C. विनिः सृतालोहिता जिह्वा यस्य तत् B. C. उद्गतम् मुखम् यस्य तत् उन्मुखम् B. C. तृषया आकुलम् तृषाकुलम् T. C. अद्रीणाम् गह्वरम् तस्मात् अद्रिगह्वरात् T. C. महिषीणाम् कुलम् महिषीकुलम् T.C.

विनिः सृतम् Past passive participle of with वि+निः

पटुतर दवदाहोच्छ्रिंक शष्पप्ररोहाः
परुषपवन वेगोत्क्षिप्त संशुष्कपर्णाः
दिनकर परितापक्षीणतोयाः समन्तात्
विदधति भयमुच्चै र्वीक्ष्यमाणा वनान्ताः ॥ 22

Splitting of Sandhis

भयम्+उच्चैः+वीक्ष्यमाणाः+वनान्ताः

Meaning.

पटुतरदवदाह-	=	அதிக காட்டுதீயினால் தீய்க்கப்பட்ட இளம் புற்களை உடையவை
उच्छ्रिंकशष्पप्ररोहाः		களும்
परुषपवनवेग-	=	பெரும் காற்றின் வேகத்தினால்
उत्क्षिप्तसंशुष्कपर्णाः	=	மேலே கிளப்பப்பட்ட காய்ந்த இலைகளை உடையதுகளும்
दिनकरपरिताप-	=	சூரியவெப்பத்தினால்
क्षीणतोयाः	=	ஜலமற்றுப்போனவைகளுமான
वनान्ताः	=	காட்டுப்பிரதேசங்கள்
समन्तात् वीक्ष्यमाणाः	=	நாற்புறமும் பார்க்கப்படுகின்ற தாய்
उच्चैः भयम्	=	(பார்ப்போருக்கு) அதிகபயத்தை
विदधति	=	உண்டுபண்ணுகின்றன.

Splitting of Compounds

पटुतरदवदाहेन उच्छ्रिंकाः शष्पप्ररोहाः येषुते B·C परुषपवनवेगोत्क्षिप्तानि संशुष्कपर्णानि येषु ते B·C· दिनकरपरितापेन क्षीणानि तोयानि येषु ते B·C.

विक्ष्यमाणाः Passive present partiaple ईक्ष् with वि to see
विदधति Present III d·P· धा with वि

श्वसिति विहगवर्गः शीर्णपर्णद्रुमस्थः
कपिकुलमुपयाति क्लान्तमद्रेर्निकुञ्जम् ।
भ्रमति गवययूथः सर्वतस्तोयमिच्छन्
शरभकुलमजिह्मं प्रोद्धरत्यम्बुकूपात् ॥ 27

Splitting of Sandhis

कपिकुलम्+उपयाति, क्लान्तम्+अद्रेः+निकुञ्जम् सर्वतः+तोयम्+इच्छन्, शरभकुलम्+अजिह्मम् प्रोद्धरति+अम्बुकूपात् ।

Meaning

शीर्णपर्णद्रुमस्थः — உலர்ந்த இலைகளுடைய மரத்திலுள்ள
विहगवर्गः — பறவைக்கூட்டம்
श्वसिति — பெருமூச்சுவிடுகின்றது.
क्लान्तं कपिकुलम् — வாடிய குரங்குக் கூட்டம்
अद्रेः निकुञ्जम् — மலையின் புதர்களுக்கு
उपयाति — செல்கின்றது (வெப்பம் தாங்க முடியாமல்)
गवययूथः — கவயமிருகங்களின் கூட்டம் (பசுவை ஒத்த ஓர்வித மிருகங்கள்)
तोयम् इच्छन् — தண்ணீரைக்கருதி
सर्वतः भ्रमति — எங்கும் சுற்றுகின்றது.
शरभकुलम् — சரபமிருகங்களின் கூட்டம் (8 கால்கள் உள்ள ஓர் பிராணி சரபம்)
अजिह्मम् — வரிசையாக இருந்து
कूपात् — வாவியிலிருந்து
अम्बु उद्धरति — தண்ணீரை எடுக்கின்றது.

Splitting of Compounds

विहगानाम् वर्गः T.C. कपीनाम् कुलम् T.C. शीर्णपर्णद्रमे स्थः T.C. शरभाणाम् कुलम् T.C.

श्वसिति Pres III S. श्वस् to breath. उपयाति Pres III S. या with उप to go near. इद्धरति prese III S. हृ to take with उद् ।

विकचनवकुसुम्भ स्वच्छसिन्दूर भासा
प्रबल पवन वेगोद्भूतवेगेन तूर्णम् ।
तरुविटपलताग्राऽऽलिङ्गन व्याकुलेन
दिशिदिशि परिदग्धा भूमयः पावकेन ॥ 24

Splitting of Sandhis

परिदग्धाः+भूमयः

Meaning

विकचनवकुसुम्भ = மலர்ந்த புதிய குசும்பபுஷ்பம் போல்

स्वच्छसिन्दूरभासा = தெளிவான (அழுக்கற்ற) சிந்தூரபுஷ்பம்போன்ற ஒளிபொருந்தியதும்

तूर्णम् = விரைவில்

प्रबलपवनवेग उद्भूतवेगेन = பெரும் காற்றின் வேகத்தினால் உண்டானவேகத்தினால்

तरुविटपिलताग्र-आलिङ्गनव्याकुलेन = மரக்கிளைகள் கொடிகளின் நுனிகள் (இவைகளில்) பற்றிப் பரவியதுமான

पावकेन = காட்டுத்தீயினால்

दिशि दिशि = எல்லாத்திக்குகளிலுமுள்ள

भूमयः = இடங்கள்

परिदग्धाः = பொசுக்கப்பட்டன.

Splitting of Compounds

विकचनवकुसुम्भस्वच्छसिन्दूरस्य भाः इव भाः यस्य सः B. C. प्रबलपवनवेगोद्भूतश्चासौ वेगश्च तेन T.C. तरुविटपलताग्रालिङ्गने व्याकुलः तेन T.C

परिदग्धाः Past passive participle दह् with परि.

ज्वलति पवनवृद्धः पर्वतानान्दरीषु
स्फुटति पटुनिनादैः शुष्कवंशस्थलीषु !
प्रसरति तृणमध्ये लब्धवृद्धिः क्षणेन
ग्लपयति मृगवर्गं प्रान्तलग्नो दवाग्निः ॥ 25

Splitting of Sandhis

पर्वतानाम्+दरीषु, प्रान्तलग्नः+दवाग्निः

Meaning

दवाग्निः = காட்டுத்தீயானது
पवनवृद्धः = காற்றினால் விருத்திசெய்யப்பட்டதாய்
पर्वतानाम् दरीषु = மலையின் குகைகளில்
ज्वलति = சுவாலித்துக்கொண்டிருக்கின்றது.
शुष्कवंशास्थलीषु = உலர்ந்த மூங்கில் நிரம்பிய இடங்களில்
पटुनिनादैः स्फूटति = பெரிய சத்தத்தோடு வெடித்துப்பிரகாசிக்கின்றது.
क्षणेन तृणमध्ये = மறுகணம் புற்களுக்கிடையில்
लब्धवृद्धिः प्रसरति = வளர்ந்ததாய் எங்கும் பரவுகின்றது.
प्रान्तलग्नः = (உடலின்) ஓரங்களில்ப் பற்றிக்கொண்டு
मृगवर्गम् = மிருகங்களின்கூட்டத்தை
ग्लपयति = வாட்டுகின்றது.

Splitting of Compounds

पवनेन वृद्धः पवनवृद्धः T. C. पटवश्चते निनादाश्च पटुनिनादाः तैः K.C. तृणानाम् मध्यम् तस्मिन् T.C प्रान्ते लग्नः प्रान्तलग्नः T.C

ग्लपयति Present III d S. ग्लप् to fade (Co) ज्वलति Present III d. S. ज्वल् to shine

बहुतर इव जातः शाल्मलीनां वनेषु
स्फुरति कनकगौरः कोटरेषु द्रुमाणाम् ।
परिणतदलशाखादुत्पतत्याशु वृक्षात्
भ्रमति पवनधूतः सर्वतोऽग्निर्वनान्ते ॥ 26

Splitting of Sandhis

परिणततरुशाखात्+उत्पतति+आशु सर्वतः+अग्निः+वनान्ते

Meaning

शाल्मलीनां वनेषु	= சால்மலிமரக்காடுகளில்
बहुतरः इव जातः	= அதிகமாக உண்டான
अग्निः	= காட்டுத்தீயானது
द्रुमाणाम् कोटरेषु	= டிரப்பொந்துகளில்
कनकगोरः	= தங்கம்போல் வெண்மையாக
स्फुरति	= பிரகாசிக்கின்றது.
परिणततरुशाखात्	= நன்குவளர்ந்த கிளைகளை உடைய
वृक्षात्	= மரத்திலிருந்து
आशु उत्पतति	= விரைவில் மேலே கிளம்புகின்றது
पवनधूतः	= காற்றினால் விருத்திசெய்யப்பட்டு
वनान्ते सर्वतः	= காட்டில் எங்கும்
भ्रमति	= பரவிக்கொண்டிருக்கின்றது.

Splitting of Compounds

कनकवत् गौरः कनकगौरः K·C. परिणतदलाः शाखाः यस्मिन् सः तस्मात् B·C. पवनेन धूतः पवनधूतः T·C.

स्फुरति Preset III S. स्फुर् to throb· भ्रमति Preset III S· भ्रम् to wander· उत्पतति Preset III S· पत् with उद् to rise up·

गजगवयमृगेन्द्रा वन्हिसन्तप्तदेहाः
सुहृदइव समन्ताद् द्वन्दभावं विहाय !
हुतवहपरिखेदादाशु निर्गत्य कक्षात्
विपुल पुलिनदेशान्निम्नगां संविशन्ति !! 27

Splitting of Sandhis

गजगवयमृगेन्द्रा+वन्हिः सुहृदः+इव, हुतवहपरिखेदाद्+आशु, विपलपुलिनदेशम्+निम्नगाम् ।

Meaning

गजगवयमृगेन्द्राः	= யானை கவயம் சிங்கம் முதலிய மிருகங்கள்
वन्हिसन्तप्तदेहाः	= நெருப்பினால் வாட்டப்பட்ட சரீரத்தை உடையவைகளாக
सुहृदः इव	= நண்பர்கள்போல்
समन्तात	= எங்கும்
द्वान्द्वभावम विहाय	= (இயற்கை) விரோதத்தை விட்டு விட்டு
हुतवहपरिखेदाद्	= தீப்பிடித்துக்கொண்ட
कक्षात्	= காட்டிலிருந்து
आशु निर्गत्य	= விரைவில் வெளியேறி
विपुलपुलिनदेशान्	= அதிகம் மணல்ப்பாங்கான
निम्नगाम्	= ஆறுகளில்
संविशान्ति	= இறங்குகின்றன.

Splitting of Compounds

गजाश्च गवयाश्च मृगेन्द्राश्च ग द्वः D.C. वन्हिसन्तप्ताः देहाः येषां ते वन्ह देहाः B. C. हुतवहेन परिखेदः तस्मात् हुतवहपरिखेदात T.C. विपुलपलिनः देशः यस्या सा ताम् B.C.

विहाय I.P.P. हा with वि to abandon. निर्गत्य I.P.P. गम् with निर् to set out. संविशन्ति Present III d. P. विश् with सम् to sit.

कमल वनचिताम्बुः पाटलामोदरम्यः
सुखसलिलनीषेकः सेव्यचन्द्रांशुहारः ।
व्रजतु तव निदाघः कामिनीभिः समेतः
निशि सुललितगीतैर्हर्म्यपृष्ठे सुखेन !! 28

इति कालिदासीये ऋतुसंहारे प्रथमः सर्गः ॥

Splitting of Sandhis

समेतः+निशि+सुललितगीतैः+हर्म्यपृष्ठे ।

Meaning

(हे प्रिये = ஓ காதலியே!)
कमल वनचिताम्बुः = தாமரைக்கூட்டங்களால் சூழப்பட்ட தண்ணீர் நிரம்பியதும்
पाटलामोदरम्यः = பாடலபுஷ்ப வாசனையினால் வடிவானதும்
सुखसलिलनिषेकः = சுகமாக தண்ணீரில் முழுகத்தக்கதும்
सेव्य चन्द्रांशहार = நிலவையும் மாலைகளையும் அனுபவிக்கத்தக்கதும்
कामिनीभिः = பெண்களோடு
समेतः = கூடி இருந்து அனுபவிக்கத்தக்கதுமான
निदाघः = கோடைக்காலமானது
निशी = இரவில்
सुललितगीतः = இனிமையான பாடல்களோடு
हर्म्यपृष्ठे = மாடியின்மேல்
सुखेन = சுகமாக
तव व्रजतु = உனக்கு கழியட்டும்.

Splitting of Compounds

कमलवनचितानि अम्बूनि यस्मिन् सः B. C. पाटलामोदेन रम्यः पाटलामोदरम्यः T.C. सुखं सलिलनिषेकं यस्मिन् सः B.C. सेव्यौ चन्द्रांशुहारौ यस्मिन् सः B.C,

समेतः P.P.P. इ with सम्+आ to go. व्रजतु Imperative III P. व्रज् to go.

वर्षावर्णनम् द्वितीयः सर्गः

सशीकराम्भोधर मत्तकुञ्जर
स्तडित्पताकोशनि शब्दमर्दलः !
समागतो राजवदुद्धत द्युति
र्घनागमः कामि जनप्रियः प्रिये !! 1

Splitting of Sandhis

सशीकराम्भोधरमत्तकुञ्जरः + तडित्पताकः+अशनिसमागतः+राजवत् +उद्धतद्युति+घनागमः

Meaning

प्रिये	=	ஓ காதலீ!
सशीकराम्बोधर-	=	நீருடன்கூடிய மேகங்களாகிற
कुञ्जरः	=	யானைகளை உடையதும்
तडित्पताकः	=	மின்னல்களாகிற கொடிகளை உடையதும்
अशनिशब्दमर्दलः	=	இடிமுழக்கமாகிற மத்தளவாத்தியசப்தத்தை உடையதும்
उद्धतद्युतिः	=	அழகுபொருந்தியதும்
कामिजनप्रियः	=	பெண்களுக்கு விரும்பத்தக்கதுமான
घनागम	=	மழைக்காலம்
राजवत्	=	மன்னன்போல்
समागतः	=	வந்துவிட்டது. (பார்)

Splitting of Compounds

सशीकराम्भोधरा एव मत्तकुञ्जराः यस्मिन् सः B. C. तटिदेव पताका यस्य सः B.C. अशनिशब्द एव मर्दलः यस्य सः B.C. उद्धता द्युतिः यस्य सः B.C कामिजनानाम् प्रियः कामिचनप्रियः T.C

समागतः P.P.P. गम् with सम् and आ।

नितान्त नीलोत्पल पत्रकान्तिभिः
क्वचित्प्रभिन्नाञ्जन राशिसन्निभैः ।
क्वचित्सगर्भप्रमदास्तनप्रभैः
समाचितं व्योम घनैः समन्ततः ॥ 2

Splitting of Sandhis

क्वचित्+प्रभिन्नाञ्जन, क्वचित्+सगर्भप्रमदा ।

Meaning

क्वचित्	=	சில இடங்களில்
नितान्तनीलोत्पल–	=	மிக நீலநிறமுள்ள தாமரையின்
पत्रकान्तिभि·	=	இதழ்போல்ஒளிஉள்ளவைகளும்
क्वचित्	=	மற்றொரு இடத்தில்
प्रभिन्नाञ्जनराशि–	=	புதிதாகக்குழைக்கப்பட்ட மைக்கு
सन्निभैः	=	ஒப்பானவைகளும் (கண்மை)
क्वचित्	=	சில இடங்களில்
सगर्भप्रमदास्तनप्रभैः	=	கர்ப்பிணியின் கொங்கைநிறம் போன்றவைகளுமான
घनैः, व्योम	=	மேகங்களால், ஆகாயம்
समन्ततः समाचितम्	=	நார்ப்புறமும் சூழப்பட்டுள்ளது

Splitting of Compounds

नितान्तनीलोत्पलपत्रस्थ कान्तिरिव कान्तिः येषां तैः B·C प्रभिन्नाञ्जनराशिना सन्निभाः तैः B·C. सगर्भप्रमदास्तनानां प्रभेव प्रभा येषां तैः B·C.

समाचितम् P·P·P· चि with सम् and आ ।

तृषाकुल श्चातकपक्षिणां कुलैः
प्रयाचितास्तोयभरावलम्बिनः ।
प्रयान्वि मन्दं बहुधारवर्षिणो
बलाहकाः श्रोत्रमनोहरस्वनाः ॥ 3

Splitting of Sandhis

तृषाकुलैः + चातक· प्रयाचिताः + तोयभरावलम्बिनः बहुधारवर्षिणः + बलाहकाः ।

Meaning

तृषाकुलैः = தாகமுற்ற
चातकपक्षिणां कुलैः = சாதகப்பறவையின் கூட்டங்களால்
प्रयाचिताः = யாசிக்கப்பட்டவைகளும் (தண்ணீர் அளி என்று)
तोयभरावलम्बिनः = நீரின் பாரத்தினால் கீழே தொங்குகின்றவைகளும்
बहुधारवर्षिणः = அதிகம் தாரை தாரையாகப் பொழிக்கின்றவைகளுமான
बलाहकाः = மேகங்கள்
श्रोत्र मनोहरस्वनाः = காதிற்கு இனிமையாக கர்ஜித்துக்கொண்டு
मन्दम् प्रयान्ति = மெல்லச்செல்லுகின்றன.

Splitting of Compounds

तृषया अकुलाः तृषाकुलाः तैः तृषाकुलैः T·C· तोयभरेण अवलम्बिनः तोयभरावलम्बिनः T·C· बहुधाराणाम् वर्षिणः बहुधारवर्षिणः T·C· श्रोत्रमनोहरः स्वनः येषां ते श्रोत्रमनोहरस्वानाः B·C·

प्रयान्ति present III P· या with प्र · प्रयाचिताः P·P·P· याच् with प्र to beg·

बलाहकाश्चाशनिशब्दमर्दलाः
सुरेन्द्रचापं दधतस्तडिद्गुणम् !
सुतीक्ष्णधारापतनोग्रसायकै
स्तुदन्ति चेतः प्रसभं प्रवासिनाम् !! 4

Splitting of Sandhis

बलाहकाः+च+अशनिशब्द दधतः+तडिद्गुणम् सतीक्ष्णधारापतनोग्रसायकैः+तुदन्ति ।

Meaning

बलाहकाः	=	மேகங்கள்
अशनिशब्दमर्दलाः	=	இடியாகிய போர்முழக்கத்தை உடையவகளாய்
तडिद्गुणम्	=	மின்னல்களாகிய நாண்கயிற்றை உடைய
सुरेन्द्रचापम्	=	இந்திரனின் வில்லை
दधतः	=	தரித்துக்கொண்டு (பிடித்துக் கொண்டு)
सुतीक्ष्णधारापतन-	=	கடும் மழைதாரையாகிய
उग्रसायकैः	=	கூர்மைபொருந்திய அம்புகளால்
प्रवासिनाम्	=	வழிப்போக்கர்களின்
चेतः	=	மனதை
प्रसभं तुदन्ति	=	மிகவும் வாட்டுகின்றன.

Splitting of Compounds

अशनिशब्द एव मर्दलः येषां ते B. C. सुरेन्द्रस्य चापः तम् सुरेन्द्रचापम् T.C. सुतीक्ष्णधारापतनमेव उग्रसयकाः तैः T.C.

तुदन्ति Present III P. तुद् to give pain. दधतः Present participle धा to bear.

प्रभिन्नवैदूर्यनिभै स्तृणाङ्कुरैः
समाचिता प्रोत्थितकन्दलीदलैः ।
बिभाति शुक्लेतररत्नभूषिता
वराङ्गनेव क्षितिरिन्द्रगोपकैः ॥ 5

Splitting of Sandhis

प्रभिन्नवैदूर्यनिभैः+तृणाङ्कुरैः वराङ्गना+इवः, क्षितिः+इन्द्रगोपकै

Meaning

क्षितिः = பூமியானது
प्रभिन्नवैदूर्यनिभैः = பிளக்கப்பட்ட வைடூர்யம் போன்ற
तृणाङ्कुरैः = இளம் புற்களாலும்
प्रोत्थितकन्दलीदलैः = முளைத்திருக்கின்ற கந்தலீ இலைகளாலும் (கந்தலீ ஓர் வகைக் கொடி
इन्द्रगोपकैः = பூச்சிகளாலும் (புல்லில் விளையாடும் ஓர் வகைப் பூச்சி இந்திரகோபம் எனப்படும்)
समाचिता = சூழப்பட்டதாய்
शुक्लेतररत्न भूषिता = வெள்ளையல்லாத மற்ற நீலம் முதலிய இரத்தினங்களால் அலங்கரிக்கப்பட்ட
वराङ्गना इव = சிறந்த பெண்மணிபோல்
विभाति = பிரகாசிக்கின்றது.

Splitting of Compounds.

प्रभिन्नवैदूर्यैः निभानि तैः प्रभिन्नवैदूर्यनिभैः T.C तृणानाम् अङ्कुराणि तृणाङ्कुराणि तैः T.C. प्रोत्थितानि च तानि कन्दलीदलानि तैः K.C. शुक्लेतररत्नैः भूषिता शुक्लेतररत्नभूषिता T.C.

विभाति Present III d. S. भास् with वि to shine. समाचिता P.P.P. चि with सम्+आ to Surround.

सदामनोज्ञं स्वनदुत्सवोत्सुकम्
विकीर्णविस्तीर्णकलापशोभितम् !
ससंभ्रमालिङ्गनचुम्बनाकुलं
प्रवृत्त नृत्यं कुलमद्य बर्हिणाम् !! 6

Splitting of Sandhis

कुलम्=अद्य स्वनद्+उत्सवोत्सुकम्

Meaning

अद्य	= இப்பொழுது (இந்த மழைகாலத்தில்)
सदा	= எப்பொழுதும்
मनोज्ञं स्वनत्	= இனிமையாக சப்திக்கின்றதும்
उत्सवोत्सुकम्	= ஆனந்தத்தில் ஈடுபட்டதும்
विकीर्णविस्तीर्ण-	= பரப்பப்பட்ட விஸ்தாரமான
कलापशोभितम्	= தோகைகளால் பிரகாசிக்கின்றதுமான
ससंभ्रमालिङ्गन-	= வேகமாக தழுவிக்கொள்வதிலும்
चुम्बनाकुलम्	= முத்தமிடுவதிலும் ஈடுபட்டதும்
प्रवृत्तनृत्यम्	= நடனமாடுகின்றதுமான
बर्हिणाम् कुलम्	= மயில்களின் கூட்டமானது

ஆங்காங்கு காணிப்படுகின்றது, பார்.

Splitting of Compounds

उत्सवे उत्सकम् उत्सवोत्सुकम् T. C. विकीर्णविस्तीर्णकलापैः शोभितम् विकीर्ण तम् T. C. ससम्भ्रमालिङ्गनचुम्बनैः आकुलम् T.C. प्रवृत्तम् नृत्यम् येन तत् प्र नृत्यम् B.C.

स्वनत् Present participle स्वन्

निपातयन्त्यः परितस्तटद्रुमान्
प्रवृद्धवेगैः सलिलैरनिर्मलैः।
स्त्रियः सुदुष्टा इव जातविभ्रमाः
प्रयान्ति नद्यस्त्वरितं पयोनिधिम्॥ 7

Splitting of Sandhis

परितः+तटद्रुमान्, सलिलैः+अनिर्मलैः सुदुष्टाः+इव, नद्य+त्वरितम्

Meaning

नद्यः = ஆறுகள்
प्रवृद्धवेगैः = வேகமுள்ளவைகளும் (அதிகரிக்கின்ற)
अनिर्मलैः = தெளிவற்றதுமான (கலக்கமுள்ள)
सलिलैः = தண்ணீரால்
परितः = இருபுறமுமுள்ள
तटद्रुमान् = கரையிலுள்ள மரங்களை
निपातयन्त्यः = வீழ்த்திக்கொண்டு
सुदुष्टाः = கெட்டகுணமுள்ள
स्त्रियः इव = பெண்கள்போல்
जातविभ्रमाः = பரபரப்புடன்கூட
पयोनिधिम् = சமுத்திரத்தை (நோக்கி)
त्वरितम् प्रयान्ति = வேகமாகச்செல்கின்றன.

Splitting of Compounds

तटेषु विद्यमानाः द्रुमाः T.C. न निर्मलानि अनिर्मलाः तैः T.C
जातः विभ्रमः यासां ताः जातविभ्रमाः तैः T.C.

निपातयन्त्यः Present participle पत् with नि (Co) प्रयान्ति Present. III P. या with प्र.

तृणोत्करैरुद्गतकोमलाङ्कुरैः
विचित्रनीलैर्हरिणी मुख क्षतैः ।
वनानि वन्ध्यानि हरन्ति मानसं
विभूषितान्युद्गतपल्लवद्रुमैः । 8

Splitting of Sandhis

तृणोत्करै+उद्गत विचित्रनीलैः+हरिणी विभूषितानि+उद्गत

Meaning

उद्गतकोमलाङ्कुरैः = முளைத்த இளம்தளிர்களை உடைய
विचित्रनीलैः = அழகியநீலநிறம்பொருந்தியதும்
हरिणीमुखक्षतैः = பெண்மான்களின் வாயினால் கடிக்கப்பட்டதுமான
तृणोत्करैः = புற்களாலும் (புற்களின் கூட்டங்களாலும்)
उद्गतपल्लवद्रुमैः = தளிர்த்த மரங்களாலும்
विभूषितानि = அழகுபடுத்தப்பட்ட
वैन्ध्यानि वनानि = விந்தியமலைக்காடுகள்
मानसं हरन्ति = மனதைக்கவருகின்றன.
(பார்ப்போரின்)

Splitting of Compounds

उद्गताः कोमलाङ्कुराः येषां तैः B.C. हरिणीमुखैः क्षतानि तैः T.C.
तृणानाम् उत्कराणि तैः T.C. उद्गतपल्लवाश्च ते द्रुमाश्च तैः K.C.

हरन्ति Present III d. P. हृ to take away,

विलोलनेत्रोत्पल शोभिताननै
मृगैस्समन्तादुप जातसाध्वसैः।
समाचितासैकतिनी वनस्थली
समुत्सुकत्वं प्रकरोति चेतसः॥ 9

Splitting of Sandhis

आननैः+मृगैः+समन्तात्+उपजातसाध्वसैः, समाचिता+सैकति

Meaning.

विलोलनेत्रोत्पल–	=	அசைகின்ற நீலத்தாமரை போன்ற கண்களால்
शोभिताननैः	=	அழகான முகங்களைஉடையதும்
उपजातसाध्वसैः	=	பயமுற்றவைகளுமான
मृगैः	=	மான்களால்
समन्तात् समाचिता	=	நாற்புறமும் சூழப்பட்ட
वनस्थली	=	காட்டுப்பிரதேசமானது
चेतसः समुत्सुकत्वम्	=	மனதிற்கு சந்தோஷத்தை
प्रकरोति	=	உண்டுபண்ணுகின்றது.

Splitting of Compounds

विलोलनेत्रोत्पलैः शोभितानि आननानि येषां तैः B.C. उपजातम् साध्वसम् येषां तैः B.C.

प्रकरोति Pre III d. S. कृ to do with प्र।

अभीक्ष्ण मुच्चैर्ध्वनता पयोमुचा
घनान्धकारीकृत शर्वरीष्वपि ।
तडित्प्रभादर्शित मार्ग भूमयः
प्रयान्ति रागादभिसारिकाः स्त्रियः ॥ 10

Splitting of Sandhis

अभीक्ष्णम्+उच्चैः+ध्वनता, शवरीषु+अपि रागात्+अभिसारिकाः

Meaning

अभिसारिकाः स्त्रियः	=	நாயகனைக்கருதிய பெண்கள்
अभीक्ष्णम्	=	அடிக்கடி
उच्चैः ध्वनता पयोमुचा	=	உரக்க சப்திக்கின்ற மேகத்தி னலும்
घनान्धकारीकृत-	=	நல்ல இருட்டாக்கப்பட்ட
शर्वरीःयपि	=	இரவுகளினும்
तडित्प्रभादर्शित-	=	மின்னல் ஒளியினால் காண்பிக்க ப்பட்ட
मार्गभूमयः	=	வழிகளை உடையவர்களாய்
रागात् प्रयान्ति	=	ஆசையோடு செல்கின்றனர்.

Splitting of Compounds

घनान्धकारीकृताश्च ताः शर्वर्यश्च घन-शर्वर्यः तासु K.C. तडित्प्रभा-दर्शिताः मार्गभूमयः यासां ता B.C.

प्रयान्ति Pre III d. P. या to go with प्र.

पयोधरै भीम गभीरनिः स्वनैः
तडिद्भिरुद्वेजित चेतसो भृशम् ।
कृतापराधानपि योषितः प्रियान्
परिष्वजन्ते शयने निरन्तरम् ।। 11

Splitting of Sandhis

पयोधरैः+भीम, तडिद्भिः+उद्वेजितचेतसः कृतापराधान्+अपि

Meaning

भीमगभीरनिः स्वनैः	=	பயங்கர இடிமுழக்கம்செய்கின்ற
पयोधरैः	=	மேகங்களாலும்
तडिद्भिः	=	மின்னல்களாலும்
भृशम् उद्वेजितचेतसः	=	மிகவும் துன்பத்திற்குள்ளாக்கப்பட்ட மனமுடைய
योषितः	=	பெண்கள்
शयने (स्थितान्)	=	படுக்கையில் (இருக்கின்ற)
कृतापरा धान् प्रियान्	=	குற்றம்செய்த நாயகர்களையும்
निरन्तरं परिष्वजन्ते	=	(நன்கு) இறுகத்தழுவிக்கொள்கின்றனர்.

Splitting of Compounds

भीमः गभीरः निःस्वनः येषां ते भीमगभीरनिः स्वनाः तै B. C.
उद्वेजितम् चेतः यासां ताः B. C. कृतः अपरा धः यैस्ते तान् B. C.

परिष्वजन्ते Present III P. स्वन्ज् with परि to embrace.

विलोचनेन्दीवर वारि बिन्दुभि
निंषिक्तबिम्बाधर चारुपल्लवाः !
निरस्तमाल्याभरणानु लेपनाः
स्थिता निराशाः प्रमदाः प्रवासिनाम् !! 12

Splitting of Sandhis

बिन्दुभिः+निषिक्त, स्थिताः+निराशाः

Meaning

प्रवासिनाम् — வெளிநாடுகளில் பிரிந்து வசிக்கின்றவர்களின்

प्रमदाः = மனைவிகள்

विलोचनेन्दीवर–वारिबिन्दुभिः = நீலத்தாமரைபோன்ற கண்களிலிருந்து சிந்துகின்ற கண்ணீர்களால்

निषिक्तबिम्बाधर–चारुपल्लवाः = நனைக்கப்பட்ட கொவ்வைப்பழம்போன்ற அழகிய தளிர்போன்ற உதடுகளை உடையவர்களாயும்

निरस्तमाल्याभरण–अनुलेपनाः = எடுக்கப்பட்ட மாலைகள் ஆபரணங்கள் பூச்சுகள் இவைகளை உடையவர்களாயும்

निराशाः स्थिताः = ஆசை அற்று இருக்கின்றனர்

Splitting of Compounds.

विलोचनेन्दीवरे वारिबिन्दवः तैः T.C. निषिक्ताः बिम्बाधरचारुपल्लवाः यासां ताः B. C. निरस्तं माल्या भरणम् अनुलेपनञ्च यासांताः B. C.

स्थिताः P.P.P. स्था to stand

विपाण्डुरं कीटरजस्तृणान्वितम्
भुजङ्गवद्वक्रगति प्रसर्पितम् !
ससाध्वसैर्भे ककुलैर्निरीक्षितम्
प्रयाति निम्नाभिमुखं नवोदकम् !! 13

Splitting of Sandhis

भुजङ्गवत्+वक्रगतिप्रसर्पितम् ससाध्वसैः+भेककुलैः+निरीक्षितम्

Meaning

नवोदकम्	=	புதிய தண்ணீரானது
विपाण्डुरम्	=	கலக்கமுள்ளதாகவும்
कीट रजस्-तृणान्वितम्	=	புழுக்கள், மண், தூசு இவைகள் பொருந்தியதாகவும்
भुजङ्गवत्	=	பாம்புபோல
वक्रगति	=	வளைந்து வளைந்து
प्रसर्पितम्	=	செல்கின்றதும்
ससाध्वसैः	=	பயப்படுகின்ற
भेककुलैः	=	தவளைக்கூட்டங்களால்
निरीक्षितम्	=	உற்று பார்க்கப்பட்டதாயும்
निम्नाभिमुखम्	=	பள்ளத்தைநோக்கி
प्रयाति	=	பாய்கின்றது.

Splitting of Compounds

विशेषेण पाण्डुरम् विपाण्डुरम्
कीटश्च रजांसि च तृणानि च कीटरजस्तृणानि तैः अन्वितम् T. C.
साध्वसेन सह वर्तन्ते इति ससाध्वसम् तैः B.C. मेकानाम् कुलानि तैः भेककुलैः T.C.

प्रयाति Present III ए. S. या with प्र to go. निरीक्षितम् P.P.P. ईक्ष् with निर् to see.

प्रफुल्लपत्रां नलिनीं समुत्सुकां
विहाय भृङ्गाः श्रुतिहारिनिस्वनाः !
पतन्ति मूढाः शिखिनां प्रनृत्यतां
कलापचक्रेषु नवोत्पलाशया !! 14

Splitting of Sandhis

नव+उत्पलाशया = नवोत्पला शय

Meaning

मूढाः	=	பகுத்தறிவற்ற
श्रुतिहारिनिःस्वनाः	=	காதிற்கு இனிமையாக ரீங்காசம் செய்கின்ற
भृङ्गाः, समुत्सुकाम्	=	வண்டுகள், (தேனை அனிக்க) உத்சாகமுள்ள
प्रफुल्लपत्राम्	=	மலர்ந்த இதழ்களையுடைய
नलिनीम्	=	தாமரைப்புஷ்பத்தை (உடைய குளத்தை)
विहाय	=	விட்டுவிட்டு
नवोत्पलाशया	=	புதிய நீலத்தாமரை என்ற எண்ணத்தினால்
प्रनृत्यताम्	=	நடனமாடுகின்ற
शिखिनाम्	=	மயில்களின்
कलापचक्रेषु	=	தோகைக்கூட்டங்களில்
पतन्ति	=	விழுகின்றன. (மொய்க்கின்றன)

Splitting of Compounds

प्रफुल्लानि पत्राणि यस्याः सा ताम् प्रफुल्लपत्राम् B. C. श्रुतिहारी निःस्वनः येषां ते श्रुतिहारिनिःस्वनाः B.C. कलापानाम् चक्राणि कलापचक्राणि तेषु कलापचक्रेषु T.C. नवोत्पलमिति आशा तया नवोत्पलाशया।

विहाय I.P.P. हा with वि to abandon.

वनद्विपानां नववारिदस्वनै
र्मदान्वितानां ध्वनतां मुहुर्मुहुः ।
कपोलदेशाविमलोत्पलप्रभाः
सभृङ्गयूथैर्मदवारिभिश्चिताः ॥ 15

Splitting of Sandhis

नववारिदस्वनैः+मदान्वितानाम्, कपोलदेशाः+विमलो
सभृङ्गयूथैः+मदवारिभिः+चिताः

Meaning

वारिदस्वनैः	=	புதியமேகங்களின் சப்தங்களால் (இடி-முழக்கங்களால்)
मदान्वितानाम्	=	மதமுற்றவைகளும்
(अत एव	=	ஆகையினாலேயே)
मुहुर्मुहुः ध्वनताम्	=	அடிக்கடி பிளிறுகின்றதுமான
वनद्विपानाम्	=	காட்டுயானைகளின்
विमलोत्पलप्रभाः	=	அழுக்கற்ற நீலத்தாமரைபோன்ற ஒளியுள்ள
कपोलदेशाः	=	கன்னங்கள்
सभृङ्गयूथैः	=	வண்டுகளின் கூட்டத்தோடு
मदवारिभिः	=	மதஜலப்பெருக்கினால்
चिताः (वर्तन्ते)	=	சூழப்பட்டதாக (இருக்கின்றன)

Splitting of Compounds

वने विद्यमानाः द्विपाः वनद्विपाः तेषाम् वनद्विपानाम् T. C. नववारिदानाम् स्वनाः नववारिदस्वनाः T.C. मदेन अन्विताः तेषाम् मदान्वितानाम् T.C. विमलोत्पलवत् प्रभा येषां ते विमलोत्पलप्रभाः BC. भृङ्ग यूथेन सह वर्तन्ते इति सभृङ्गयूथाः तैः B.C.

चिताः P.P.P. चि to Surround.

सतोय नम्रम्बुदचुम्बितोपलाः
समाचिताः प्रस्रवणैः समन्ततः ।
प्रवृत्तनृत्यैः शिखिभिः समाकुलाः
समुत्सुकत्वं जनयन्ति भूधराः ॥ 16

Meaning

सतोय नम्राम्बुद = தண்ணீருடன்கூடியதும்
(ஆகையினாலேயே) கீழே தொங்குகின்றதுமான மேகங்களால்
चम्बितोपलाः = சூழப்பட்ட கற்களையுடையன
வாகவும்
समन्ततः = நாற்புறமும்
प्रस्रवणैः = அருவிகளால்
समाचिताः = சூழப்பட்டவைகளாகவும்
प्रवृत्तनृत्यैः = நடனமாடுகின்ற
शिखिभिः = மயில்களால்
समाकुलाः = சூழப்பட்டவைகளாகவும்
காணப்படுகின்ற
भूधराः = மலைகள் (பார்ப்போருக்கு)
समुत्सुकत्वम् = ஆனந்தத்தை
जनयन्ति = உண்டுபண்ணுகின்றன.

Splitting of Compounds

सतोयनम्राम्बुदचुम्बिताः उपलाः येषां ते B.C. प्रवृत्त नृत्यं यैः तैः प्रवृत्तनृत्यैः B.C.

जनयन्ति Present III P. जन् to Produce

कदम्बसर्जार्जुन नीपकेतकी:
प्रकम्पयंस्तत्कुसुमाधितासितः !
सशीकराम्भोधर सङ्गशीतलः
समीरणः कं न करोति सोत्सुकम् !! 17

Splitting of Sandhis

प्रकम्पयन्+तत्कुसुमाधिवासितः

Meaning

कदम्बसर्जार्जुन-	=	கடம்பை, சர்ஜ, அர்ஜுன,
नीप केतकीः	=	நீப, கேதகீ ஆகிய மரங்களை
प्रकम्पयन्		அசைக்கின்றதும்
तत्कुसुमाधिवासितः	=	அந்தப்புஷ்பங்களால் வாசனைகம ழும்படி செய்யப்பட்டதும்
सशीकराम्भोधर-	=	நீருண்ட மேகங்களின்
सङ्गशीतलः	=	சேர்க்கையினல்குளிர்ந்ததுமான
समीरणः	=	காற்று
कं सोत्सुकम्	=	யாரை உற்சாகமுள்ளவனாக
न करोति	=	செய்யவில்லை,

Splitting of Compounds

कदम्बाश्च सर्जाश्च अर्जुनाश्च नीपाश्च केतकयश्च केतक्यः, ताः प्रकम्पयन् T.C. तत्कुसुमैः अधिवासितः तत्कुसुमाधिवासितः T.C. सशीकराम्भोधरसङ्गेन शीतलः T.C.

करोति present III S. डु to do.

शिरोरुहैः श्रोणितटावलम्बिभिः
कृतावतंसैः कुसुमैः सुगन्धिभिः ।
स्तनैः सहारैर्वदनैः ससीधुभिः
स्त्रियो रतिं सञ्जनयन्ति कामिनाम् ॥ 18

Splitting of Sandhis

सहारैः+वदनैः, स्त्रियः+रतिम्

Meaning

श्रोणितटवलम्बिभिः	=	தொடைவரையில் பின்புறம் தொங்குகின்ற
शिरोरुहैः	=	கூந்தல்களாலும்
सुगन्धिभिः	=	நல்ல வாசனை கமழுகின்ற
कृतावतंसैः	=	அழகிற்காக வைத்துக் கொள்ளப்பட்ட
कुसुमैः	=	புஷ்பங்களாலும்
सहारैः स्तनैः	=	முத்துமாலைகளுடன் கூடிய கொங்கைகளாலும்
ससीधुभिः	=	கள்ளுடன்கூடிய
वदनैः	=	முகங்களாலும்
स्त्रियः	=	பெண்கள்
कामिनाम्	=	பெண்ணைசபிடித்தவர்களுக்கு
रतिं सञ्जनयन्ति	=	சந்தோஷத்தை உண்டுபண்ணுகின்றனர்.

Splitting of Compounds

श्रोणितटं अवालम्बीनि तैः T·C· हारैः सह वर्तन्ते इति सहाराः तैः B·C· सीधुना सह वर्तन्ते इति ससीधवः तैः B· C·

संजनयन्ति Present III P· जन् with सम् to Produce·

तडिल्लताशक्रधनुर्विभूषिताः
पयोधरास्तोयभरावलम्बिनः ।
स्त्रियश्च काञ्चीमणिकुण्डलोज्वला
हरन्ति चेतो युगपत् प्रवासिनाम् ॥ 19

Splitting of Sandhis

पयोधराः+तोयभरावलम्बिनः; स्त्रियः+च चेतः+युगपत्

Meaning

तडिल्लता–	= கொடிபோன்ற மின்னல்களாலும்
शक्रधनुर्विभूषिताः	= வானவில்லினாலும் அலங்கரிக்கப்பட்டவைகளும்
तोयभर–	= நீரின்பாரத்தினால்
अवलम्बिनः	= கீழே தாழ்ந்துள்ளவைகளுமான
पयोधराः	= மேகங்களும்,
काञ्चीमणि–	= ஒட்டியாணம், இரத்தின
कुण्डलोज्वलाः ,	= குண்டலம் இவைகளால் பிரகாசிக்கின்ற
स्त्रियः च	= பெண்களும்,
प्रवासिनाम्	= மனவியை விட்டுப்பிரிந்திருப்பவர்களின்
चेतः	= மனதை
युगपत् हरन्ति	= ஒரேசமயத்தில் கவருகின்றனர்.

Splitting of Compounds

तडिल्लताशक्रधनुर्भ्यां विभूषिताः T. C. तोयभरेण अवलम्बिनः तोय म्बिनः T.C. काञ्चीमणिकुण्डलाभ्याम् उज्ज्वलाः T.C.

हरन्ति Present III P. हृ to take away.

मालाः कदम्बनवकेसर केतकीभि
रायोजिताः शिरसि बिभ्रति योषितोद्य ।
कर्णान्तरेषु ककुभद्रुम मञ्जरीभि
रिच्छानुकूल रचितानवतंसकांश्च !! 20

Splitting of Sandhis

कदम्बनवकेसरकेतकीभिः+आयोजिताः, योषितः+अद्य, ककुभद्रुममञ्जरीभिः+इच्छानुकूलरचितान्+अवतंसकान्+च ·

Meaning

अद्य	= இப்பொழுது (இந்த மழைக்காலத்தில்
योषितः	= பெண்கள்
कदम्बनवकेसर-केतकीभिः	= கதம்பபுஷ்பம், புதிய கேசரபுஷ்பம், தாழம்பூ ஆகிய இவைகளால்
आयोजिताः मालाः	= கட்டப்பட்ட மாலைகளை
शिरसि	= தலையில்
बिभ्रति	= அணிந்துகொள்கின்றனர் ·
ककुभद्रुममञ्जरीभिः	= அர்ஜுனமரங்களின் புஷ்பக் கொத்துகளால்
इच्छानुकूलरचितान्	= விருப்பத்திற்கு ஏற்றவாறு செய்யப்பட்ட
अवतंसकान् च	= ஆபரணங்களையும்
कर्णान्तरेषु	= காதுகளில்
बिभ्रति	= தரித்துக்கொள்கின்றனர் ·

Splitting of Compounds

कदम्बानि च नवकेशरणि च केतकयश्च ताभिः T.C. ककुभद्रुमाणाम्-मञ्जर्यः, ककुभद्रुममञ्जर्यः ताभिः T.C. इच्छानुकूलं रचितान्, इच्छानुकूलरचितान् T.C.

बिभ्रति Pre III a. P. भृ to bear ·

कालागरु प्रचुरचन्दन चर्चिताङ्गाः
पुष्पावतंससुरभीकृत केशपाशाः ।
श्रुत्वा ध्वनिं जलमुचां त्वरितं प्रदोषे
शय्यागृहं गुरुगृहात् प्रविशन्ति नार्यः ॥ 21

Meaning.

कालागरुप्रचुर-चन्दनचर्चिताङ्गाः	= வாசனைப்பொருள் அதிகம் கலக்கப்பட்ட சந்தனத்தினால் பூசப்பட்ட அங்கங்களை உடையவர்களும்
पुष्पावतंस सुरभीकृत-केशपाशाः	= பூ அணிவதால் வாசனை ஊட்டப்பட்ட சிறந்த கூந்தல்களை உடையவர்களுமான
नार्यः	= பெண்கள்
प्रदोषे	= சாயம்காலவேளையில்
जलमुचां ध्वनिं	= மேகங்களின் சப்தத்தை
श्रुत्वा	= கேட்டுவிட்டு
गुरुगृहात्	= பெரிய வீட்டினின்றும்
शय्यागृहम्	= படுக்கை அறைக்குள்
त्वरितं प्रविशन्ति	= விரைவில் புகுகின்றனர்.

Splitting of Compounds

कालागरुप्रचुरचन्दनेन चर्चितानि अङ्गानि याभिः ताः B.C पुष्पावतंससुरभीकृताः केशपाशाः यभिः ताः B.C शय्यायाः गृहम् गुरु च तत् गृहञ्च गुरुगृहम् तस्मात् K.C.

श्रुत्वा I.P.P. श्रु to hear प्रविशन्ति Pre III d. P. विश् to enter with प्र.

कुवलय दलनीलैरुन्नतै स्तोयनम्रै
मृदुपवन विधूतैर्मन्द मन्दं चलद्भिः ।
अपहृतमिवचेतस्तोयदैः सेन्द्रचापैः
पथिकजनवधूनां तद्वियोगाकुलानाम् ॥ 22

Splitting of Sandhis

कुवलयदलनीलैः + उन्नतैः + तोयनम्रैः + मृदुपवनविधूतैः + मन्दमन्दम्, अपहृतम् + इव चेतः + तोयदैः ।

Meaning

कुवलयदलनीलैः = நீலத்தாமரை இதழ்போல் கறுப்பான வைகளும்
उन्नतैः = பெரியவைகளும்
तोयनम्रैः = தண்ணீரினல் கீழே இறங்கிய வைகளும்
मृदुपवनविधूतैः = மென்மையானகாற்றினல் அசைக்கப்பட்டவைகளும்
मन्दमन्दम् = மெல்ல மெல்ல
चलद्भिः = அசைகின்றவைகளும்
सेन्द्रचापैः = வானவில்லோடுகூடியவை களுமான
तोयदैः = மேகங்களால்
तद्वियोगाकुलानाम् = அவர்களின்(வழிப்போக்கர்க ளின்) பிரிவினல் வருந்துகின்ற
पथिकजनवधूनाम् = வழிப்போக்கர் மனைவிகளின்
चेतः = மனம்
अपहृतमिव = களவாடப்பட்டதுபோலும்.

(மேகங்களின் சப்தத்தைக்கேட்டு மனம் பறிகொடுத்து ஏங்கு கின்றனர் என்பது கருத்து)

Splitting of Compounds

कुवलयदलवत् नीलै K.C. मृदुपवनेन विधूताः तै T.C. इन्द्रचापेन सह वर्तन्ते इति B.C. तद्वियोगेन आकुलाः तासाम् T.C. अपहृतम् P.P.P. हृ with अप to steal. चलद्भिः Present participle. Inst P. चल् to move.

मुदित इव कदम्बै र्जातपुष्पैस्समन्तात्
पवनचलितशाखैः शाखिभिर्नृत्यतीव।
हसितमिव विधत्ते सूचिभिः केतकीनां
नवसलिल निषेकाच्छिन्नतापो वनान्तः !! 23

Splitting of Sandhis

मुदितः+इव, कदम्बैः+जातपुष्पैः+समन्तात् शाखिभिः+नृत्यति +इव, नवसलिलनिषेकात्+छिन्नतापः+वनान्तः

Meaning

नवसलिलनिषेकात् = புதுநீரின்நனைப்பாலே
छिन्नतापः = தணிக்கப்பட்ட தாப்த்தை உடைய
वनान्तः = காட்டுப்பிரதேசமானது
जातपुष्पैः = புஷ்பித்தவைகளான
कदम्बैः = கதம்பமரங்களால்
समन्तात् = எங்கும்
मुदितः इव = சந்தோஷத்தினுல் மயிர்க்கூச்சல் அடைகின்றதுபோலும்
पवनचलितशाखैः = காற்றினுல் அசைக்கப்பட்ட கிளைகளை உடைய
शाखिभिः = மரங்களால்
नृत्यतीव = நடனமாடுகின்றதுபோலும்
केतकीनां सूचिभिः = தாழம்பூவின் முட்களால்
हसितं विधत्ते इव = சிரிக்கின்றதுபோலும். (காணப்படுகின்றது)

Splitting of Compounds.

जातानि पुष्पाणि येषां ते जातपुष्पाः तैः B.C. पवनचलिताः शारखाः येषां तैः B.C. छिन्नः तापः येन सः B.C.
विधत्ते Present III d. S. धा with वि। मुदितः Past P.P. मुद् to be happy.

शिरसि वकुलमालां मालतीभिः समेतां
विकसितवनपुष्पै र्यूथिकाकुट्मलैश्च ।
विकचनवकदम्बैः कर्णपूरं वधूनां
रचयति जलदौघः कान्तवत् काल एषः ॥ 24

Splitting of Sandhis

विकसितवनप्रसूनैः + यूथिकाकुट्मलैः + च ।

Meaning

जलदौघः एषः कालः	= மேகக்கூட்டங்களை உடைய இந்த மழைக்காலம்
कान्तवत्	= காதலன்போல்
वधूनां शिरसि	= பெண்களின் தலையில்
मालतीभिः	= மாலதிப்புஷ்பங்களோடும்
विकसितवनपुष्पैः	= மலர்ந்தகாட்டுப்புஷ்பங்களோடும்
यूथिकाकुट्मलैः च	= யூதிகாபுஷ்பமொட்டுகளோடும்
समेतां वहुलमालाम्	= கூடிய பகுளபுஷ்பமாலைகளையும் அவ்விதமே
विकचनवकदम्बैः	= மலர்ந்த புதிய கடம்பைப்புஷ்பங்களால்
कर्णपूरम्	= காதிற்கு ஆபரணத்தையும்
रचयति	= அணிவிக்கின்றது, (பார்)

Splitting of Compounds

विकसितानि च वन पुष्पाणि K. C. यूथिकानाम् कुट्मलानि यूथिकाकुट्मलानि तैः T.C. विकचानि च तानि नवकदम्बानि च K.C

रचयति Present III d. S. रचू to arrange.

दधति कुचयुगाग्रैरुन्नतैर्हारयष्टिं
प्रतनु सितदुकूलान्यायतैः श्रोणिबिम्बैः ।
नवजलकणसेकादुद्गतां रोमराजीं
त्रीवलि वलिवि भागै र्मध्यदेशैश्च नार्यः ॥ 25

Splitting of Sandhis

कुचयुगाग्रैः+उन्नतैः+हारयष्टिम् प्रतनुसितदुकूलानि+आयतैः
नवजलकणसेकात्+उद्गताम् त्रिवलिवलिविभागैः)+मध्यदेशैः+च ।

Meaning

नार्य्यः — பெண்கள்
उन्नतैः कुचयुगाग्रैः = நிமிர்ந்த இரு கொங்கைகளின் நுனிகளால்
हारयष्टिम् மெல்லிய முத்துமாலையையும்,
आयतैः श्रोणिबिम्बैः = அகன்ற இடுப்புப்பிரதேசங்களால்
प्रतनुसितदुकूलानि = மெல்லிய வெள்ளைப்பட்டுச் சேலைகளையும்,
त्रिवलिवलिविभागैः = மும்மடிப்பை உடைய
मध्यदेशैः = இடைகளால்
नवजलकणसेकात् = புதிய நீர் பட்டதினால்
उद्गताम् रोमराजीम् = உண்டான உரோமவரிசையையும் (மயிர்க்கூச்சலையும்)
दधति = தரிக்கின்றனர்.

Splitting of Compounds

कुचयुगानाम् अग्राणि तैः कुचयुगाग्रैः T C. सितानि च तानि दुकूलानि K·C. नवजलकणानाम् सेक्रः नवजलकणसेकः तस्मात् T·C.

दधति Present III d· P· धा to bear·

नवजलकणसङ्गाच्छीतितामादधानः
कुसुम भरनतानां नाशकः पादपानाम् ।
जनितरुचिरगन्धः केतकीनां रजोभिः
अपहरति नभस्वान् प्रोषितानां मनांसि ॥ 26

Splitting of Sandhis

नवजलकणसङ्गात्+शीतताम्+आदधानः

Meaning

नवजलकणसङ्गात्	=	புதிய நீரின் சேர்க்கையினால்
शीतताम् आदधानः	=	குளிர்ச்சியைப் பெற்றதும்
कुसुमभरनतानाम्	=	புஷ்பங்களின் பாரத்தினால் வளைந்த
पादपानाम् नाशकः	=	மரங்களை அழிக்கின்றதும்
केतकीनाम् रजोभिः	=	தாழம்பூவின் மகரந்தப் பொடிகளால்
जनितरुचिरगन्धः	=	நல்ல மணமூட்டப்பெற்ற
नभस्वान्	=	காற்று
प्रोषितानाम् मनांसि	=	காதலர்களை விட்டுப்பிரிந்த பெண்களின் மனங்களை
अपहरति	=	காதலுறச்செய்கின்றது.

Splitting of Compounds

नवजलकणानां सङ्गः तस्मात् T·C. कुसुमभरेण नताः तेषाम् कुसुमभरनतानाम् T·C. जनितः रुचिरगन्धः यस्मिन् सः B.C·

अपहरति Present III d· S. हृ with अप to steal· आदधानः Present participle धा with आ to bear.

जलभरनमिता नाम्राश्रयोऽस्माकमुच्चै
रयमिति जलसेकै स्तोयदा स्तोयनम्राः
अतिशयपरुषाभिर्ग्रीष्मवह्नेः शिखाभिः
समुपजनिततापं ह्लादयन्तीव विन्ध्यम् !! 27

Splitting of Sandhis

जलभरनमितानाम् + आश्रयः + अस्माकम् + उच्चैः + अयम् + इति
जलसेकैः + तोयनम्राः अतिशयपरुषाभिः + ग्रीष्मवह्नेः
ह्लादयन्ति + इव ।

Meaning

तोयनम्राः	= தண்ணீரினால் கீழே இறங்கிய
तोयदाः	= மேகங்கள்
अयम्	= (இந்த விந்தியமலை) இது
जलभरनमितानाम्	= நீரின்பாரத்தினால் கீழே விழுகின்ற
अस्माकम्	= நமக்கு
उच्चैः आश्रयः इति	= பெரிய தங்குமிடம் என்று
अतिशयपरुषाभिः	= மிகக்கடுமான
ग्रीष्मवह्नेः	= கோடைக்காலநெருப்பினது
शिखाभिः	= சுடர்களால் (கோடைவெப்பத்தால்
समुपजनिततापम्	= உண்டாக்கப்பட்ட வெப்பத்தை உடைய
विन्ध्यम्	= விந்தியமலையை
ह्लादयन्तीव	= சந்தோஷப்படுத்துகின்றன போலும். (நீரைப்பொழிந்து குளிரச்செய்கின்றன போலும்)

Splitting of Compounds

जलभरेण नमिताः तेषाम् T. C. अतिशयं परुषाः ताभिः T. C.
तोयैः नम्राः तोयनम्राः T.C. समुपजनितः तापः यस्य तम् B.C.

ह्लादयन्तिः Present III d. P. ह्लाद् to give pleasure

बहुगुणरमणीयो योषितां चित्तहारी
तरुविटपलतानां बान्धवो निर्विकारः ।
जलदसमय एषः प्राणिनां प्राण भूतो
दिशतु तव हितानि प्रायशो वाञ्छितानि ॥ 28

Splitting of Sandhis

रमणीयः+योषिताम् बान्धवः+निर्विकारः जलदसमयः+एषः,
प्राणभूतः+दिशतु प्रायशः+वाञ्छितानि ।

Meaning

(हे प्रिये	= ஓ காதலீ)
बहुगुणरमणीयः	= பல நன்மைகளால் அழகு பொருந்தியதும்
योषितांचित्तहरी	= பெண்களின் மனதைக்கவருகின்றதும்
तरुविटपलतानाम्	= மரம் கொடி கீளை இவைகளுக்கு
निर्विकारः बान्धवः	= கபடமற்ற சுற்றத்தவனும்
प्राणिनां प्राणभूतः	= பிராணிகளுக்கு உயிர்போன்றதுமான
एषः जसदसमयः	= இந்த மழைக்காலமானது
प्रायशः	= பெரும்பாலும்
तव	= உனக்கு
वाञ्छितानि हितानि	= விரும்பப்பட்ட நன்மைகளை
दिशतु	= அளிக்கட்டும்.

Splitting of Compounds

बहुगुणैः रमणीयः T·C· तरवश्च विटपाश्च लताश्च वासाम् D·C·
जलदस्य समयः जलदसमयः T·C·

दिशतु Imperatiae III S दिश् to give·

श्रीमद्वाल्मीकि रामायणम्

बालकाण्डम् प्रथमः सर्गः

नारद वाक्यम्

तपः स्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुंगवम् ॥ 1

को न्वस्मिन् सांप्रतं लोके गुणवान् कश्च वीर्यवान् ।
धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ॥ 2

चारित्रेण च को युक्तः सर्वभूतेषु को हितः ।
विद्वान् कः, कः समर्थश्च कश्चैकप्रियदर्शनः ॥ 3

आत्मवान् को जितक्रोधो द्युतिमान् कोऽनसूयकः ।
कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे ॥ 4

एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे ।
महर्षे त्वं समर्थोऽसि ज्ञातुमेवंविधं नरम् ॥ 5

श्रुत्वा चैतत् त्रिलोकज्ञो वाल्मीकेर्नारदो वचः ।
श्रूयतामिति चामन्त्र्य प्रहृष्टो वाक्यमब्रवीत् ॥ 6

बहवो दुर्लभाश्चैव ये त्वया कीर्तिता गुणाः ।
मुने वक्ष्याम्यहं बुद्ध्वा तैर्युक्तः श्रूयतां नरः ॥ 7

इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः ।
नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी ॥ 8

बुद्धिमान् नीतिमान् वाग्मी श्रीमान्शत्रुनिबर्हणः ।
विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः ॥ 9

महोरस्को महेष्वासो गूढजत्रुरिंदमः ।
आजानुबाहुः सुशिराः सुललाटः सुविक्रमः ॥ 10

समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान् ।
पीनवक्षा विशालाक्षो लक्ष्मीवाञ्शुभलक्षणः ॥ 11

धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः ।
यशस्वी ज्ञानसंपन्नः शुचिर्वश्यः समाधिमान् ॥ 12

Splitting of Sandhis
Splitting of Compounds
Parsing
Meaning

1) वाल्मीकिः+प्रनिपुङ्गवम् तपस्वाध्याययोःनिरतः तम् T.C. मुनि. पुगौरिव तम् K.C. परिपप्रच्छ R. perf III S. प्रच्छ् with परि

2) धर्मज्ञः+च, गुणज्ञः+च नु+अस्मिन्=न्वस्मिन् सत्यं वाक्यं यस्य सः B.C. दृढं व्रतं यस्य सः B C. धर्मस्य ज्ञः T.C. कृतस्य ज्ञः T.C.

3) समर्थः+च, कः+च+एकप्रिय सर्वे च ते भूताश्च तेषु K.C. युक्तः P.PP. युज् to join एकप्रियदर्शन சகுனத்திற்கு உகந்தவன்

4) कः+अनसूयकः, देवाः+च जितः क्रोधः येन सः B.C. न विद्यते असूया यस्य सः B.C. जातः रोषः यस्य सः B.C. बिभ्यति Pre III P. भी to fear संयुगे போரில்

5) एतत्+इच्छामि+अह समर्थः+अस्मि, ज्ञातुम्+एवंविधम् इच्छामि pre I S. इच्छ् श्रोतुम् Imfi श्रु to hear ज्ञा तुं Infi to know

6) च+एतत्, वाल्मीकेः+नारदः श्रूयताम्+इतिः च+आमन्त्य वाक्यम्+अब्रवीत् श्रुत्वा, आमन्त्य, I.P.P. श्रूयताम् pass Impve III S.

दुर्लभाः+च+एव, वक्ष्यामि+अहम् तैः+युक्तः कीर्तिताः, युक्तः P.P.P. वक्ष्यामि II I S. वच् बुद्ध्वा I.P.P. बुध्

8) इक्ष्वाकुवंशः प्रभवः यस्य B.C. नियतः आत्मा येन सः B.C. महत् वीर्यम् यस्य सः B.C.

9) श्रीमान्+शत्रुनिवर्हणः विपुलः अंसः यस्य B.C. महान्तौ बाहू यस्य B.C. कम्बुरिव ग्रीवा यस्य B.C. महान् हनुः यस्य B.C.

10) गूढजत्रुः+आरिंदमः जत्रु தோள்எலும்பு

11) लक्ष्मीवान्+शुभलक्षणः

12) शुचिः+वश्यः

प्रजामतिसमः श्रीमान् धाता रिपुनिषूदनः ।
रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता ॥ 13
रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता ।
वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ॥ 14
सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान् ।
सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः ॥ 15
सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः ।
आर्यः सर्वसमश्चैव सदैव प्रियदर्शनः ॥ 16
स च सर्वगुणोपेतः कौसल्यानन्दवर्धनः ।
समुद्र इव गाम्भीर्ये धैर्येण हिमवानिव ॥ 17
विष्णुना सदृशो वीर्ये सोमवत् प्रियदर्शनः ।
कालाग्निसदृशः क्रोधे क्षमया पृथिवीसमः ॥ 18
धनदेन समस्त्यागे सत्ये धर्म इवापरः ।
तमेवंगुणसंपन्नं रामं सत्यपराक्रमम् ॥ 19
ज्येष्ठं श्रेष्ठगुणैर्युक्तं प्रियं दशरथः सुतम् ।
प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया ॥ 20
यौवराज्येन संयोक्तुमैच्छत् प्रीत्या महीपतिः ।
तस्याभिषेकसंभारान् दृष्ट्वा भार्याथ कैकयी ॥ 21
पूर्वं दत्तवरा देवी वरमेनमयाचत ।
विवासनं च रामस्य भरतस्याभिषेचनम् ॥ 22
स सत्यवचनाद्राजा धर्मपाशेन संयतः ।
विवासयामास सुतं रामं दशरथः प्रियम् ॥ 23
स जगाम वनं वीरः प्रतिज्ञामनुपालयन् ।
पितुर्वचननिर्देशात् कैकेय्याः प्रियकारणात् ॥ 24
तं व्रजन्तं प्रियो भ्राता लक्ष्मणोऽनुजगाम ह ।
स्नेहाद्विनयसंपन्नः सुमित्रानन्दवर्धनः ॥ 25
भ्रातरं दयितो भ्रातुः सौभ्रात्रमनुदर्शयन् ।
रामस्य दयिता भार्या नित्यं प्राणसमाहिता ॥ 26
जनकस्य कुले जाता देवमायेव निर्मिता ।
सर्वलक्षणसंपन्ना नारीणामुत्तमा वधूः ॥ 27

13) प्रजापतिना समः T·C· रिपूणाम् निबूदनः T.C. रक्षिताP·P.P·
14) तत्वज्ञः+धनुः खस्य जनः T·C· वेदवेदाङ्गानां तत्वज्ञः धनुषः वेदः T·C· निष्टितः P·P·P· स्था with निस्
15) साधुः +अदीन सर्वशास्त्रार्थानां तत्वज्ञः सर्वलोकाना प्रियः T·C. अदीनःआत्मायस्य सः अदीनात्मा B·C. विचक्षणः=அறிவாளி
16) सर्वदा+अभिगतः सर्वसमः +च+एव सदा+एव प्रियं दर्शनं यस्य T·C· अभिगतः P·P·P· गम् with अभि
17) हिमवान्+इव सर्वगुणैः+उपेतः T·C· कौसल्यानन्दस्य वर्धनः
18) सदृशः+वीर्ये प्रिय दर्शनंयस्य B·C. कालाग्निना सदृशः T·C. पृथिव्या समः T·C· सोमवत्=சந்திரன்போல
19) समः+त्यागे इव+अपरः तम्+एवंगुणै T·C एवंगुणैः संपन्नम् T·C. सत्यः पराक्रमः यस्य B·C धनद=குபேரன் धर्म=யமதர்மராஜன்
20) हितैः + युक्तम् T·C· प्रकृतिप्रियस्य काम्यया T·C· प्रकृति =பிரஜைகள்
21) संयोक्तुम्+ऐच्छत् तस्य+अभिषेकसंभार भार्या+अथ मह्या· पतिः T·C· अभिषेकस्य संभारान् T C· संयोक्तुम Infi. युज् with सम् ऐच्छत् Imt. III S. इष् (इच्छ्) दृष्ट्वा I·P·P. दृश्
22) वरम्+एनम्+अयाचत भरतस्य+अभिषेच दत्तौ वरौ यस्यै सा B·C· अयाचत Im· III S· याच् to beg·
23) सत्यवचनात्+राजा सत्यस्य वचनात् T·C· धर्मएव पाशः K·C· विवासयामास per· Perf· III S· (Dino)
24) पितुः +वचन प्रतिज्ञाम्+अनुपाल जगाम् R·perf. III S· गम् अनुपालयन् pr· P· पाल्+अनु प्रियस्य कारणात् T·C.
25) लक्ष्मणः+अनु स्नेहात्+विनय विनयेन संपन्नः T·C. सुमित्रायाः आनन्दवर्धनः T·C· व्रजन्तम् pres· P. व्रज् to go. अनुजगाम R· perfect· III S· गम् with अनु
26) सौभ्रात्रम्+अनु प्राणसमा+हितां अनुदर्शयन् pr· P· दृश् with अनु (Cau)
27) देवमाया+इव नारीणाम्+उत्तमा देवानाम् माया T·C· सर्वलक्षणैः संपन्ना T·C· जाता P·P·P· जन् निर्मिता P·P·P· मा with निर्

सीताप्यनुगता रामं शशिनं रोहिणी यथा ।
पौरैरनुगतो दूरं पित्रा दशरथेन च ॥ 28

शृङ्गिबेरपुरे सूतं गङ्गाकूले व्यसर्जयत् ।
गृहमासाद्य धर्मात्मा निषादाधिपतिं प्रियम् ॥ 29

गुहेन सहितो रामो लक्ष्मणेन च सीतया ।
ते वनेन वनं गत्वा नदीस्तीर्त्वा बहूदकाः । 30

चित्रकूटमनुप्राप्य भरद्वाजस्य शासनात् ।
रम्यमावसथं कृत्वा रममाणा वने त्रयः ॥ 31

देवगन्धर्वसंकाशास्तत्र ते न्यवसन् सुखम् ।
चित्रकूटं गते रामे पुत्रशोकातुरस्तथा ॥ 32

राजा दशरथः स्वर्गं जगाम विलपन् सुतम् ।
मृते तु तस्मिन् भरतो वसिष्ठप्रमुखैर्द्विजैः ॥ 33

नियुज्यमानो राज्याय नैच्छद्राज्यं महाबलः ।
स जगाम वनं वीरो रामपादप्रसादकः ॥ 34

गत्वा तु स महात्मानं रामं सत्यपराक्रमम् ।
अयाचद्भ्रातरं रामं आर्यभावपुरस्कृतः ॥ 35

त्वमेव राजा धर्मज्ञ इति रामं वचोऽब्रवीत् ।
रामोऽपि परमोदारः सुमुखः सुमहायशः ॥ 36

न चैच्छत् पितुरादेशाद्राज्यं रामो महाबलः ।
पादुके चास्य राज्याय न्यासं दत्वा पुनः पुनः ॥ 37

निवर्तयामास ततो भरतं भरताग्रजः ।
स कामममनवाप्यैव रामपादावुपस्पृशन् ॥ 38

नन्दिग्रामेऽकरोद्राज्यं रामागमनकाङ्क्षया ।
गते तु भरते श्रीमान् सत्यसन्धो जितेन्द्रियः ॥ 39

रामस्तु पुनरालक्ष्य नागरस्य जनस्य च ।
तत्रागमनमेकाग्रो दण्डकान् प्रविवेश ह ॥ 40

प्रविश्य तु महारण्यं रामो राजीवलोचनः ।
विराधं राक्षसं हत्वा शरभङ्गं ददर्श ह ॥ 41

सुतीक्ष्णं चाप्यगस्त्यं च अगस्त्यभ्रातरं तथा ।
अगस्त्यवचनाच्चैव जग्राहैन्द्रं शरासनम् ॥ 42

28) सीता+अपि+अनु पौरैः+अनुगतः अनुगता P.P.P. गम्+अनु रोहिणी ரோகிணீநட்சத்திரம்

29) गृहम्+आसाद्य गङ्गायाः कूलम् तस्मिन् T.C. निषादानाम् अधिपतिम् T.C. व्यसर्जयत् cau. Imp. III S सृज् with वि आसाद्य I.P.P. सद्+आ

30 नदीः+तीर्त्वा बहु उदकम् यासुताः B.C. गत्वा I.P.P. गम्

31) चित्रकूटम्+अनु रम्यम्+आवसथम् अनु प्राप्य I.P.P. आप् with अनु and प्र रममाणः Pre P. रम्

32) पुत्रशोकातुरः+तथा देवगन्धर्वसंकाशाः+तत्र देवगन्धर्वैः संकाशाः B.C. न्यवसन् Imp III P. वस् wiih नि रामे गते lo. ab. पुत्रशोकेन आतुरः T.C.

33) भरतः+वसिष्ठ प्रमुखैः+द्विजैः वसिष्ठः प्रमुखे येषाम् B.C. जगाम R. perf III S. विलपन् लप् with वि तस्मिन् मृते lo ab.

34) न+ऐच्छत्+राज्यम् वीरः+रामपादं महत् बलम् यस्य B.C. नियुज्यमानः passive pre P. युज्+नि ऐच्छत् Imp III S. इच्छ् रामपादौ एव प्रसादः यस्य B.C.

35) अयाचत्+भारतम् रामम्+आर्यभाव सत्यः पराक्रमः यस्य B.C. आर्यभावः पुरस्कृतः येन: B.C. गत्वा I.P.P. गम् अयाचत् Inp III S.

36) त्वम्+एव वचः+अब्रवीत् रामः+अपि शोभनंमुखं यस्य B.C सुमहत् यशः यस्यः B.C. परमः च असौ उदारः K.C. धर्मस्य ज्ञः T.C. अब्रवीत् Inp III. S

37) च+ऐच्छत पितुः+आदेशात्+राज्यं च+अस्य महत् बलम् यस्य B.C. दत्वा I.P.P. दा

38) ततः+भरतम् कामम्+अनवाप्य+एव रामपादौ+उपस्पृशन् निवर्तयामास pre perft III S. वर्त् with नि भरतस्य अग्रजः T.C रामस्य पादौ T.C. अनवाप्य I.P.P. आप् अव (T.C) उपस्पृशन् pre P. स्पृश् with उप.

39) नन्दिग्रामे+अक रोत+राज्यम् रामागमनस्य कांक्षा T.C. भरते गते lo ab जितानि इन्द्रियाणियेन B.C.

40) रामः+तु+पुनः आलक्ष्य तत्+आगमनम्+एका आलक्ष्य I.P.P. लक्ष्+आ प्रविवेश R. Perf III S. विश् with प्र

41) प्रविश्य I.PP. विश्+प्र हत्वा I.P.P. हन् ददर्श R. pref दृश् राजीवे इव लोचने यस्य सः B.C. विराधः (அரக்கன்) விராதன்

42) च+अपि+अगस्त्यम् अगस्त्यवचनात्+च+एव जग्राह+ऐन्द्रम् अगस्त्यस्य भ्रातरम् T.C. अगस्त्यस्य वचनात् T. C

खड्गं च परमप्रीतस्तूणी चाक्षयसायकौ ॥
वसतस्तस्य रामस्य वने वनचरैः सह ॥ 43

ऋषयोऽभ्यागमन् सर्वे वधायासुरराक्षसाम् ।
स तेषां प्रतिशुश्राव राक्षसानां तथा वने । 44

प्रतिज्ञातश्च रामेण वधः संयति रक्षसाम् ।
ऋषीणामग्निकल्पानां दण्डकारण्यवासिनाम् ॥ 45

तेन तत्रैव वसता जनस्थाननिवासिनी ।
विरूपिता शूर्पणखा राक्षसी कामरूपिणी ॥ 46

ततः शूर्पणखावाक्यादुद्युक्तान् सर्वराक्षसान् ।
खरं त्रिशिरसं चैव दूषणम् चैव राक्षसम् ॥ 47

निजघान रणे रामस्तेषां चैव पदानुगान् ।
वने तस्मिन् निवसता जनस्थाननिवासिनाम् ॥ 48

रक्षसां निहतान्यासन् सहस्राणि चतुर्दश ।
ततो ज्ञातिवधं श्रुत्वा रावणः क्रोधमूर्छितः ॥ 49

सहायं वरयामास मारीचं नाम राक्षसम् ।
वार्यमाणः सुबहुशो मारीचेन स रावणः 50

न विरोधो बलवता क्षमो रावण तेन ते ।
अनादृत्य तु तद्वाक्यं रावणः कालचोदितः ॥ 51

जगाम सहमारीचस्तस्याश्रमपदं तदा ।
तेन मायाविना दूरमपवाह्य नृपात्मजौ ॥ 52

जहार भार्यां रामस्य गृध्रं हत्वा जटायुषम् ।
गृध्रं च निहतं दृष्ट्वा हृतां श्रुत्वा च मैथिलीम् ॥ 53

राघवः शोकसंतप्तो विललापाकुलेन्द्रियः ।
ततस्तेनैव शोकेन गृध्रं दग्ध्वा जटायुषम् ॥ 54

मार्गमाणो वने सीतां राक्षसं संददर्श ह ।
कबन्धं नाम रूपेण विकृतं घोरदर्शनम् ॥ 55

तं निहत्य महाबाहुर्ददाह स्वर्गतश्च सः ।
स चापि कथयामास शबरीं धर्मचारिणीं ॥ 56

श्रमणीं धर्मनिपुणामभिगच्छेति राघवम् ।
सोऽभ्यगच्छन्महातेजाः शबरीं शत्रुसूदनः ॥ 57

43) परमप्रीतः+तूणी च+अक्षयसायकौ वसतः+तस्य अक्षयाः सायकाः ययोः तौ B.C. वसतः pre. वस् तूणी=அம்பாத்தூணிகள்

44) ऋषयः+अभ्या वधाय+असुररक्षसाम् असुराश्च रक्षांसि च D.C. अभ्यागमन् Aio. III P. गम् with अभि प्रतिशुश्राव per. III S. श्रु to hear.+प्रति

45) प्रतिज्ञातः+च दण्डकारण्ये वासिनः T.C. प्रतिज्ञातः P.P.P. ज्ञा+प्रति संयति=போரில்

46) तत्+एव वसता pre. p. वस् कामम् रूपम् यस्याः B.C.

47) वाक्यात्+उद्युक्तान् च+एव सर्वे च ते राक्षसाश्च K.C. त्रीणि शिरांसि यस्य B.C. शूर्पनखायाः वाक्यम् T.C दूषण, त्रिशिरस्=அரக்கரின்பெயர்கள்

48) रामः+तेषाम् निजघान R. perf. III S. हन् with नि पद अनुगाः तान् T.C. जनस्थाने निवासिनः T.C.

49) निहतानि+आसन् ज्ञातीनां वधम् T.C. क्रोधेन मूर्च्छितः आसन् In. III P. श्रुत्वा I.P.P. श्रु

50) वरयामास perft. III S. वृ वार्यमाण pass. pre. P.

51) क्षमः+रावण अनादृत्य I.P.P. दृ with अ (T.C.) तस्य वाक्यम् T.C. कालेन चोदितः T.C.

52) सहमारीचः+तस्य+आश्रमपदम् दूरम्+अपवाह्य जगाम R. perft. III S. मारीचेन सह वर्तते B.C. आश्रमस्य पदम् T.C.

53) जहार R. perft. III S. हृ to take. हृत्वा I.P.P. हन् निहतम् P.P.P. हन् with नि हृतम् P.P.P. हृ

54) संतप्तः+विललाप+आकुलेन्द्रियः ततः+तेन+एव शोकेन संतप्तः T.C. आकुलानि इन्द्रियाणि यस्य सः B.C. विललाप R. perft. III S. लप् with वि दग्ध्वा I.P.P. दह

55) मार्गमाणः+वने ससंदर्श R. perft. III S. दृश् with सम् घोरं दर्शनम् यस्य B.C. मार्गमाणः per. P. मार्ग to seek. कबन्ध=கபந்தன்என்னும் அரக்கன்

56) महाबाहुः+ददाह खेचरः+च च+अपि महान्तौ बाहू यस्य B.C. धर्मस्य चारिणीम् T.C. निहत्य I.P.P. हन्+नि ददाह R. perft III S. दह कथयामास perft. (peri) III S. कथ् शबरी=சபரிஎன்னும் கிழவி

57) धर्मनिपुणाम्+अभिगच्छ+इति सः+अभ्यगच्छत्+महातेजाः अभिगच्छ Imper. II S. गम् with अभि शत्रूणाम् सूदनः T.C. श्रमणी=சன்னியாசினி

शबर्या पूजितः सम्यग्रामो दशरथात्मजः ।
पम्पातीरे हनुमता संगतो वानरेण ह ॥ 58

हनुमद्वचनाच्चैव सुग्रीवेण समागतः ।
सुग्रीवाय च तत्सर्वं शंसद्रामो महाबलः ॥ 59

आदितस्तद्यथावृत्तं सीतायाश्च विशेषतः ।
सुग्रीवश्चापि तत्सर्वं श्रुत्वा रामस्य वानरः ॥ 60

चकार सख्यं रामेण प्रीतश्चैवाग्निसाक्षिकम् ।
ततो वानरराजेन वैरानुकथनं प्रति ॥ 61

रामायावेदितं सर्वं प्रणयाद्दुःखितेन च ।
प्रतिज्ञातं च रामेण तदा वालिवधं प्रति ॥ 62

वालिनश्च बलं तत्र कथयामास वानरः ।
सुग्रीवः शङ्कितश्चासीन्नित्यं वीर्येण राघवे ॥ 63

राघवप्रत्ययार्थं तु दुन्दुभेः कायमुत्तमम् ।
दर्शयामास सुग्रीवो महापर्वतसंनिभम् 64

उत्स्मयित्वा महाबाहुः प्रेक्ष्य चास्थि महाबलः ।
पादाङ्गुष्ठेन चिक्षेप संपूर्णं दशयोजनम् ॥ 65

बिभेद च पुनः सालान् सप्तैकेन महेषुणा ।
गिरिं रसातलं चैव जनयन् प्रत्ययं तदा ॥ 66

ततः प्रीतमनास्तेन विश्वस्तः स महाकपिः ।
किष्किन्धां रामसहितो जगाम च गुहां तदा ॥ 67

ततोऽगर्जद्धरिवरः सुग्रीवो हेमपिङ्गलः ।
तेन नादेन महता निर्जगाम हरीश्वरः ॥ 68

अनुमान्य तदा तारां सुग्रीवेण समागतः ।
निजघान च तत्रैनं शरेणैकेन राघवः ॥ 69

ततः सुग्रीववचनाद्धत्वा वालिनमाहवे ।
सुग्रीवमेव तद्राज्ये राघवः प्रत्यपादयत् ॥ 70

स च सर्वान् समानीय वानरान् वानरर्षभः ।
दिशः प्रस्थापयामास दिदृक्षुर्जनकात्मजाम् ॥ 71

ततो गृध्रस्य वचनात् संपातेर्हनुमान् बली ।
शतयोजनविस्तीर्णं पुप्लुवे लवणार्णवम् ॥ 73

तत्र लङ्कां समासाद्य पुरीं रावणपालिताम् ।
ददर्श सीतां ध्यायन्तीमशोकवनिकां गताम् 73

58) सम्यक्+रामः दशरथस्य आत्मजः T·C· पूजितः P·P·P पूज् पम्पा=பம்பாநதி

59) हनुमद्वचनात्+च+एव शंसत+रामः हनूमतः वचनात् T·C. शंसद् pre P· समागतः P·P P. गम् with सम् and आ

60) आदितः+तत्+यथावृत्तम् सीतायाः+च सुग्रीवः+च+अपि श्रुत्वा I·PP· श्रु

61) प्रीतः+च+एव+अग्निसाक्षि अग्निः साक्षी यस्मिन् B·C· वानराणां राजा T·C· वैरस्य अनुकथनम् T·C· चकार R· perf I.I S·

62) रामाय+आवेदितं प्रणयात्+दुःखितेत वालिनः वधम् T.C. आवेदितम् P·P·P· ज्ञा with प्रति

63) वालिनः+च शङ्कितः+च+आसीत्+नित्यम् कथयामास pre perft III S· कथ् शङ्कितः P·P·P· शङ्कृ आसीत् III S·

64) कार्यम् उत्तमम् राघवस्य प्रत्ययार्थम् T·C· महापर्वत सन्निभः T·C· दर्शयामास pre prefe III S· दृश् to see

65) च+अस्थि महान्तौ बाहू यस्य B·C· महत् बलम् यस्य B.C पादस्य अङ्गुष्ठेन T·C· उत्स्मयित्वा I·P·P· स्मि with उद् प्रेक्ष्य IP.P ईक्ष् with प्र चिक्षेप R. pref III S·

66) सप्त+एकेन च+एव
महान् च असौ इषुश्च K·C· बिभेद R· perf III· S· जनयन् pre P

67) प्रीतमनाः+तेन रामसहितः+जगाम प्रीतं मनः यस्य B.C· महांश्चासौकपिश्च K·C. रामेण सहितः T·C· जगाम R· prefe III S

68) ततः +अगर्जत्+हरिवरः हरीणाम् वरः T·C· हरीणाम् ईश्वरः T·C· अगर्जत् Impf III S·

69) तत्र+एनम् शरेण+एकेन अनुमान्य I·P·P· मान् with अनु नि जघान R· pref I.I. S· हन् with नि

70) सुग्रीवस्य वचन त् T·C. हत्वा I·P.P हन् आहवे=போரில்

71) दिदृक्षुः+जनकात्म समानीय I·P·P. नयू+सम् आ

72) संपातेः+हनुमान् पुप्लुवे R· peref IIIS.

73) ध्यायन्तीम+अशोक रावणेन पालिताम् T·C, ददर्श perf III S सामासाद्य I·P·P· सद् with सम् and आ

निवेदयित्वाभिज्ञानं प्रवृत्तिं च निवेद्य च ।
समाश्वास्य च वैदेहीं मर्दयामास तोरणम् ॥ 74
पञ्च सेनाग्रगान् हत्वा सप्त मन्त्रिसुतानपि ।
शूरमक्षं च निष्पिष्य ग्रहणं समुपागमत् ॥ 75
अस्त्रेणोन्मुक्तमात्मानं ज्ञात्वा पैतामहाद्वरात् ।
मर्षयन् राक्षसान् वीरो यन्त्रिणस्तान् यदृच्छया ॥ 76
ततो दग्ध्वा पुरीं लङ्कामृते सीतां च मैथिलीम् ।
रामाय प्रियमाख्यातुं पुनरायान्महाकपिः ॥ 77
सोऽभिगम्य महात्मानं कृत्वा रामं प्रदक्षिणम् ।
न्यवेदयदमेयात्मा दृष्टा सीतेति तत्त्वतः ॥ 78
ततः सुग्रीवसहितो गत्वा तीरं महोदधेः ।
समुद्रं क्षोभयामास शरैरादित्यसंनिभैः ॥ 79
दर्शयामास चात्मानं समुद्रः सरितां पतिः ।
समुद्रवचनाच्चैव नलं सेतुमकारयत् ॥ 80
तेन गत्वा पुरीं लङ्कां हत्वा रावणमाहवे ।
रामः सीतामनुप्राप्य परां व्रीडामुपागमत् ॥ 81
तामुवाच ततो रामः परुषं जनसंसदि ।
अमृष्यमाणा सा सीता विवेश ज्वलनं सती ॥ 82
ततोऽग्निवचनात् सीतां ज्ञात्वा विगतकल्मषाम् ।
बभौ रामः संप्रहृष्टः पूजितः सर्वदैवतैः ॥ 83
कर्मणा तेन महता त्रैलोक्यं सचराचरम् ।
सदैवर्षिगणं तुष्टं राघवस्य महात्मनः ॥ 84
अभिषिच्य च लङ्कायां राक्षसेन्द्रं विभीषणम् ।
कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह ॥ 85
देवताभ्यो वरं प्राप्य समुत्थाप्य च वानरान् ।
अयोध्यां प्रस्थितो रामः पुष्पकेण सुहृद्वृतः ॥ 86
भरद्वाजाश्रमं गत्वा रामः सत्यपराक्रमः ।
भरतस्यान्तिकं रामो हनुमन्तं व्यसर्जयत् ॥ 87
पुनराख्यायिकां जल्पन् सुग्रीवसहितस्तदा ।
पुष्पकं तत् समारुह्य नन्दिग्रामं ययौ तदा ॥ 88

74) निवेदयित्वा+अभि मर्दयामास pre (perft) III S मर्द् to kill निवेद्य I·P.P. विद्+नि निवेदयित्वा I·PP· (Cau) वैदेही

75) मन्त्रिसुतान्+अपि शूरम्+अक्षम सेनाग्रे गान् T.C· मन्त्रिणः सुतान् T.C. समुपागमन् Aio III· S· गम् with सम्+उप+आ निहिंस्य I·P·P· हिंस् with निस्

76) अस्त्रेण+उन्मुक्तम+आत्मानम् पैतामहात+वरात् यन्त्रिणः+तान् मर्षयन् pre P· ज्ञात्वा I·P·P· ज्ञा

77) लङ्काम्+ऋते प्रियम+आख्यातुम् पुनः+आयात्+महा दत्त्वा I·P·P· दद् आख्यातुम् Infi ख्या with आ महांश्चासौ कापश्च K.C आयात् Imp III S·

78) सः+अभिगम्य न्यवेदयत्+अमेयात्मा सीता+इति अमेयः आत्मा यस्य B.C· अभि गम्य I·P·P· गम् अभि न्यवेदयत् Impf III S· विद् with नि दृष्ट्वा, कृत्वा· I·P·P·

79) शरैः+आदित्य क्षोभयामास Pre (perf) III S क्षुभ् आदित्यस्य सन्निभाः T.C· सुग्रीवेण सहितः T·C·

80) च+आत्मानम् समुद्रवचनात्+च+एव सेतुम्+अकारयत् अकारयत् (Cau) Impf III S· दर्शयामास pre preft

81) रावणम्+आहवे सीताम्+अनुप्राप्य व्रीडाम्+उपागमत् आहवे=போரில் हत्वा I·P·P· हन् अनुप्राप्य I.P.P आप् wiih अनु and प्र इपागमत् Aio III S· गम्+उप

82) ताम्+उवाच उवाच S· Perf III S· विवेश· R· pref III S

83) ततः+अग्निवचनात् अग्नेः वचनात् T·C विगत- कल्मषः यस्याः B·C बभौ R· perft III S· ज्ञात्वा I·P·P· संप्रहृष्टः P.P·P· हृष् with सम् प्र

84) चराचरैः सह वर्तते इति तथा B·C· तुष्टम् P·P.P· तुष्

85) कृतकृत्यः+तदा कृतम् कृत्यं येन B C· राक्षसानां इन्द्रम् T·C अभिषिच्य I·P·P. सिच् with अभि

86) प्राप्य I·P·P· आप् with प्र समुत्थाप्य Cau I·P·P. स्था with सम्, उद् सुहृद्भिः वृतः T·C.

87) भरतस्य+अन्तिकं भरद्वाजस्य आश्रमः T·C· सत्यः पराक्रमः यस्य B·C· व्यसर्जयत् Impft III S· सृज् with वि

88) सहितः तदा जग्मुः pre जग्मुः सुग्रीवेण सहितः T·C· समारुह्य I.P·P· रुह् with सम् and आ ययौ R· perft III S·

नन्दिग्रामे जटां हित्वा भ्रातृभिः सहितोऽनघः !
रामः सीतामनुप्राप्य राज्यं पुनरवाप्तवान् !! 89
प्रहृष्टमुदितो लोकस्तुष्टः पुष्टः सुधार्मिकः !
निरामयो ह्यरोगश्च दुर्भिक्षभयवर्जितः !! 90
न पुत्रमरणं केचिद्द्रक्ष्यन्ति पुरुषाः क्वचित !
नार्यश्चाविधवा नित्यं भविष्यन्ति पतिव्रताः !! 91
न चाग्निजं भयं किञ्चिन्नाप्सु मज्जन्ति जन्तवः !
न वातजं भयं किञ्चिन्नापि ज्वरकृतं तथा !! 92
न चापि क्षुद्भयं तत्र न तस्कर भयं तथा !
नगराणि च राष्ट्राणि धनधान्ययुतानि च !! 93
नित्यं प्रमुदिताः सर्वे यथा कृतयुगे तथा !
अश्वमेधशतैरिष्ट्वा तथा बहुसुवर्णकैः !! 94
गवां कोट्ययुतं दत्वा विद्वद्भ्यो विधिपूर्वकम् !
असङ्ख्येयं धनं दत्वा ब्राह्मणेभ्यो महायशाः !! 95
राजवंशाञ्शतगुणान् स्थापयिष्यति राघवः !
चातुर्वर्ण्यं च लोकेऽस्मिन् स्वे स्वे धर्मे नियोक्ष्यति !! 96
दश वर्षसहस्राणि दश वर्षशतानि च !
रामो राज्यमुपासित्वा ब्रह्मलोकं प्रयास्यति !! 97
इदं पवित्रं पापघ्नं पुण्यं वेदैश्च संमितम् !
यः पठेद्रामचरितं सर्वपापैः प्रमुच्यते !! 98
एतदाख्यानमायुष्यं पठन् रामायणं नरः !
सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे महीयते !! 99
पठन् द्विजो वागृषभत्वमीयात् स्यात् क्षत्रियो
भूमिपतित्वमीयात् !
वणिग्जनः पण्यफलत्वमीयाज्जनश्च शूद्रोऽपि
महत्वमीयाम् !! 100

॥ इति वाल्मीकिरामायणे बालकाण्डे प्रथमः सर्गः ॥

द्वितीयः सर्गः

॥ ब्रह्मागमनम् ॥

नारदस्य तु तद्वाक्यं श्रुत्वा वाक्यविशारदः !
पूजयामास धर्मात्मा सहशिष्यो महामुनिः !! 1
यथावत् पूजितस्तेन देवर्षिर्नारदस्तदा !
आपृच्छ्यचाभ्यनुज्ञातः स जगाम विहायसम् !! 2

89) सहितः+अनघः सीताम्+अनुप्रप्य पुनः+अवाप्तवान् हित्वा I.P.P. हा अनुप्राप्य I.P.P. आप with अनु+प्र आवाप्तवान् P.A.P.

90) लोकः+तुष्टः हि+अरोगः+च प्रहृष्टं मुदितः T.C. दुर्भिक्ष भयाभ्यां वर्जितः T.C.

91) नार्यः+च+अविधवाः पुत्रस्य मरणम् T.C. भविष्यन्ति II F भू to be III P. द्रक्ष्यन्ति II F दृश् to see III P.

92) न+च+अग्निजम् किञ्चित्+न+अप्सु किञ्चित् न अपि वातात् जम् T.C. ज्वरेण कृतम् T.C. मज्जन्ति pre III P. मज्ज्

93) धनधान्यैः युतानि T.C. क्षुधः भयम् T.C

94) अश्वमेधशतैः + इष्ट्वा प्रमुदिताः P.P.P. मुद् with प्र अश्वमेधानाम् शतैः T.C. इष्ट्वा I.P.P. यज्

95) ब्राह्मणेभ्यः+महा महत यशः यस्य B.C. दत्वा I.P.P. दा to give न संख्येयम् T,C. कोटीनाम् अयुतम् T.C.

96) राजवंशान्+शतगुणान् लोके+अस्मिन् स्थापयिष्यति II F स्था to stand III S. (cau) नियोक्ष्यति II F III S. युज् with नि

97) राज्यम्+उपासित्वा वर्षाणाम् सहस्राणि T. C. वर्षाणाम् शतानि T.C. उपासित्वा I.P.P. आस् with उप

98) वेदैः+च पठेत्+रामचरितम् पापस्य घ्नम् T. C. सर्वाणि च तानि पापानि च K.C. प्रमुच्यते passi. III S. मुच्

99) एतत+आख्यानम+आयुष्यम् आख्यानम् कथा पठन् pre P. पठ् प्रेत्य I.P.P. इ with प्र पुत्रपौत्रैः सहवर्तते B.C. महीयते pre III S. मह्

100) वागृषभत्वम्+ईयात् भूमिपतित्वम्+ईयात् फलत्वम्+ईयात्+जनः+च शूद्रः+अपि महत्वम्+इयात् वणिक् चासौ जनश्च K.C. भूमेः पतित्वम् T.C. ईयात् pot III S. इ

1) श्रुत्वा I.P.P. श्रु to hear पूजयामास pre perf III S. पूज् to धर्मः आत्मा यस्य B.C. शिष्यैः सह वर्तते B.C. महान् चासौ मुनिश्च K.C. वाक्यस्य विशारदः T.C.

2) पूजितः+तेन देवर्षिः+नारदः+तदा आपृच्छ्य+एव+अभ्यनुज्ञातः जगाम R.perf III S. आपृच्छ्य I.P.P. पृच्छ् with आ

स मुहूर्तं गते तस्मिन् देवलोकं मुनिस्तदा ।
जगाम तमसातीरं जाह्नव्यास्तु विदूरतः ॥ 3

स तु तीरं समासाद्य तमसाया मुनिस्तदा ।
शिष्यमाह स्थितं पार्श्वे दृष्ट्वा तीर्थमकर्दमम् ॥ 4

अकर्दममिदं तीर्थं भरद्वाज निशामय ।
रमणीयं प्रसन्नाम्बु सन्मनुष्यमनो यथा ॥ 5

न्यस्यतां कलशस्तात दीयतां वल्कलं मम ।
इदमेवावगाहिष्ये तमसातीर्थमुत्तमम् ॥ 6

एवमुक्तो भरद्वाजो वाल्मीकेन महात्मना ।
प्रायच्छत मुनेस्तस्य वल्कलं नियतो गुरोः ॥ 7

स शिष्यहस्तादादाय वल्कलं नियतेन्द्रियः ।
विचचार ह पश्यंस्तत् सर्वतो विपुलं वनम् ॥ 8

तस्याभ्याशे तु मिथुनं चरन्तमनपायिनम् ।
ददर्श भगवांस्तत्र क्रौञ्चयोश्चारुनिःस्वनम् ॥ 9

तस्मात्तु मिथुनादेकं पुमांसं पापनिश्चयः ।
जघान वैरनिलयो निषादस्तस्य पश्यतः ॥ 10

तं शोणितपरीताङ्गं चेष्टमानं महीतले ।
भार्या तु निहतं दृष्ट्वा रुराव करुणं गिरम् ॥ 11

वियुक्ता पतिना तेन द्विजेन सहचारिणा ।
ताम्रशीर्षेण मत्तेन पत्रिणा च हितेन वै ॥ 12

तथाविधं द्विजं दृष्ट्वा निषादेन निपातितम् ।
ऋषेर्धर्मात्मनस्तस्य कारुण्यं समपद्यत ॥ 13

ततः करुणवेदित्वादधर्मोऽयमिति द्विजः ।
निशाम्य रुदतीं क्रौञ्चीमिदं वचनमब्रवीत् ॥ 14

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ 15

तस्यैवं ब्रुवतश्चिन्ता बभूव हृदि वीक्षतः ।
शोकार्तेनास्य शकुनेः किमिदं व्याहृतं मया ॥ 16

चिन्तयन् महाप्राज्ञश्चकार मतिमान् मतिम् ।
शिष्यं चैवाब्रवीद्वाक्यमिदं स मुनिपुंगवः ॥ 17

3) मुनिः+तदा जाह्न्याः+तु तमसायाः तीरम् T·C· जगाम R· perft· III S. तस्मिन् गते lo ab·

4) शिष्यम्+आह तीर्थम्+अकर्दमम् न विद्यते कर्दमः यस्मिन् तत् अकर्दमम् T·C. आह pre. III S ब्रू समासाद्य I·P·P सद् with सम् and आ दृष्ट्वा I.P·P· दृश्

5) अकर्दमम्+इदम् सन्मनुष्यमनः+यथा प्रसन्नम् अम्बु यस्य तत् प्रसन्नाम्बु B·C· निशामय Imp II S· शम् with नि

6) कलशः+तात इदम्+एव+अवगा तमसातीर्थम्+उत्तमम् न्यस्यताम् Impve pass III S· अस्+नि दीयताम् pass Impve III S· अव गाहिष्ये II Fut गाह् with अव

7) एवम्+उक्तः मुनेः+तस्य. नियतः प्रायच्छत I npft III S· यच्छ् उक्तः P·P·P· वच्

8) शिष्यहस्तात्+आदाय पश्यन्+तत्+सर्वतः शिष्यस्य हस्त T.C नियतानि इन्द्रियाणि यस्य सः नियतेन्द्रियः B·C· वि चचार R· perf III S पश्यन् pre P· पश्यू

9) तस्य+अभ्याशे चरन्तम्+अनपायिनम् भगवान्+तत्र क्रौञ्चयोः+चारु चरन्तम् pre P· चर्

10) तस्मात्+तु मिथुनात् एकम् वैरनिलयः+निषादः+तस्य जघान R· perft· III S हन् to kill· वैरस्य निलयः T·C· पश्यतः Pre P·

11) शोणितेन परीतानि अङ्गानि यस्य तम् B·C· निहतम् P·P·P· हन्+नि रुराव R· perft· III S रू

12) वियुक्ता P·P·P· युज् with वि ताम्रं शीर्षं यस्य B·C

13) ऋषेः+धर्मात्मनः+तस्य दृष्ट्वा I.P·P. दृश् निपातितम् Cau P.P·P· पत् to fall with नि समपद्यत Impft· III S. पद् with सम्

14) वेदित्वात्+अधर्मः+अयम्+इति क्रौञ्चम्+इदम् वचनम्+ अब्रवीत् रुदती pre P· रुद् निशाम्य I.P·P· शम्+नि

15) त्वम्+अगमः यत्+क्रौञ्चमिथुनात्+एकम्+अवधीः Aio II S हन् (वध्) कामेनमोहितम् T·C· अगमः Aio II S गम्

16) तस्य+एवम्+ब्रुवतः+चिन्ता शोकार्तेन+अस्य ब्रुवतः per P व्याहृतम् P·P·P. हृ+वि आ

17) महाप्राज्ञः+चकार च+एव+अब्रवीत्+वाक्यम्+इदम् चिन्तयन् pre P· चकार R· perft III S कृ

पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः ।
शोकार्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा ॥ 18

शिष्यस्तु तस्य श्रुवतो मुनेर्वाक्यमनुत्तमम् ।
प्रतिजग्राह संहृष्टस्तस्य तुष्टोऽभवद्गुरुः ॥ 91

सोऽभिषेकं ततः कृत्वा तीर्थे तस्मिन् यथाविधि ।
तमेव चिन्तयन्नर्थमुपावर्तत वै मुनिः ॥ 20

भरद्वाजस्ततः शिष्यो विनीतः श्रुतवान् गुरोः ।
कलशं पूर्णमादाय पृष्ठतोऽनुजगाम ह ॥ 21

स प्रविश्याश्रमपदं शिष्येण सह धर्मवित् ।
उपविष्टः कथाश्चान्याश्चकार ध्यानमास्थितः । 22

आजगाम ततो ब्रह्मा लोककर्ता स्वयं प्रभुः ।
चतुर्मुखो महातेजा द्रष्टुं तं मुनिपुंगवम् ॥ 23

वाल्मीकिरथ तं दृष्ट्वा सहसोत्थाय वाग्यतः ।
प्राञ्जलिः प्रणतो भूत्वा तस्थौ परमविस्मितः ॥ 24

पूजयामास तं देवं पाद्यार्घ्यासनवन्दनैः ।
प्रणम्य विधिवच्चैनं पृष्ट्वा चैवाप्यनामयम् ॥ 25

अथोपविश्य भगवानासने परमार्चिते ।
वाल्मीकये च ऋषये संदिदेशासनं ततः ॥ 26

ब्रह्मणा समनुज्ञातः सोऽप्युपाविशदासने ।
उपविष्टे तदा तस्मिन् साक्षाल्लोकपितामहे ॥ 27

तद्गतेनैव मनसा वाल्मीकिर्ध्यानमास्थितः ।
पापात्मना कृतं कष्टं वैरग्रहणबुद्धिना ॥ 28

यस्तादृशं चारुरवं क्रौञ्चं हन्यादकारणात् ।
शोचन्नेव मुहुः क्रौञ्चीमुपश्लोकमिमं पुनः ॥ 29

जगावन्तर्गतमना भूत्वा शोकपरायणः ।
तमुवाच ततो ब्रह्मा प्रहस्य मुनिपुंगवम् ॥ 30

श्लोक एव त्वया बद्धो नात्र कार्या विचारणा ।
मच्छन्दादेव ते ब्रह्मन् प्रवृत्तेयं सरस्वती । 31

रामस्य चरितं कृत्स्नं कुरु त्वमृषिसत्तम ।
धर्मात्मनो गुणवतो लोके रामस्य धीमतः ॥ 32

18) पादबद्धः+अक्षर समः+तन्त्रीलय अ+अन्यथा पादैः बद्धः T·C· तन्त्रीलयेन समन्वितः T·C· भवतु Impve III S

19) शिष्यः+तु मुनेः+वाक्यम्+अनु संहृष्टः+यस्य+तुष्टः+अभवत्+गुरुः ब्रुवतः pre P. ब्रू प्रतिजग्राह R· perft III S· ग्रह् with प्रति संहृष्टः I·PP· हृष् तुष्टः ·P·PP· तुष्

20) सः+अभिषेकम तम्+एव+चिन्तयन्+अर्थम्+उपावर्तत: चिन्तयन् Pre P. उपावर्तत Impf III S· वृत् with उप

21) भरद्वाजः+ततः पूर्णम्+आदाय+पृष्ठतः+अनुजगाम विनीतः P·P P नी+वि श्रुतवान् P.A.P श्रु आदाय I·P·P. दा+आ अनु जगाम R· perft III S गम् with अनु

22) प्रविश्य+आश्रम कथा+च+अन्याः+चकार+ध्यानम् प्रविश्य I.P·P विश्+प्र उपविष्टः P·P.P विश् उप चकार R perft III S कृ

23) लोकानां कर्ता T·C· चत्वारि मुखानि यस्य B·C महत् तेजः यस्य B.C· आजगाम R· pref III S गम् द्रष्टुम् Infini दृश्

24) वाल्मीकिः+अथ सहसा+उत्थाय उत्थाय I·P·P· स्था उद् प्रणतः P.P·P नम्+प्र तस्थौ R· perf· III S·

25) विधिवत्+च·एनम् च+एव+अपि+अनामय पूजयामास per. perf· III S· पूज् प्रणम्य I·P.P· नम्+प्र पृष्ट्वा I·P·P· पृच्छ् पाद्यञ्च अर्घ्यञ्च आसनञ्च वन्दनञ्च पाद्यार्घ्यासनवन्दनैः D C·

26) अथ+उपविश्य भगवान्+आसने संदिदेश+आसनम् उपविश्य I.P·P· विश् with उप संदिदेश R· perf· III S· परमार्चिते= சிறந்த

27) सः+अपि+उपा विशत्+आसने साक्षात्+लोकपिता समनुज्ञातः P P·P· ज्ञा with सम् and अनु उपाविशत् Imp· III S· विश् with उप तस्मिन् उपविष्टे Lo· Ab· लोकानाम् पितामहः T·C·

28) गतेन+एव ध्यानम्+आस्थितः वाल्मीकिः+ध्यानम् तस्मिन् गतम् T·C· पापः आत्मा यस्य B·C· वैरग्रहणा बुद्धिः यस्य B,C.

29) यः+तादृशम् हन्यात्+अकारणात् शोचन्+एव क्रौञ्चीम्+उप श्लोकम्+इमम् चारुः रवः यस्य तं B C· हन्यात् pot· III S· हन् शोचन् pre· P. शुच्

30) जगौ+अन्तर्गत तम्+उवाच अन्तर्गत मनः यस्य B·C· शोक परायणः T·C· उवाच S· perf· II S· वच् महत्य I·P·P· हस्+प्र

31) बद्धः P·P·P· बन्ध् प्रवृत्ता P·P·P· वृत्+प्र न+अत्र, प्रवृत्ता +इयम्

32) त्वम्+ऋषिसत्तम कुरु Imper· IInd· S. कृत्स्नम् முழுவதும்

वृत्तं कथय वीरस्य यथा ते नारदाच्छ्रुतम् !
रहस्यं च प्रकाशं च यद्वृत्तं तस्य धीमतः !! 33

रामस्य सहसौमित्रेः राक्षसानां च सर्वशः !
वैदेह्याश्चैव यद्वृत्तं प्रकाशं यदि वा रहः !! 34

यच्चाप्यविदितं सर्वं विदितं ते भविष्यति !
न ते वागनृता काव्ये काचिदत्र भविष्यति !! 35

कुरु रामकथां पुण्यां श्लोकबद्धां मनोरमाम् !
यावत् स्थास्यन्ति गिरयः सरितश्च महीतले !! 36

तावद्रामायणकथा लोकेषु प्रचरिष्यति !
यावद्रामायणकथा त्वत्कृता प्रचरिष्यति !! 37

तावदूर्ध्वमधश्च त्वं मल्लोकेषु निवत्स्यसि !
इत्युक्त्वा भगवान् ब्रह्मा तत्रैवान्तरधीयत !! 38

ततः सशिष्यो भगवान् मुनिर्विस्मयमाययौ !
तस्य शिष्यास्ततः सर्वे जगुः श्लोकमिमं पुनः !! 39

मुहुर्मुहुः प्रीयमाणाः प्राहुश्च भृशविस्मिताः !
समाक्षरैश्चतुर्भिर्यः पादैर्गीतो महर्षिणा !! 40

सोऽनुव्याहरणाद् भूयः शोकः श्लोकत्वमागतः !
तस्य बुद्धिरियं जाता वाल्मीकेर्भावितात्मनः !!
कृत्स्नं रामायणं काव्यमीदृशैः करवाण्यहम् !! 41

उदारवृत्तार्थपदैर्मनोरमैस्ततः स रामस्य चकार कीर्तिमान् !
समाक्षरैः श्लोकशतैर्यशस्विनो यशस्करं
काव्यमुदारधीर्मुनिः !! 42

तदुपगतसमाससन्धियोगं सममधुरोपनतार्थवाक्यबन्धम् !
रघुवरचरितम् मुनिप्रणीतं दशशिरसश्च वधं
निशामयध्वम् !! 43

इति वाल्मीकिरामायणे बालकाण्डे द्वितीयः सर्गः

33) नारदात्+श्रुतम् कथय Imperve. II S. कथ् श्रुतम् P.P. श्रु

34) सहसौमित्रेः+रामस्य वैदेह्याः+च+एव सौमित्रिणा सह वर्तते B.C. विदितम् P.P.P. विद्

35) यत्+च+अपि+अविदितम् वाक्+अनृता काचित्+अत्र न विदितम् अविदितम् T.C. भविष्यति II F. III S. भू

35) सरितः+च कुरु Imperative. IInd. S. श्लोकैः बद्धम् T.C. रामस्य कथाम् T.C. मह्याः तलम् T.C. स्थास्यन्ति II F. III S. स्था

37) तावत्+रामायण यावत्+रामायण प्रचरिष्यति II F. III S. चर् with प्र त्वया कृता T.C. रामायणस्य कथा T.C.

38) तावत्+ऊर्ध्वम्+अधः+च इति+उक्त्वा तत्र+एव+अन्तर मम लोकेषु T.C. निवत्स्यति II F. III S. वस् with नि उक्त्वा I.P.P. वच् अन्तरधीयत

39) मुनिः+विस्मयम्+आययौ शिष्याः+ततः शोकम्+इमम् शिष्यैः सहवर्तते इति सशिष्यः B.C. आययौ R. peref. III S. या Io go+आ जगुः R. perf. III P. गा to sing.

40) प्राहुः+च समाक्षरैः+चतुर्भिः+यः+पादैः+गीतः प्रीयमाण pre. प्री प्राहुः pre. III P. ब्रू with प्र

41) सः+अनुव्याहरणात् शोकत्वम्+आगतः बुद्धिः+इयम् वाल्मीकेः+भाविता आगतः P.P.P. गम्+आ जाता P.P.P. जन् भावितः आत्मा यस्य B.C. काव्यम्+ईदृशैः करवाणि+अहम् करवाणि Imp. Ist. S. कृ to do. कृत्स्नम्=

42) पदैः+मनोरमैः+ततः, श्लोकशतैः+यशस्विनः काव्यम्+ उदारधीः+मुनिः उदारवृत्तार्थानि पदानि येषु तैः B.C. श्लोकानाम् शतानि तैः T.C. उदाराधीः यस्य B.C. चकार R. pref. I.I S. कृ

43) सम, मधुर, उपनत, अर्थ, वाक्य, बद्धम् दशशिरसः+च सममधुरोपनतार्थवाक्यैः बद्धम् T.C. रघुवरस्य चरितम् मुनिना प्रणीतम् T.C. निशामयध्वम् Imp. IInd. P. (Co)

॥ तृतीयः सर्गः ॥ ॥ काव्यसङ्क्षेपः ॥

श्रुत्वा वस्तु समग्रं तद्धर्मात्मा धर्मसंहितम् ।
व्यक्तमन्वेषते भूयो यद्वृत्तं तस्य धीमतः ॥ 1

उपस्पृश्योदकं सम्यङ्मुनिः स्थित्वा कृताञ्जलिः ।
प्राचीनाग्रेषु दर्भेषु धर्मेणावेक्षते गतिम् ॥ 2

रामलक्ष्मणसीताभी राज्ञा दशरथेन च ।
सभार्येण सरामेण यत् प्राप्तं तत्र तत्त्वतः ॥ 3

हसितं भाषितं चैव गतिर्या यच्च चेष्टितम् ।
तत्सर्वं धर्मवीर्येण यथावत् संप्रपश्यति ॥ 4

स्त्रीतृतीयेन च तथा यत्प्राप्तं चरता वने ।
सत्यसन्धेन रामेण तत्सर्वं चान्ववेक्षितम् ॥ 5

ततः पश्यति धर्मात्मा तत् सर्वं योगमास्थितः ।
पुरा यत्तत्र निर्वृत्तं पाणावामलकं यथा ॥ 6

तत्सर्वं तत्त्वतो दृष्ट्वा धर्मेण स महाद्युतिः ।
अभिरामस्य रामस्य चरितं कर्तुमुद्यतः ॥ 7

कामार्थगुणसंयुक्तं धर्मार्थगुणविस्तरम् ।
समुद्रमिव रत्नाढ्यं सर्वश्रुतिमनोहरम् ॥ 8

स यथा कथितं पूर्वं नारदेन महर्षिणा ।
रघुवंशस्य चरितं चकार भगवानृषिः ॥ 9

जन्म रामस्य सुमहद्वीर्यं सर्वानुकूलताम् ।
लोकस्य प्रियतां क्षान्तिं सौम्यतां सत्यशीलताम् ॥ 10

नानाचित्रकथाश्चान्या विश्वामित्रसमागमे ।
जानक्याश्च विवाहं च धनुषश्च विभेदनम् ॥ 11

रामरामविवादं च गुणान् दाशरथेस्तथा ।
तथा रामाभिषेकं च कैकेय्या दुष्टभावताम् ॥ 12

विघातं चाभिषेकस्य रामस्य च विवासनम् ।
राज्ञः शोकविलापं च परलोकस्य चाश्रयम् ॥ 13

प्रकृतीनां विषादं च प्रकृतीनां विसर्जनम् ।
निषादाधिपसंवादं सूतोपावर्तनं तथा ॥ 14

1) तत्+धर्मात्मा व्यक्तम्+अन्वेषते धर्मेण संहितम् T·C· धर्मः आत्मा यस्य B·C· श्रुत्वा I·P·P· श्रु

2) उपस्पृश्य+उदकम् सम्यक्+मुनिः धर्मेण+अवेक्षते प्राचीनानि अग्राणि येषाम् ते तेषु B·C. कृता अञ्जलिः येन B·C· उपस्पृश्य I·P·P· स्पृश्

3) रामश्च लक्ष्मणश्च सीता च ताभिः D·C· भार्यया सह वर्तते तेन B·C· रामेण सह वर्तते तेन B·C· प्राप्तम् P·P·P· आप्+प्र

4) गतिः+या, यत्+च हसितम् P·P·P· हस् भाषितम् P·P·P. भाष् संप्रपद्यति pre· III S· पद्य् withसम्+प्र

5) च+अन्ववेक्षितम् स्त्री तृतीयः यस्य B·C· प्राप्तम् P.P.P. आप्+प्र अन्ववेक्षितम् P·P·P. ईक्ष् with अनु and अव

6) योगम्+आस्थितः पाणौ+आमलकम् आस्थितः P·P·P. स्था+आ निर्वृत्तम् P.P·P· वृत्+निर्

7) कर्तुम्+उद्यतः दृष्ट्वा I·P·P· दृश् to see, महती द्युतिः यस्य B.C· उद्यतः P.P·P· यत् with उद्

समुद्रम्+इव कामार्थगुणैः संयुक्तम् T·C· धर्मार्थेगुणैः विस्तृतम् T·C· रत्नैः आढ्यं T·C· सर्वश्रुतीनाम् मनोहरम् T.C.

9) भगवान्+ऋषिः कथितम् P·P·P. कथ् महान् चासौ ऋषिश्च K·C· चकार R· perf· III S· कृ

10) सुमहत्+वीर्यम् सर्वेषाम् अनुकूलता ताम् T·C·

11) नानाचित्रकथाः+च+अन्याः जानकयाः+च धनुषः+च विश्वामित्रस्य समागमः तस्मिन् विश्वामित्रसमागमे T·C·

12) दाशरथेः+तथा कैकेय्याः+दुष्टभावताम् रामेण रामस्य विवादः रामराम विवादः T·C· दुष्टस्य भावताम् T·C· रामस्य अभिषेकम् T·C· केकयानाम् इयं कैकेयी दशरथस्य अयं दाशरथिः T·C·

13) च+अभिषेकस्य च+आश्रयम् शोकेन विलापः T·C·

14) निषादाधिपेन सवादः तम् T·C· सूतस्य उपावर्तनम् T·C·

प्रकृति = பிரஜைகள் प्रकृति = மந்திரிகள் निषाद् = வேடன்
निषादाधिप = வேடுவர்களின் தலைவன் குகன்

गङ्गायाश्चापि संतारं भरद्वाजस्य दर्शनम् ।
भरद्वाजाभ्यनुज्ञानाच्चित्रकूटस्य दर्शनम् ॥ 15
वास्तुकर्मविवेशं च भरतागमनं तथा ।
प्रसादनं च रामस्य पितुश्च सलिलक्रियाम् ॥ 16
पादुकाग्र्याभिषेकं च नन्दिग्रामनिवासनम् ।
दण्डकारण्यगमनं विराधस्य वधं तथा ॥ 17
दर्शनं शरभङ्गस्य सुतीक्ष्णेन समागमम् ।
अनसूयासहस्यां च अङ्गरागस्य चार्पणम् ॥ 18
दर्शनं चाप्यगस्त्यस्य धनुषो ग्रहणं तथा ।
शूर्पणखायाश्च संवादं विरूपकरणं तथा ॥ 19
वधं खरत्रिशिरसोरुत्थानं रावणस्य च ।
मारीचस्य वधं चैव वैदेह्या हरणं तथा ॥ 20
राघवस्य विलापं च गृध्रराजनिबर्हणम् ।
कबन्धदर्शनं चैव पम्पायाश्चापि दर्शनम् ॥ 21
शबरीदर्शनं चैव हनुमद्दर्शनं तथा ।
विलापं चैव पम्पायां राघवस्य महात्मनः ॥ 22
ऋश्यमूकस्य गमनं सुग्रीवेण समागमम् ।
प्रत्ययोत्पादनं सख्यं वालिसुग्रीवविग्रहम् ॥ 23
वालिप्रमथनं चैव सुग्रीवप्रतिपादनम् ।
ताराविलापं समयं वर्षरात्रनिवासनम् ॥ 24
कोपं राघवसिंहस्य बलानामुपसंग्रहम् ।
दिशः प्रस्थापनं चैव पृथिव्याश्च निवेदनम् । 25
अङ्गुलीयकदानं च ऋक्षस्य बिलदर्शनम् ।
प्रायोपवेशनं चापि संपातेश्चैव दर्शनम् ॥ 26
पर्वतारोहणं चैव सागरस्य च लङ्घनम् ।
समुद्रवचनाच्चैव मैनाकस्यापि दर्शनम् ॥ 27
राक्षसीदर्शनं चैव छायाग्राहस्य दर्शनम् ।
सिंहिकायाश्च निधनं लङ्कामलयदर्शनम् ॥ 28
रात्रौ लङ्काप्रवेशं च एकस्याथ विचिन्तनम् ।
आपान भूमिगमनमवरोधस्य दर्शनम् ॥ 29

15) गङ्गायाः+च+अपि अभ्यनुज्ञानात्+चित्र भरद्वाजस्य अभ्यनुज्ञानात् T.C. दर्शनम् V. Noun

16) पितुः+सलिलक्रियाम् वास्तुकर्म=வீடுகட்டுதல் विवेशम्=வசித்தல் सलिलस्य क्रिया T.C. सलिलक्रिया=இறந்தவருக்கு செய்யப்படும் சடங்கு

17) पादुकाभ्ययोः अभिषेकः दण्डकारण्यस्य गमनम् T.C.
18) च+अर्पणम्

19) च+अपि+अगस्त्यस्य धनुषः+ग्रहणम् शूर्पणखायाः+च विरूपस्यकरणम् T.C.

20) खरत्रिशिरसोः+उत्थानम्+च+एव+वैदेह्याः हरणम् Verbalnoun खरश्च त्रिशिराश्च D.C.

21) च+एव+पम्पायाः+च+अपि गृध्रराजस्य निबर्हणम् T.C. कबन्धस्य दर्शनम् T.C.

22) शबर्याः दर्शनम् T.C. हनूमतः दर्शनम् T.C.

23) वालिसुग्रीवयोः विग्रहम् T.C. प्रत्ययस्य उत्पादनम् T.C.

24) वालेः प्रमथनम् T.C, सुग्रीवस्य प्रतिपादनम् T.C. तारायाः विलापम् T.C. वर्षरात्रिषु निवासनम् वर्षरात्रनिवासनम् T.C. तारा=வாலியின் மனைவி

25) बलानाम्+उपसंग्रहम् पृथिव्याः+च राघवः सिंह इव K.C.

36) च+अपि संपातेः+च+एव अङ्गुलीयकस्य दानम् अङ्गुलीयकदानम् T.C.

27) समुद्रवचनात्+च+एव मैनाकस्य+अपि पर्वते आरोहणम् T.C. समुद्रस्य वचनात् T.C.

28) सिंहिकायाः+च राक्षस्याः दर्शनम् T.C. छायारूपः ग्राहः T.C. लङ्कामलयस्य दर्शनम् T.C एकस्य+अथ आपानभूमिगमनम्+ अवरोधस्य लङ्कायाः प्रवेशः लङ्काप्रवेशः T.C. आपानभूमेः गमनम् आपानभूमिगमनम् T.C. आपानभूमि=குடிக்கும் இடம்

दर्शनं रावणस्यापि पुष्पकस्य च दर्शनम् !
अशोकवनिकायानं सीतायाश्चापि दर्शनम् !! 30

अभिज्ञानप्रदानं च सीतायाश्चाभिभाषणम् !
राक्षसीतर्जनं चैव त्रिजटास्वप्नदर्शनम् !! 31

मणिप्रदानं सीताया वृक्षभङ्गं तथैव च !
राक्षसीविद्रवं चैव किंकराणां निबर्हणम् !! 32

ग्रहणं वायुसूनोश्च लङ्कादाहाभिगर्जनम् !
प्रतिप्लवनमेवाथ मधूनां हरणं तथा !! 33

राघवाश्वासनं चैव मणिनिर्यातनं तथा !
संगमं च समुद्रेण नलसेतोश्च बन्धनम् !! 34

प्रतारं च समुद्रस्य रात्रौ लङ्कावरोधनम् !
विभीषणेन संसर्गं वधोपायनिवेदनम् !! 35

कुम्भकर्णस्य निधनं मेघनादनिबर्हणम् !
रावणस्य विनाशं च सीतावाप्तिमरेः पुरे !! 36

विभीषणाभिषेकं च पुष्पकस्य निवेदनम् !
अयोध्यायाश्च गमनं भरतेन समागमम् !! 37

रामाभिषेकाभ्युदयं सर्वसैन्यविसर्जनम् !
स्वराज्यरञ्जनं चैव वैदेह्याश्च विसर्जनम् !! 38

